Dhanaṃjaya, Dhanika and
Bhaṭṭanṛsiṃha

# Daśarūpaka

— Avaloka

SARIT

SARIT

# Contents

Contents i

१ प्रथमः प्रकाशः १

२ द्वितीयः प्रकाशः ७२

३ तृतीयः प्रकाशः १३६

४ चतुर्थः प्रकाशः १७१

The TEI Header २७०

# १ प्रथमः प्रकाशः

*सदाचारं प्रमाणयता अविघ्नेन प्रकरणसमाप्त्यर्थमिष्टाया देवतायाः प्रकृताभिमतयोश्च देवतयोर्नमस्कारः क्रियते कृतिना श्लोकद्वयेन— §1 1

...1 नमस्तस्मै गणेशाय यत्कण्ठः पुष्करायते।
मदाभोगघनध्वानो नीलकण्ठस्य ताण्डवे॥ १॥ §3

...2 दशरूपानुकारेण यस्य माद्यन्ति भावकाः।
नमः सर्वविदे तस्मै विष्णवे भरताय च॥ २॥ §5

यस्य कण्ठः पुष्करायते मृदङ्गवदाचरति। मदाभोगेन घनध्वानो निबिडध्वनिः। नीलकण्ठस्य शिवस्य ताण्डव उद्धते नृत्ते। तस्मै गणेशाय नमः। अत्र खण्डश्लेषाक्षिप्यमाणोपमाच्छायालंकारः। नीलकण्ठस्य मयूरस्य ताण्डवे यथा मेघध्वनिः पुष्करायत इति प्रतीतेः। *दशरूपानुकारेणेति। एकत्र मत्स्यकूर्मादिप्रतिमारूपेण अन्यत्र अनुकृतिरूपेण नाटकादिना यस्य भावका ध्यातारो रसिकाश्च माद्यन्ति हृष्यन्ति तस्मै अभिमताय विष्णवे प्रकृताय भरताय च नम इति। §6

## भट्टनृसिंहकृता दशरूपकावलोकलघुटीका

१ *] The following verse is found in the beginning of the *Avaloka* only in the Adyar Telugu Manuscript: vācakaḥ praṇavo yasya krīḍāvastv akhilaṃ jagat | śrutir ājñā, vapur jñānaṃ, taṃ vande devakīsutam || F. Hall noted in his Preface (p. ५, fn.) to his edition of the *Daśarūpaka* that in one of the manuscripts of the *Avaloka* the following verse, which is different from the one now seen, was found: praṇipatya śivaṃ sāmbam ācāryaṃ bharataṃ tathā | kriyate daśarūpasya vyākhyānaṃ dhanikena vai || This was however rejected by F. Hall as spurious.

५ काः] A.T.A. reads *bhāvukāḥ*.

७ दाभोगेन] A.T.A. *madābhogaghanadhvānaḥ*.

९ स्य] A.T.A. *tāṇḍave meghadhvanir yathā puṣkarāyate*, etc.

१० *] N.S.P. edition of the *DR*, १९४१, reads without *daśarūpānukāreṇeti*, and as *-pratimānām uddeśena … anukṛtirūpanāṭakādinā*, etc.

१२ न्ति] N.S.P. *tasmai viṣṇave 'bhimatāya*, etc.

## प्रथमः परिच्छेदः

2 क्वचन घटिते ब्राह्मे मुण्डे सगद्गदवेणिका
क्वचन भुजगश्वासैरुग्रैरनुक्षणनर्तिता। §8

क्वचन रचितं रेखाचन्द्रं रयेण विधून्वती
स्मरहरशिरोगङ्गा। *माङ्गल्यमावहतु स्थिरम्॥ §10

दशरूपस्य या व्याख्या धनिकेन समीरिता।
तस्या भट्टनृसिंहेन लघ्वी टीका विधीयते॥ §12

अविघ्नपरिसमाप्तिनमस्कारयोः फलफलिभावे सदाचारमेव प्रमाणीकरोतीति वदन् त्रयाणामेव गणेशविष्णुभरतानां नमस्कारप्रतिपादकतया एकार्थं श्लोकद्वयं युगपदेवोपपादयति सदाचारमित्यादिना। सन्तो दम्भादिरहितानुष्ठायिनः। तेषामाचारः। सोऽत्र प्रमाणम्। स्थापितो ह्यसौ प्रमाणत्वेन सदाचाराधिकरणे 'अपि वा कारणाग्रहणे प्रयुक्तानि प्रतीयेरन्' इति। अविघ्नपरिसमाप्त्यर्थमिष्टदेवता गणेशः। स्वत एवाभिमता देवता विष्णुः। प्रकृता देवता शास्त्रप्रवर्तको भरतः। अत्रारम्भगतयोर्द्वयोरेव श्लोकयोर-

---

१ वेणिका] Before the verse *kvacana ghaṭite*, etc. which is found in all the MSS., T.MS. alone reads the following verse, which is generally recited by the followers of the Rāmānuja School in South India: śuklāmbaradharaṃ viṣṇuṃ śaśivarṇaṃ caturbhujam | prasannavadanaṃ dhyāyet sarvavighnopaśāntaye || The scribe of this copy might have given this, perhaps, because of his following the particular religious practices. As it is not found in all the MSS. it is doubtful whether it was given by Bh.Nṛ. himself. Gr.MS. starts only with *vidhūnvatī smaraharaśirogaṅgā*, of the next verse.

३ न] M.G.T. alone reads *rucitam* of which an emendation into *ruciram* was suggested by the editors of the Triennial Catalogue of Sanskrit Manuscripts, Madras. The metre of the verse *kvacana ghaṭite*, etc. is *hariṇī*.

४ *] T.MS. reads *māṅgalyam*, and others read *maṅgalyam*. Under *ṣidhū = śāstre māṅgalye ca* (*bhvādi* no. ४०) *Mādhavīyadhātuvṛtti* says *māṅgalyaṃ maṅgalakriyeti kṣīrasvāmī*.

६ नृसिंहेन] M.G.T. alone reads *laghuṭīkā*.

९ ति] M.G.T. alone gives *upādāya paṭhati*.

११ इति] मीमांसासूत्रम, १।३।३।७

१३ योरेव] T.MS. reads *dvayor api*. Gr.MS. and M.G.T. read clearly *dvayor eva*. In Tri.MS. some lines are missing here.

लंकारापेक्षा। इतरेषां लक्षणवचनोपक्षीणत्वात्। तत्र द्वितीयस्य श्लोकस्य पूर्ण-
श्लेषोऽलंकारः सुविदित एव। प्रथमश्लोकगताया उपमाच्छायाया एव दुर्बोध-
त्वम। तेनाह अत्र खण्डेति। खण्डेन=अंशभूतेन श्लेषेण आक्षिप्ता=आहृता
उपमाच्छायालंकारः। उपमायाः खलु उपमानोपमेयतुल्यधर्मद्योतकानि प-
रिकरः। अत्र चोपमानोपमेयौ कण्ठः पुष्करश्च। तुल्यधर्मो ध्वानवत्ता।
द्योतकस्थानीय आचारार्थे विहितः क्यङ्प्रत्ययः। अस्यां चोपमायां प्रतिपाद्य-
मानायां प्रतिपादकस्वभावादुपमान्तरमपि स्फुरति। *श्लिष्टोऽर्थो हि शब्दैस्त-
त्प्रतिपादकः। खण्डत्वं श्लेषस्य घननीलकण्ठशब्दमात्रगामित्वात्। प्रकृताया
उपमायाश्छाया उपमान्तरमेव भवति। *मनुष्यच्छायापि खलु मनुष्यरूपैव
दृश्यते। तेन घनध्वानो यत्कण्ठो नीलकण्ठस्य ताण्डवे पुष्करवदाचर-
तीत्येवंरूपाया उपमायाश्छायापि घनध्वानो नीलकण्ठस्य ताण्डवे पुष्करवद् 3
भवतीत्येवंरूपा भवति। *अर्थान्तरप्रतीतौ सत्यां हि उपमान्तरम्। तेनाह
नीलकण्ठस्येति। द्वितीये तु श्लोके पूर्ण एव श्लेषोऽलंकारः। तथा व्याच-
ष्टे दशरूपानुकारेणेति। एकत्रेति। अयं च श्लोकार्थः। यस्य दशरूपाणां
दशावताराणामनुकारेण प्रतिमारूपेण ध्यातारो माद्यन्ति, यस्य च मुनेर्दश-
रूपप्रणीतेन नाटकाद्यनुकारेण सामाजिका माद्यन्ति, सर्वविदे तस्मै विष्णवे
= हरये, भरताय च नम इति। § 13

श्रोतुः प्रवृत्तिनिमित्तं दर्शयति— § 14

...3 कस्यचिदेव कदाचिद् दयया विषयं सरस्वती
विदुषः।

१ रेषां] Only M.G.T. reads *upalakṣaṇatvāt*.
२ ताया] T.MS. and Gr. MS. read *upamāyā eva*. M.G.T. and Tri MS. read *upamācchāyāyā eva durbodhatvam*.
३ आक्षिप्ता=आहृता] M.G.T. reads *āhatā* which seems to be a mistake.
५ श्च] M.G.T. reads *puṣkarasya*.
५ त्ता] Tri.MS. reads *tulyadharmoddhānavattā*.
७ *] Gr. MS. and Tri. MS. read *śliṣṭārtho hi śabdaḥ*.
९ *] Tri.MS. gives *manuṣyasya* ... , whereas M.G.T. gives *amanuṣyasya* ..., etc.
१० वे] Except M.G.T. all others read *puṣkaravad bhavatīty evaṃrūpāyā upamāyāḥ*.
१२ *] This sentence is missing in Tri.MS.
१५ तिमारूपेण] Tri.MS. reads *pratimāropeṇa*.
१७ इति] Only Tri.MS. reads *bharatāya ceti nama iti*.
१ वृत्तिनिमित्तं] N.S.P. *pradarśyate*.

घटयति कमपि तमन्यो व्रजति जनो येन
वैदग्धीम्॥ ३॥ § 16

तं कंचिद्विषयं प्रकरणादिरूपं कस्यचिदेव कवेः कदाचित् सरस्वती योजयति। येन प्रकरणादिना विषयेणान्योऽपि जनो विदग्धो भवति। § 17

उत्तरश्लोकस्यास्फुटविवक्षितार्थतां मन्यमान आह श्रोतुः प्रवृत्तिनिमित्तं दर्शयतीति। श्रोतुः प्रवृत्तिः श्रवणम्। तस्योद्देश्यतया निमित्तं = प्रयोजनम्। तद् दर्शयतीति श्रोतृप्रवृत्त्यङ्गं प्रकरणस्य प्रयोजनं दर्शयतीत्यर्थः। कस्यचिदेवेति श्लोकस्यायमर्थः। कस्यचिदेव विदुषः कदाचिदेव सरस्वती तं कमपि प्रकरणादिरूपं निर्माणविषयं योजयति येनान्योऽपि जनो व्यावृत्तदशरूपज्ञानात्मिकां वैदग्धीं भजत इति। अस्य प्रकरणस्य दशरूपज्ञानं फलमित्यर्थः। तथा व्याचष्टे कस्यचिदेवेति। घटयतीत्यर्थान्तरस्यापि संभवात् संबन्धार्थतामाह योजयतीति। § 18

*स्वप्रवृत्तेर्विषयं दर्शयति— § 19

...4 उद्धृत्योद्धृत्य सारं यमखिलनिगमान्नाट्यवेदं विरिञ्चि-
श्चक्रे यस्य प्रयोगं मुनिरपि भरतस्ताण्डवं
नीलकण्ठः।
4 शर्वाणी लास्यमस्य प्रतिपदमपरं लक्ष्म कः
कर्तुमीष्टे नाट्यानां किंतु किंचित्
प्रगुणरचनया लक्षणं संक्षिपामि॥ ४॥ § 21

यं नाट्यवेदं वेदेभ्यः सारमादाय ब्रह्मा कृतवान्, यत्संबद्धमभिनयं भरतश्चकार करणाङ्गहारानकरोत् हरस्ताण्डवमुद्धतं नृत्तं कृतवान्, लास्यं सुकुमारं नृत्तं पार्वती कृतवती, अस्य सामस्त्येन लक्षणं कर्तुं कः शक्तः। तदेकदेशस्य लक्षणं संक्षेपतः क्रियत इत्यर्थः। § 22

---

२ णादिरूपं] N.S.P. *kadācid eva kasyacid eva kaveḥ*, etc.
३ णादिना] N.S.P. *viṣayeṇānyo jano*, etc.
४ तां] Tri. MS. reads *uttaraślokasya asphuṭaṃ vivakṣitārthaṃ manyamānaḥ*, whereas M.G.T. gives it as *asphuṭavivakṣitārtham*.
४ आह] Only T.MS. gives on the margin *śrotṛpravṛttītyādi*.
१ *] N.S.P. *svapravṛttiviṣayaṃ*.
५ रोत्] A.T.A. *hārān anekān akarot*.
६ अस्य] N.S.P. *tasya*, and the next line as *tadekadeśasya tu daśarūpasya saṃkṣepaḥ kriyata ity arthaḥ*.

स्वप्रवृत्तेर्विषयं दर्शयतीति। स्वशब्देन श्रोतृप्रवृत्तेः स्वप्रवृत्तिं व्यावर्तयति। *स्वस्य प्रवृत्तिः प्रकरणनिर्माणम्। तत्प्रयोजनस्य श्रोतृप्रवृत्त्यैव दर्शितत्वात् संप्रति विषयं दर्शयतीत्यर्थः। उद्धृत्योद्धृत्येत्यस्य अयमर्थः—*नाट्यवेदप्रणीतानां सामस्त्येन लक्षणं किं न क्रियत इति मां प्रत्यचोदनीयम्। *यत्र विरिञ्चादिष्वपि क्वचिदेव कश्चिदेव समर्थः, तदर्थस्य प्रतिपदलक्षणकरणे कोऽपरः शक्नुयात्। किंतु तदुक्तानां नाट्यानामेव लक्षणं किंचित् प्रगुणया रचनया संक्षेपेण वदामीति। तथैव व्याचष्टे यं नाट्यवेदमिति। *आसनस्थानादिरङ्गहारजनकः करणम्। अङ्गहारस्तु अङ्गविक्षेपः। § 23

विषयैक्यप्रसक्तं पौनरुक्त्यं परिहरति— § 24

व्याकीर्णे मन्दबुद्धीनां जायते मतिविभ्रमः।
तस्यार्थस्तत्पदैस्तेन संक्षिप्य क्रियतेऽञ्जसा॥ ५॥ § 26

व्याकीर्णे विक्षिप्ते विस्तृते च शास्त्रे अल्पबुद्धीनां व्यामोहो भवति पुंसाम्। तेन तस्य नाट्यवेदस्यार्थस्तत्पदैरेव संक्षिप्य ऋजुवृत्त्या क्रियत इति। § 27

स्वकृतेरेव विषयकथनपरतया प्रतिभासमानस्योत्तरस्य श्लोकस्य तात्पर्यमाह विषयैक्येति। *एकवक्तृकत्वेऽपि विषयैक्यमेव पौनरुक्त्यप्रयोजकम्। तस्यैव वक्तुर्भिन्नार्थवाक्यकथने पौनरुक्त्याभावात्। पुनःशब्दोऽप्युक्तापेक्षया संगच्छते। ततः शास्त्रेण सह विषयैक्यप्रसक्तं पौनरुक्त्यमुत्तरश्लोकेन परिहरतीत्यर्थः। ननु शास्त्रेणोक्तस्य त्वयापि कथने किं प्रयोजनम्। अत आह

---

२ *] M.G.T. reads *yasya pravṛttiḥ*.
३ *] T.MS. reads *nāṭyavedena*, whereas the others read as given in the text.
५ *] M.G.T. reads *yatra viriñcādiṣv api kvacid eva kaścid eva*. Tri. MS. reads *yatra viriñcādir api*, etc. T.MS. reads *atra viriñcādir api kvacid eva samarthaḥ*. Gr.MS. is corrupt here.
६ णे] T.MS. reads *tadarthasya pratipādakalakṣaṇakaraṇe*, whereas the other read as given in the text.
८ *] M.G.T. reads *āsanasthānādir aṅgādijanakaṃ karaṇam*, and Tri. MS. *āsanasthānādir aṅgādhijanakam*. T.MS. gives the reading as in the text.
४ विक्षिप्ते] MSS. of *Avaloka* read *vistīrṇe* instead of *vistṛte* and *matimoho* instead of *vyāmoho*. N.S.P. *vistīrṇe ca rasaśāstre mandabuddhīnāṃ puṃsāṃ matimoho bhavati*.
६ स्य] T.MS. omits *ślokasya*.
७ *] Tri.MS. gives this reading. M.G.T. reads *ekavaktṛivo 'pi*. T.MS. reads *ekavaktṛkaraṇatve 'pi*.
८ स्यैव] Here M.G.T. is corrupt.
९ शास्त्रेण] T. MS. omits *saha*.
१० यापि] M.G.T. reads *vacane*, Tri. MS. *vivacane*.

व्याकीर्ण इति। यद्यपि शास्त्रेणोक्तोऽयमर्थः, तथापि तेन विक्षेपाद् विस्तरतश्चोक्तमर्थमहं संक्षेपेणार्जवेन च वदामीत्यर्थः। *उत्तरोक्तपरिहारद्वयकटाक्षेण व्याचष्टे व्याकीर्णे विक्षिप्ते विस्तृते चेति। बुद्धेर्मान्द्यं नाम न विषयाणामग्रहः। किं तु अल्पविषयत्वम्। तेनाह अल्पबुद्धीनामिति। अल्पस्य बुद्धिरल्पबुद्धिः। अल्पविषया बुद्धिरित्यर्थः। विक्षिप्ते विभ्रमो भवति। विस्तीर्णे विस्मरणम्। उभयसंग्रहार्थं व्यामोह इत्युक्तम्। तस्येत्यत्र तद्वृत्तेन नाट्यवेदः परामृश्यते इत्याह तस्य नाट्यवेदस्येति। यद्यप्ययमर्थः विक्षिप्ते विभ्रमो भवतीति पूर्वश्लोकेनैव सूचितः, तथापि विक्षेपे विस्तरे च दर्शिते सति परिहारापेक्षा भवतीत्ययमेव परिहारः। § 28

इदं प्रकरणं दशरूपज्ञानफलम्। *दशरूपज्ञानं किंफलमित्याह— § 29

…6 आनन्दनिष्यन्दिषु रूपकेषु व्युत्पत्तिमात्रं
फलमल्पबुद्धिः।
योऽपीतिहासादिवदाह साधुस्तस्मै नमः
स्वादपराङ्मुखाय॥ § 31

अत्र केचित्

धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च।
करोति कीर्तिं प्रीतिं च साधुकाव्यनिषेवणम्॥* § 34

इत्यादिना त्रिवर्गादिव्युत्पत्तिं काव्यफलत्वेनेच्छन्ति। तन्निरासेन स्वसंवेद्यपरमानन्दरूपो रसास्वादो दशरूपाणां फलम्, न पुनरितिहासादिवत् त्रिवर्गादिव्युत्पत्तिमात्रमिति दर्शितम्। नम इति सोल्लुण्ठनम्। § 35

२ हं] M.G.T. omits *aham*.
२ *] M.G.T. reads *uttarottaraparihāra-* etc.
३ नाम] T. MS. omits *na*.
५ म्] M.G.T. and Tri.MS. give *vistāraṇam*.
६ द्वृत्तेन] *tadvṛttam* means *tacchabdaḥ* (*vibhaktyantaḥ*), just as *yadvṛttaṃ* means *yacchabdaḥ*, and *kiṃvṛttaṃ* *kiṃśabdaḥ*. See the *kārikā* about *uddeśya* and *vidheya*: yadvṛttayogaḥ prāthamyam ityādy uddeśyalakṣaṇam | tadvṛttayogaḥ paścāttvaṃ syād vidheyasya lakṣaṇam || also quoted by Nāgeśa in his *Laghumañjūṣā* (C.S.S. १९२५, pp. १४३४–५), and Pāṇini's rules *yadvṛttān nityam*, and *kiṃvṛtte lipsāyām*, and *Kāśikā* and *Kaumudī* thereon. See also Note २४७b to *L.Ṭ.*, and the *L.Ṭ.*
१ *] N.S.P. *daśarūpaṃ kiṃphalam* ?
३ मः] N.S.P. *svādu-*.
४ अत्र] N.S.P. *tatra*.
६ *] भामहः १।२
८ रूपो] A.T.A. *paramānandasvarūpo*.
९ म्] N.S.P. *solluṇṭham*.

उत्तरस्य श्लोकस्य नमस्कारपर्यवसायित्वमसंगतमनुपयुक्तं च मन्वानः
संगतेन सोपयोगेन च प्रयोजनाप्रयोजनकथनपरत्वेन तं व्याख्यास्यन् त-
दनुकूलां शङ्कामवतारयति इदमिति। अस्य हि प्रकरणस्य दशरूपकज्ञानं 6
फलमुक्तं व्रजति जनो येन वैदग्धीम् इति। न च दशरूपज्ञानं स्वतः
फलम्। किंतु फलान्तरहेतुतया, पश्वादिवत्। *तत् फलान्तरं कीदृशमित्य-
र्थः। तत्प्रदर्शनपरस्य श्लोकस्यायमर्थः। आनन्दनिष्यन्दीनि ह त्रिवर्गव्युत्प-
त्तिकराणि रूपकाणि। तत् तेषां यः साधुरल्पबुद्धिः सन्नितिहासादीनामिव
त्रिवर्गव्युत्पत्त्यादिमात्रफलतामाह स्वादपराङ्मुखाय तस्मै नम इति। तमिमं
तथा व्याख्यास्यन् यैस्त्रिवर्गव्युत्पत्तिमात्रफलत्वमुक्तं तेषां मूलं दर्शयति ध-
र्मार्थकामेति। अत्र चतुर्वर्गप्रसङ्गात् पठितस्यापि मोक्षस्याभिनयशून्यतया त-
मनादृत्य त्रिवर्गपरतामेवास्य ग्रन्थस्य स्वरीत्या दर्शयन् तथैव पठति त्रिव-
र्गादिव्युत्पत्तिमिति। स्वसंवेद्येति। स्वसंवेद्यो निरतिशयसुखसंविद्रूपः परमान-
न्दः। स एव रसः। तस्य स्वतः प्रकाशमानस्य आस्वादो नाम अन्तःकरणे
प्रतिबिम्बितस्य काव्यार्थेन तत्र संक्रान्तेन संबन्धः। तस्माद् रूपकाणां त-
थाविधो रसास्वाद एव फलमिति। न केवलं त्रिवर्गादिव्युत्पत्तिरेव किंतु
सापीति दर्शितं मात्रशब्देन। ऋजुबुद्धीनुपच्छन्दयति नम इति सोल्लुण्ठन-
मिति। § 36

नाट्यानां लक्षणं संक्षिपामि* इत्युक्तम्, किं पुनस्तन्नाट्यमित्याह—
§ 37

...7a **अवस्थानुकृतिर्नाट्यं** § 38

२ च] Except T.MS. all MSS. read *prayojana–kathanaparatvena*.
३ अस्य] T.MS. omits *hi*.
४ मुक्तं] १।३
५ *] In T.MS. *tat* is missing.
६ ह] Tri. MS. reads *ānandaniṣyandiṣv iti*, and M.G.T. *ānandaniṣyandīti*. Both read *trivargavyutpattikarāṇi ca rūpakāṇi*. The particle *ha* is a *prasiddhyarthakāvyaya*, and the significance intended here seems to be this: *yāni trivargavyutpattikarāṇi rūpakāṇi tāni ānandaniṣyandīni ha, ānandaniṣyandīni iti prasiddhāni (rasikasamāje). evaṃ sati tatrānandāṃśaṃ parityajya yaḥ sādhuḥ vyutpattyādimātraphalatām āha tasmai namaḥ*, etc. See *Vaijayantī* for the meaning of *ha*.
८ न्नितिहासादीनामिव] Tri.MS. reads *vyutpattimātraphalatām āha*.
९ तेषां] Only in T.MS. *mūlam* seems to be missing.
११ *] १।४

काव्योपनिबद्धधीरोदात्ताद्यवस्थानुकारश्चतुर्विधाभिनयेन वाचिकाङ्गिकसात्त्विकाहार्यरूपेण तादात्म्यापत्तिर्नाट्यम्। § 39

विषयप्रयोजनोक्त्यैव तदन्तर्गतः संबन्धोऽप्युक्तः। एवं प्रतिपन्नप्रयोज-
नाभिधेयसंबन्धं जिज्ञासुं पृच्छन्तं प्रत्युत्तरमाहेति वदति किं पुनरिति।
कीदृश्योऽवस्थाः किदृशी चानुकृतिरित्यपेक्षायां व्याचष्टे काव्योपनिबद्धेति।
अभिनयाकृष्टमभिनेयं तच्छब्देन परामृशति तादात्म्यापत्तिरिति। अभिनय-
स्यारोपरूपत्वात्। चातुर्विध्यं च तस्याङ्गिकसात्त्विकवाचिकाहार्यभेदात्। एत-
दुक्तं भवति। रामादिनायका न स्वरूपेणोपयुज्यन्ते। अभिनयकाले तेषाम-
7 सत्त्वात्। किं तु काव्योपनिबद्धधीरोदात्ताद्यवस्थावद्रूपेण। नायकादिशब्दाः
खलूपाधिप्रयुक्ताः। उपाधयश्चावस्थाः। एकस्यैव हि धीरोदात्तत्वधीरोद्धतत्व-
धीरललितत्वधीरशान्तत्वानि भवन्ति। अतस्ता अवस्था एव तत्प्रवृत्त्युपाधय
इति। § 40

...7b **रूपं दृश्यतयोच्यते।** § 41

तदेव नाट्यं दृश्यमानतया रूपमित्युच्यते, नीलादिरूपवत्। § 42

तदेवेति। तदेव नाट्यं रूपमित्युच्यते। यथा नीलादिरूपस्य दृश्यत्वगुणयोगः एवमिदमपि दृश्यत्वगुणयोगाद् रूपमित्युच्यते। यथा माणवके ज्वलनशब्दो गौणः एवं नाट्यस्थो रूपशब्दोऽपि गौण इत्यर्थः। § 43

...7c **रुपकं तत्समारोपाद्** § 44

नटे रामाद्यवस्थारोपेण वर्तमानत्वाद् रूपकम्। मुखचन्द्रादिवदित्येकस्मिन्नर्थे प्रवर्तमानस्य शब्दत्रयस्य इन्द्रः पुरंदरः शक्रः इतिवत् प्रवृत्तिनिमित्तभेदो दर्शितः। § 45

---

१ येन] *vācikāṅgika … rūpeṇa* is missing in N.S.P.

४ न्धं] M.G.T. gives the reading shown in the text. Tri.MS. reads *saṃbandhajijñāsum*. T.MS. reads *evaṃ pratipanne prayojanābhidheyasaṃbandhajijñāsum*.

६ ति] Cf.: sāttvikādyair abhinayaiḥ prekṣakāṇāṃ yato bhavet | naṭe nāyakatādātmyabuddhis tan nāṭyam ucyate || (*Rasārṇavasudhākara*, T.S.S., p. ८) avasthānukṛtir nāṭyam iti sāmānyalakṣaṇam | rāmāditādātmyāpattir naṭe yā nāṭyam ucyate || (*Bhāvaprakāśa*, G.O.S., p. १८०). B.M. says: *yat naṭasya prekṣakabuddhyā rāmāditādātmyāpattiḥ … tat nāṭyam.*

५ ब्दो] M.G.T. reads *analaśabdaḥ*.

५ एवं] M.G.T. reads *evaṃ nāṭyārtho rūpaśabdo gauṇa ity arthaḥ*.

नट इति। यथा मुखे चन्द्रत्वसमारोपात् मुखं चन्द्रः, एवं नटे रामाद्यवस्थारोपात् नटोऽपि रामादिः। मुखचन्द्रादिवदिति। मुखचन्द्रत्वादिवदित्यर्थः। ननु नाट्यरूपरूपकशब्दा यदि भिन्नार्थाः तर्हि एकवद्व्यवहारो न स्यात्। अस्ति च सः नाट्यानां लक्षणं संक्षिपामीति, दशरूपानुकारेणेति, आनन्दनिष्यान्दिषु रूपकेष्विति च। अथैकार्थाः, तदा सामानाधिकरण्यं न स्यात्। न हि घटो घट इति सामानाधिकरण्यम्। तत्राह एकस्मिन्निति। *पर्यवसानस्यैकत्वादेषामेकार्थत्वेन व्यवहारः। प्रवृत्तिनिमित्तभेदाच्च सामानाधिकरण्यम्। यथा परमैश्वर्यं शक्तत्वं विक्रमत्वं चोपाधीकृत्य एकस्मिन्नर्थे प्रवर्तमानस्य इन्द्रादिशब्दत्रयस्य एकार्थत्वं सामानाधिकरण्यं च एवमिहापीति। § 46

दशधैव रसाश्रयम्॥ ७॥ § 47

रसानाश्रित्य प्रवर्तमानं दशप्रकारकम्। एवेत्यवधारणं तु शुद्धाभिप्रायेण, नाटिकायाः संकीर्णत्वेन वक्ष्यमाणत्वात्। § 48

बहुत्वाद्रसानां बहुवचनेन विगृह्णाति रसानाश्रित्येति। ननु न्यूनाधिक- 8
संख्याव्यवच्छेदफलेन संख्यानेनैव दशेति सिद्धे किमवधारणेन। तत्राह अवधारणं त्विति। शुद्धिर्नाम लक्षणासांकर्यम्। नाटिका हि नाटकप्रकरणलक्षणसंकरादेवोपपद्यत इति। § 49

तानेव दशभेदानुद्दिशति— § 50

...8 नाटकं सप्रकरणं भाणः प्रहसनं डिमः।
व्यायोगसमवकारौ वीथ्यङ्केहामृगा इति॥ ८॥ § 52

ननु च

डोम्बी श्रीगदितं भाणो भाणीप्रस्थानरासकाः।
काव्यं च सप्त नृत्यस्य भेदाः स्युस्तेऽपि भाणवत्॥ § 55

इत्यादिना रूपकान्तराणामपि भावादवधारणानुपपत्तिरित्याशङ्क्याह—
§ 56

३ र्हि] This is the reading in Tri.MS. M.G.T. reads *tarhi eka eva vyavahāro*. Gr. MS. reads *tarhi aikyavyavahāro na syāt. asti ca saṃprati.* T.MS. gives as *tasyaikavyavahāro na syāt.*
६ *] Gr.MS. and T.MS. read *paryavasānasthānasya*.

२ तु] *tu* is given by Bh. Nr., but missing in N.S.P.
४ नु] *nanu ca* is *lemma* in *Laghuṭīkā*, but N.S.P. has only *nanu*.
७ इत्यादिना] N.S.P. *iti rūpakāntarāṇām*, etc.

...9a **अन्यद् भावाश्रयं नृत्यं** § 57

रसाश्रयान्नाट्याद् भावाश्रयं नृत्यमन्यदेव। तत्र भावाश्रयमिति विषयभेदान्नृत्यमिति नृतेर्गात्रविक्षेपार्थत्वेनाङ्गिकबाहुल्यात् तत्कारिषु च नर्तकव्यपदेशाल्लोकेऽपि च रङ्गे प्रेक्षणीयकमिति व्यवहारान्नाटकादेरन्यन्नृत्यम्। तद्भेदत्वाच्छ्रीगदितादेर्नावधारणानुपपत्तिः। नाटकादि च रसविषयम्। रसस्य च पदार्थीभूतविभावादिकसंसर्गात्मकवाक्यार्थरूपत्वाद् वाक्यार्थाभिनयात्मकत्वं रसाश्रयमित्यनेन दर्शितम्। नाट्यमिति च नट अवस्पन्दने इति नटेः किंचिच्चलनार्थत्वात् सात्त्विकबाहुल्यम्। अत एव तत्कारिषु नटव्यपदेशः। [लोकेऽपि
9 च रङ्गे नाट्यमिति व्यपदेशः। एतदुक्तं भवति]* यथा च गात्रविक्षेपार्थत्वे समानेऽप्यनुकारात्मकत्वेन नृत्यादन्यन्नृत्तं तथा वाक्यार्थाभिनयात्मकान्नाट्यात् पदार्थाभिनयात्मकमन्यदेव नृत्यमिति। § 58

ननु डोम्बीप्रभृतीनां रूपकान्तराणामपि भावात् पुनरप्यवधारणमनुपपन्नमिति चोदयति ननु चेति। उत्तरम् अन्यदिति। कस्मादन्यत्वमित्यपेक्षायां व्याचष्टे रसाश्रयादिति। कथं नाट्यान्नृत्यस्य भेद इत्यत्राह तत्रेति। विषयभेदात् स्वरूपभेदात् कर्तृभेदात् संज्ञाभेदाच्च भेदः। तत्र भावाश्रयमित्यनेन विषयभेदो तर्शितः। आङ्गिकबाहुल्यादित्यनेन स्वरूपभेदो दर्शितः। तत्कारिषु च नर्तकव्यपदेशादित्यनेन कर्तृभेदो दर्शितः। *प्रेक्षणीयकमित्यनेत संज्ञाभेदो दर्शितः। ननु नाटकादेस्ततो भेदः केन दर्शितः। तत्राह रसाश्रयमित्यनेनेति। कथमनेन दर्शितमित्यपेक्षायामुक्तं नाटकादि च रसविषयमित्यादि। यद्यपि विभावादयस्तैरतिशयोक्त्यादिभिः प्रतिपाद्यमाना वाक्यार्था एव न पदार्थाः। तथापि तेषां संयोगाद् रसोत्पत्तेः ते तं प्रति पदार्थीभावं भजन्ते। रसोऽपि तदुत्पाद्यो वाक्यार्थीभवति। अतो वाक्यार्थीभूतरसविषयं नाटकादि। तेनात्रपि रसविषयमिति विषयभेदः, सात्त्विकबाहुल्येन स्वरूपभेदः, तत्कारिषु च नटव्यपदेशादित्यनेन कर्तृभेदः, लोकेऽपि च रङ्गे नाट्यमिति व्यपदेशादिति

---

३ मिति] A.T.A. *nṛtyam iti ca nṛter,* etc.
४ च] N.S.P. (*loke 'pi*) *cātra.*
५ त्तिः] N.S.P. *avadhāraṇopapattiḥ.*
६ त्वाद्] N.S.P. -*vākyārthahetukatvād,* etc. *vākyārtharūpatvād* is the correct reading, and not … *hetukatvād* as in the N.S.P. or … *hetutvād* as quoted in *Bhoja's Śṛṅgāra Prakāśa* (१९६३), page ५३७.
९ *] This is in the light of the explanation by Bh. Nṛ.
१० न्नृत्तं] N.S.P. *nṛttād anyan nṛtyam.*
१७ *] Tri.MS. reads *raṅgaprekṣitam ity anena* in place of *prekṣaṇīyakam ity anena.*
२४ देशादिति] In the *Avaloka* the expression *raṅge nāṭyam iti vyapadeśāt* is not found as such. But according to Bhaṭṭanṛsiṃha the expression in some form should find its place or the idea understood in the context.

संज्ञाभेदोऽपि द्रष्टव्यः। * एतदुक्तं भवतीति वदन्नुभयोरपि गात्रविक्षेपात्मकत्वे समानेऽप्यनयोः किंकृतो भेद इति शङ्कां शमयन्नाह यथा चेति। तत्साम्येऽपि वाक्यार्थाभिनयात्मकत्वं पदार्थाभिनयात्मकत्वं च द्वयोर्भेदकमिति। § 59

प्रसङ्गान्नृत्तं व्युत्पादयति— § 60

...9b **नृत्तं ताललयाश्रयम्।** § 61

तालः = चञ्चत्पुटादिः,* लयः=द्रुतादिः, तन्मात्रापेक्षोऽङ्गविक्षेपोऽभिनयशून्यो नृत्तमिति। § 62

प्रसङ्गादिति। अवधार्यत्वेन नृत्यमुक्तम्। नृत्यप्रसङ्गान्नृत्तमुच्यते इति। तालश्चञ्चत्पुटादिरिति। ‘चञ्चत्पुटश्चाचपुटः षट्पितापुत्रकस्तथा’* इत्यादिस्तालाध्यायप्रतिपादितस्तालः। लयो द्रुतादिरिति। द्रुतविलम्बितमध्यमादिरूपो लयः। कालस्य स्वतो भेदाभावाद् औपाधिक एव भेदः। *संप्रति तस्योपाधिस्तालध्वनिभेद एव। तेन हि नृत्तं परिमीयते। यथोक्तं ‘पादन्यासो लयमनुगतः’ इति। § 63

अनन्तरोक्तं द्वितयं व्याचष्टे— § 64

---

१ *] *etad uktaṃ bhavati* is also not seen in the *Avaloka*; it seems that according to Bh.Nṛ. it was in the text.
३ त्साम्येऽपि] Only T.MS. reads *tatsāmye 'pi vākyārthābhinayataḥ katamat padārthābhinayataḥ katamac ca dvayor bhedakam iti*. All others read what is given in the text.
३ *] After *cañcatpuṭādiḥ,* the following lines are found only in A.T.A.: kālo laghvādiniyatakriyayā saṃmitāṃ matim gītāder vidadhat tālaḥ sa ca dvedhā budhaiḥ smṛtaḥ || This verse is however found (with *mitim*) in the *Saṃgītaratnākara*, ch. V. ३ (Adyar). It is not clear whether this was quoted from some earlier source. This verse and the following line on *laya* are quoted also by Kumārasvāmin. See the *Pratāparudriya,* Balamanorama Press ed., १९५०, page ७३: *layo 'pi 'tālāntarālavartī yaḥ kālo 'sau layanāl layaḥ' etadubhayāśrayaṃ deśyaparaparyāyaṃ padārthābhinayaśūnyaṃ nṛttam iti.*
६ *] This line is found in one of the verses attributed to Mataṅga in Siṃhabhūpāla's commentary on the *Saṃgītaratnākara* (vol. III, Adyar, १९५१, p. ९).
८ *] M.G.T. reads *pratītasyopādhitāladhvanir eva bheda eva.*
१० इति] मालविकाग्नि॰ २।८

...9cd आद्यं पदार्थाभिनयो मार्गो देशी तथापरम्॥ ९॥
§ 65

नृत्यं पदार्थाभिनयात्मकं मार्ग इति प्रसिद्धम्। नृत्तं तु देशीति। § 66

अनन्तरोक्तमिति। उक्तेः पूर्वभाव एवानन्तर्थम्। द्वितयम् = नृत्यनृत्तात्मकम्। द्वितयस्याद्यं नृत्यमन्यन्नृत्तमिति। पदार्थाभिनयरूपनृत्यं मार्ग इति प्रसिद्धम्, अपरं नृत्तं देशीति प्रसिद्धमिति। § 67

द्विविधस्यापि द्वैविध्यं दर्शयति— § 68

...10 मधुरोद्धतभेदेन तद् द्वयं द्विविधं पुनः।
लास्यताण्डवरूपेण नाटकाद्युपकारकम्॥ १०॥
§ 70

सुकुमारं द्वयमपि लास्यम्, उद्धतं द्वितयमपि ताण्डवमिति। प्रसङ्गोक्तस्योपयोगं दर्शयति—नाटकाद्युपकारकमिति। नृत्यस्य क्वचिदवा- न्तरपदार्थाभिनयरूपत्वेन नृत्तस्य च शोभाहेतुत्वेन नाटकादावुपयोग इति। § 71

द्विविधस्यापि = नृत्यनृत्तात्मना द्विविधस्यापि तस्य पुनरपि द्वैविध्यं दर्शयतीति। लास्यताण्डवरूपेणेति। नाटकाद्युपकारकमित्यनेन एकग्रन्थता मा भूदिति ततोऽपच्छिद्य द्वैविध्यप्रकारकथनपरतयोक्तम्। प्रसङ्गेनापि निष्प्रयोजनं न वक्तव्यम्। तेनाह प्रसङ्गोक्तस्येति। नृत्यनृत्तयोर्हि स्वप्राधान्ये सति नान्योपकारकत्वम्। तेनोक्तं क्वचिदिति। § 72

11 *अनुकारात्मकत्वेन रूपकाणामभेदात् किंकृतो भेद इत्याशङ्क्याह—
§ 73

...11a *वस्तु नेता रसस्तेषां भेदको § 74

*इतिवृत्तभेदान्नायकभेदाद्रसभेदाच्च रूपकाणामन्योन्यं भेद इति। § 75

---

२ तु] N.S.P. *nṛttaṃ ca.*
५ योगं] N.S.P. *darśayati—tacca nāṭakādy,* etc.
६ त्वेन] N.S.P. *-padārthābhinayena,* etc.
९ च्छिद्य] M.G.T. and Tri. MS. read *tato 'pi vicchidya,* whereas Gr. MS. gives as *tato vicchidya.*
१ *] A.T.A. *anukaraṇātma-,* etc.
१ त्वेन] N.S.P. *rūpāṇām,* etc.
३ *] A.T.A. seems to read here *vastunetṛrasās teṣāṃ rūpakāṇāṃ hi bhedakāḥ.*
४ *] N.S.P. *vastubhedād,* etc.
४ भेदाच्च] N.S.P. *rasabhedād rūpāṇām,* etc.

ऐक्यप्रसङ्गे हि भेदकथनस्य प्रयोजनवत्त्वम्। तेनाह अनुकारात्मकत्वेन रूपकाणामभेदादिति। इतिवृत्तादीनामवान्तरभेदो रूपकभेदहेतुः। तेनाह इतिवृत्तभेदादित्यादि। इतिवृत्तस्य इतिवृत्तान्तरेभ्यो भेदात्, नायकस्य नायकान्तरेभ्यो भेदात्, रसस्य रसान्तरेभ्यो भेदादिति नेयम्। ननु विजातीयेभ्यो नृत्तेभ्यो भेदः पूर्वमेव प्रतिपादितः। तत्राह अन्योन्यमिति। § 76

तत्र वस्तुभेदमाह— § 77

...11b वस्तु च द्विधा। § 78

कथमित्याह— § 79

...11cd तत्राधिकारिकं मुख्यमङ्गं प्रासङ्गिकं विदुः॥ ११॥
§ 80

प्रधानभूतमितिवृत्तमाधिकारिकम्। यथा रामायणे रामसीतावृत्तान्तः। तदङ्गभूतं प्रासङ्गिकम्। यथा तत्रैव विभीषणसुग्रीवादिवृत्तान्त इति। § 81

निरुक्त्या*धिकारिकं* लक्षयति— § 82

...12 अधिकारः फलस्वाम्यमधिकारी च तत्प्रभुः।
तन्निर्वर्त्यमभिव्यापि वृत्तं स्यादाधिकारिकम्॥ १२॥
§ 84

फलेन स्वस्वामिसंबन्धोऽधिकारः, फलस्वामी चाधिकारी, *तेनाधिकारिणा निर्वृत्तं फलपर्यन्ततां नीयमानमितिवृत्तमाधिकारिकम्। § 85

निरुक्त्येति। निर्वचनेन सह आधिकारिकस्य लक्षणं कथयतीत्यर्थः। 12
ननु कारिकायां फलस्वाम्यं तच्छब्देन परामृश्यते। तच्चानुचितमिव प्रतिभाति। तेनाह फलेन स्वस्वामिसंबन्ध इति। फलेन सह स्वस्वामिलक्षणसंबन्धोऽधिकारः। संबन्धो हि गुणप्रधानयोरेव भवति। फलभोक्तुर्गुणभावः कदाचिदपि मा भूदिति तत्प्रभुरित्युक्तमित्याह फलस्वामी चाधिकारीति। फलपर्यन्ततां नीयमानमिति प्रत्ययार्थं निर्वृत्तं विशिनष्टि। कारिकायां

२ भेदो] M.G.T. alone reads *itivṛttanāyakarasabhedo rūpakabhedahetuḥ*.
१ त्र] N.S.P. omits *tatra*.
३ म्] *itivṛttam* missing in N.S.P.
४ *] N.S.P. *tenādhikāreṇādhikāriṇā vā*, etc.

निर्वर्त्यमित्यन्तेन निरुक्तकथनम्। अभिव्यापीति लक्षणकथनम्। अयं च निरुक्तक्रमः। अधिकारोऽस्यास्तीति अधिकारी। तस्मादधिकारिशब्दात् ठकि 'यस्येति च' इतीकारलोपे वृद्धौ च कृतायामाधिकारिकमिति रूपं भवति। § 86

*प्रासङ्गिकं* निर्व्याचष्टे— § 87

...13ab प्रासङ्गिकं परार्थस्य स्वार्थो यस्य प्रसङ्गतः। § 88

यस्येतिवृत्तस्य परप्रयोजनस्य सतस्तत्प्रसङ्गात् स्वप्रयोजनसिद्धिः तत् प्रासङ्गिकमितिवृत्तम्। प्रसङ्गनिर्वृत्तेः प्रासङ्गिकम्। § 89

प्रासङ्गिकस्य लक्षणकथनपूर्वकं निर्वचनं दर्शयतीत्याह प्रासङ्गिकं निर्व्याचष्ट इति। तस्य लक्षणोक्तिं विवृणोति यस्येतिवृत्तस्येति। शब्दनिर्वचनं दर्शयति प्रसङ्गनिर्वृत्तेः प्रासङ्गिकमिति। § 90

प्रासङ्गिकमपि *पताका-प्रकरी*भेदाद् द्विविधमित्याह— § 91

...13cd पताकाप्रकरीभेदाद् द्विविधत्वं प्रपद्यते*
सानुबन्धं पताकाख्यं प्रकरी च प्रदेशभाक्॥ १३॥
§ 93

दूरं यदनुवर्तते प्रासङ्गकं सा पताका, सुग्रीवादिवृत्तान्तवत्। पताकेवासाधारणनायकचिह्नवत् तदुपकारित्वात्। यदल्पं = दूरं नानुवर्तते सा प्रकरी, श्रावणादिवृत्तान्तवत्। § 94

13 पताकाप्रसङ्गात् *पताकास्थानकमपि* व्युत्पादयति— § 95

...14 प्रस्तुतागन्तुभावस्य वस्तुनोऽन्योक्तिसूचनम्।
पताकास्थानकं तुल्यसंविधानविशेषणम्॥ १४॥ § 97

१ ष्टे] N.S.P. *vyācaṣṭe.*
७ नं] Tri. MS. reads *śabdanirvacanāṅgaṃ darśayati,* and T.MS. gives it as *śabdanirvacanāc chandaṃ darśayati.* The others read what is given in the text.
२ *] Only A.T.A. gives this half verse and it is not found in N.S.P.
५ =] *dūraṃ nānuvartate* missing in N.S.P.
१ ङ्गात्] N.S.P. *patākāprasaṅgena,* and without *api.*
२ स्य] N.S.P. *vastuto* and *sūcakam,* in *kārikā* and *sūcakarūpam* in *Ava.*

प्राकरणिकस्य भाविनोऽर्थस्य सूचनरूपं पताकावद् भवतीति पताकास्थानकम्। तच्च तुल्येतिवृत्ततया तुल्यविशेषणतया च द्विप्रकारम्—अन्योक्तिसमासोक्तिभेदात्। *समासोक्तेः सकाशादन्योक्तेर्भेदात्। यथा रत्नावल्याम्—

यातोऽस्मि पद्मनयने समयो ममैष सुप्ता मयैव भवती
प्रतिबोधनीया।
प्रत्यायनामयमितीव सरोरुहिण्याः सूर्योऽस्तमस्तकनिविष्टकरः
करोति॥* § 100

तथा च—

उद्दामोत्कलिकां विपाण्डुररुचं प्रारब्धजृम्भां क्षणा- दायासं
श्वसनोद्गमैरविरलैरातन्वतीमात्मनः।
अद्योद्यानलतामिमां समदनां नारीमिवान्यां ध्रुवं पश्यन्
कोपविपाटलद्युति मुखं देव्याः करिष्याम्यहम्॥* § 103

§ 104

दूरानुवृत्त्यल्पानुवृत्तिभेदात् प्रासङ्गिकस्य द्वैविध्यमुक्तम्। संप्रति पताकाशब्दात् स्मृतं पताकास्थानकं व्युत्पादयतीत्याह पताकाप्रसङ्गादिति। यत् प्रस्तुतं च आगन्तुवद् भवति च तस्य वस्तुनः प्रस्तुतागन्तुभावस्येति व्युत्पत्तिमङ्गीकृत्याह प्राकरणिकस्येति। तुल्यसंविधानं तुल्यविशेषणं च अन्योक्त्या वस्त्वन्तरस्य सूचनं यत् तत् पताकास्थानकमित्युक्तम्। न च समासोक्तिव्यतिरेकेणान्योक्तिं पश्यामो यया वस्त्वन्तरं सूच्येत। तत्राह समासोक्तेः सकाशादन्योक्तेर्भेदादिति। समासोक्तेर्विलक्षणैव अन्योक्तिः। सं-

---

३ *] *samāsokteḥ sakāśād anyokter bhedāt* is missing in N.S.P. See Note ४७ to *Laghuṭikā*.
६ *] ३।६
७ था] *yaṭhā ca tulyaviśeṣaṇatayā* in N.S.P.
९ ध्रुवं] A.T.A. *nārīm ivānyāṃ vadhūm*.
९ *] रत्ना॰ २।४
१७ त्राह] Rudraṭa defines *anyokti* and *samāsokti* thus: asamānaviśeṣaṇam api yatra samānetivṛttam upameyam | uktena gamyate param upamānena sānyoktiḥ || (VIII. ७४) sakalasamānaviśeṣaṇam ekaṃ yatrābhidhīyamānaṃ sat | upamānam eva gamayed upameyaṃ sā samāsoktiḥ || (VIII. ६७). Namisādhu, the commentator, explains *samānetivṛttam*, etc. thus: *samānam = sadṛśam, itivṛttam = arthaśarīram, yasya tat tathoktam. yataḥ upamānatulyavyavahāram upameyam atas tena gamyate ity arthaḥ. apiśabdāt kiṃcitsamānaviśeṣaṇatve 'pi kvāpi bhavatīti sūcyate iti.*

From the wording in the *kārikā* as *tulyasaṃvidhānaviśeṣaṇa*, and its analysis in the *Avaloka* as *tulyetivṛttatayā tulyaviśeṣaṇatayā ca* the authors seem to indicate some connection between these statements and Rudraṭa's definitions. Later on too under IV.३४ Dhanika quotes Rudraṭa's *Kāvyālaṃkāra* XII.४. In brief the statements here seem to mean this: --- (१) If a second meaning or idea is comprehensible because of the fact that the adjectives (*viśeṣaṇa*) are the same and applicable equally to both the meanings, then it is *samāsokti*. --- (२) If on the other hand (all) the adjectives are not equally applicable in both the cases, but the *itivṛtta = arthaśarīra* = the situation being equal in both the cases, a second idea occurs from the description, then it is *anyokti*. --- As a result of one or the other if a future event is foreshadowed, then it is technically known as *patākāsthānaka* (pre-episode element). The verse *uddāmotkalikām*, etc. is a case of *samāsokti* and is given by all writers like Dhanika, Viśvanātha and Śiṅgabhūpāla. The other example cited in the *Avaloka*---*yāto 'smi padmanayane*, etc. is not given by other writers on the subject. Further, other writers made a sub-division of *anyokti* into *three*, and gave three separate examples for these. Bahurūpamiśra does not mention the three sub-divisions separately, but includes all the four in the two given by Dhanaṃjaya. Bahurūpamiśra reproduces the example *uddāmothalikām*, etc. cited by Dhanika, but for the other (i.e. *anyokti*) gives an example from the *Mudrārākṣasa*:

**cāṇakyaḥ** *ātmagatam* --- api nāma sa durātmā rākṣ
?

**siddhārthakaḥ** --- ārya gṛhītaḥ

etc. --- Here Bhaṭṭanṛsiṃha's comments and the application of the example *yāto 'smi padmanayane*, etc. in the context, are perhaps to be understood thus: *samāsokter vilakṣaṇaiva anyoktiḥ. saṃkṣipyoktiḥ. samāsoktir ity etāvatī samāsokiḥ. (samānena viśeṣaṇena dvitīyārthasyāpi pratipādanāt, dvayor arthayoḥ pratipādanāya viśeṣaṇasya dvir aprayogāt ityevaṃ tatsaṃkṣepāt.*) And *anyapratītim (= ekārthapratītim) uddiśya, anyasyoktiḥ (= ekasya vākyasyoktiḥ, taduktyā ca viśeṣaṇasāmyābhāve 'pi vyavahārasāmyāt arthāntarasya pratītir yatra sā) anyoktir iti tayor bhedaḥ*. --- In the example *yāto 'smi padmanayane*, etc. though the words *yāto 'smi padmanayane samayo mamaiṣaḥ*, and *pratyāyanām ... astamastakaniviṣṭakaraḥ karoti* are used in the

क्षिप्योक्तिः समासोक्तिरित्येतावती समासोक्तिः। समासे सत्यपि अन्यप्रतीतिमुद्दिश्य अन्यस्योक्तिरन्योक्तिरिति तयोर्भेदः। § 105 14

एवमाधिकारिकद्विविधप्रासङ्गिकभेदात् त्रिविधस्यापि त्रैविध्यमाह— § 106

…15 प्रख्यातोत्पाद्यमिश्रत्वभेदात् त्रेधापि तत् त्रिधा।
प्रख्यातमितिहासादेरुत्पाद्यं कविकल्पितम्॥ १५॥
§ 108

…16ab मिश्रं च संकरान्नान्तो दिव्यमर्त्यादिभेदतः। § 109

इति निगदव्याख्यानम्। § 110

तत् त्रेधापि पुनस्त्रेधेत्युक्तम्। तत्त्रैधमेवंविधमित्याह आधिकारिकेति। इतिवृत्तं प्रथमं त्रिधा आधिकारिक-द्विविधप्रासङ्गिकभेदात्। पश्चादपि प्रख्यातम्, उत्पाद्यम्, मिश्रमिति त्रिधेत्यर्थः। पाश्चात्यत्रैधं विवृतं प्रख्यातमितिहासादेरिति। इतिहासात् प्रख्यातकथातः प्रख्यातम्, लोकतः प्रख्यातमिति प्रख्यातमनेकविधम्। यत्रेतिवृत्तं कविबुद्ध्यैव कल्प्यते तदुत्पाद्यम्। यत्र प्रख्यातोत्पाद्ययोः संमिश्रणान्मिश्रत्वं भवति तन्मिश्रमितिवृत्तम्। दिव्यमर्त्यादिभेदतस्त्वितिवृत्तभेदस्य न पर्यवसानमित्याह नान्त इति। किंचिदितिवृत्तं शुद्धदिव्यं, किंचिच्छुद्धमर्त्यं, किंचिद्दिव्यमर्त्यमित्येवंविधत्वादनन्त इत्यर्थः। निगदव्याख्यानमिति। यत्र पाठ एव व्याख्यानं नान्यत् तिरोहितं किंचित् तन्निगदव्याख्यानमिति। § 111

---

context of sunset and with reference to the *utprekṣā* of the promise being made by the sun to the *saroruhiṇī*, yet the idea of the king's departure at the appointed time to meet Sāgarikā (who was expected to come in the guise of Vāsavadattā to *mādhavīlatāmaṇḍapa* ) and of the appropriate gesture of making the king's promise by putting his hand on his head (*astamastakaniviṣṭakara*)—this idea—may be conveyed, because of some similarity of situation, (though here all the adjectives cannot be applied in the case of the second meaning) and thus the verse is perhaps intended to be understood as an example of *anyokti*. This explanation is only my guess. Otherwise the application of the illustration in the context is not very clear.

४ रान्नान्तो ] *nāntaḥ* is confirmed by *Laghuṭīkā*. *tābhyām* (given in the N.S.P.) cannot be construed with the next expression. See Prof. Raghavan's work on Ś.P. (१९६३), p. ६०१.

५ म् ] N.S.P. -*vyākhyātam*.

९ तः ] See Note १८२ to *L.Ṭ.*

तस्येतिवृत्तस्य किं फलमित्याह— § 112

...16cd **कार्यं त्रिवर्गस्तच्छुद्धमेकानेकानुबन्धि च॥ १६॥**
§ 113

धर्मार्थकामाः फलम्। तच्च शुद्धमेकैकमेकानुबन्धं द्व्यनुबन्धं वा। § 114
अनेकशब्दस्य एकस्मादन्यद् अनेकमिति व्युत्पत्तिमङ्गीकृत्याप्याह द्वयनुबन्धं वेति। अर्थकामसहितो धर्मः कार्यम्। धर्मकामसहितोऽर्थः कार्थम्। धर्मार्थसहितः कामः कार्यमिति नेयम्। § 115

तत्साधनं व्युत्पादयति— § 116

...17ab **स्वल्पोद्दिष्टस्तु तद्धेतुर्बीजं विस्तार्यनेकधा।** § 117

स्तोकोद्दिष्टः कार्यसाधकः परस्तादनेकप्रकारं विस्तारी हेतुविशेषो बीजवद् बीजम्। यथा रत्नावल्यां वत्सराजस्य रत्नावलीप्राप्तिहेतुरनुकूलदैवो यौगंधरायणव्यापारो विष्कम्भके न्यस्तः —
**यौगंधरायणः** कः संदेहः।
*इत्यादिना प्रारम्भेऽस्मिन् स्वामिनो वृद्धिहेतौ इत्यन्तेन] § 118
यथा च वेणीसंहारे द्रौपदीकेशसंयमनहेतुर्भीमक्रोधोपचितो युधिष्ठिरोत्साहो बीजमिति। तच्च महाकार्यावान्तरकार्यहेतुभेदादनेकप्रकारमिति। § 119

उद्देशगतमल्पत्वमिति दर्शयति स्तोकोद्दिष्टस्त्विति। बीजवद् बीजमिति बीजशब्दस्य गौणतामाह। § 120

तत्र अवान्तरबीजस्य संज्ञान्तरमाह— § 121

...17cd **अवान्तरार्थविच्छेदे बिन्दुरच्छेदकारणम्॥ १७॥**
§ 122

यथा रत्नावल्यामवान्तरप्रयोजनानङ्गपूजापरिसमाप्तौ कथार्थविच्छेदे सत्यनन्तरकार्यहेतुः—
उदयनस्येन्दोरिवोद्वीक्षते।

---

३ न्धं] N.S.P. *dvitryanubandhaṃ vā*.
३ कः] N.S.P. *purastād*.
५ स्तः] Bracketed portion is missing in A.T.A.
७ *] द्वीपादन्यस्माद् १।७ इति पठति
७ इत्यादिना] १।८
८ चितो] *-upacitayudhiṣṭhirotsāho* in N.S.P.
९ त्र] N.S.P. omits *tatra*.

**सागरिका** *श्रुत्वा सहर्षं परिवृत्य सस्पृहं पश्यन्ती*

*कहं एसो सो उदयणणरिंदो जस्स अहं तादेण दिण्णा।*

इत्यादि। बिन्दुर्जले तैलबिन्दुवत् प्रसारित्वात्। § 123

बिन्दुर्जले तैलबिन्दुवदिति बिन्दुशब्दोऽपि गौण इत्युक्तं भवति। कार्यार्थी कश्चित् कर्ता कमपि कार्यसाधकहेतुविशेषमवलम्ब्य हि व्याप्रियते। स चात्र परस्तादनेकधा विस्तारित्वात् प्रथमं बीजशब्दवाच्योऽभूत्। पश्चाद् बहुविधं प्रसारित्वाद् बिन्दुशब्दवाच्योऽभूत्। एवमुपर्यपि नेयमिति। § 124

इदानीं पताकाद्यं प्रसङ्गाद् व्युत्क्रमोक्तं क्रमार्थमुपसंहरन्नाह— § 125 16

...18 बीजबिन्दुपताकाख्यप्रकरीकार्यलक्षणाः।
अर्थप्रकृतयः पञ्च ता एताः परिकीर्तिताः॥ १८॥
§ 127

अर्थप्रकृतयः = प्रयोजनसिद्धिहेतवः। § 128

ननु यद्यप्युपसंहारः क्रियते तथाप्युक्तस्य पुनर्वचनमनुचितमिव। अत्रत्यमेव सक्रमं वचनमिति चेत् तर्हि व्युत्क्रमत्वात् पूर्वं तन्न वक्तव्यम्। तत्राह इदानीमिति। अर्थप्रकृतयः प्रयोजनसिद्धिहेतव इति। ननु बीजबिन्दुपताकाख्यप्रकरीकार्यलक्षणाः खलु पञ्चार्थप्रकृतय उक्ताः। अर्थप्रकृतयश्च प्रयोजनसिद्धिहेतव इति व्याख्यातम्। तेन कार्यस्यैकस्यैव प्रयोजनसिद्धिहेतुत्वं प्रयोजनत्वं चोक्तमिति प्रतिभाति। तच्चानुपपन्नम् आत्माश्रयप्रसङ्गात्। उच्यते। पूर्वेषां प्रयोजनार्थमुपसंहारः [कार्यमिति] कार्यलक्षणसिद्धिः। तस्यैव

---

२ श्रुत्वा] *saharṣaṃ parivṛtya saspṛhaṃ paśyantī* is missing in N.S.P.

३ *] 'कथमेष स उदयननरेन्द्रो यस्याहं तातेन दत्ता।' इति च्छाया.

३ *] रत्ना० पृ० ४०

६ र्ता] T.MS. omits *kartā*, whereas all others read it.

६ मेव] MSS. read *saṃkramam*. Tri.MS. seems to skip over some lines here.

११ संहारः] Gr. MS. reads *pūrveṣāṃ prayojanārthatvam upasaṃhāraḥ kāryalakṣaṇasiddhiḥ*. M.G.T. reads *sarveṣāṃ prayojanārtham upasaṃhāraḥ. kāryalakṣaṇasiddhiḥ. tasyaiva prayojanatvam. mūḍhasyaiva rūḍhasyaiva kāryasya prayojanatvam.* T.MS. reads *pūrveṣāṃ prayojanārtham upasaṃhārakāryalakṣaṇasiddhiḥ*. The sentence given in the text is my own surmise.

[यौगिकस्य] प्रयोजनं प्रति हेतुत्वम्। शुद्धस्यैव [रूढस्यैव] हि कार्यस्य प्रयोजनत्वम्। ततः क्वात्माश्रयः। एकस्यैव हेतुहेतुमत्त्वानुक्तेरिति। § 129

अन्यदवस्थापञ्चकमाह— § 130

१ स्य] Gr.MS. reads *śuddhasyaiva ca* and T.MS. *śuddhasyaiva hi*- The *kārya* of the *arthaprakṛti*s is connected with the *nirvahaṇasaṃdhi*. Cf.: arthaprakṛtayaḥ pañca pañcāvasthāsamanvitāḥ | yathāsaṃkhyena jāyante mukhādyāḥ pañca saṃdhayaḥ || (*DR*, I. २२–३) and bījavanto mukhādyarthāḥ viprakīrṇā yathāyatham | aikārthyam upanīyante yatra nirvahaṇaṃ hi tat || (*DR*, I. ४८–९). Bhaṭṭanṛsiṃha's comments here amount to saying that the *kārya* of the *arthaprakṛti*s is not the same as the *kārya* of the *kāryaṃ trivargaḥ*. The latter is explained by Dhanika as *phalam*, and the former refers (on account of the derivation as *kāryate = upasaṃhāraṃ prāpyate phalārtham iti kāryam*) to the situation where the items of *bīja, bindu*, etc. are carried out properly and brought to a successful completion in order to accomplish the purpose intended. Thus there is the difference between the *kārya* intended (i.e. *phalam = dharmārthakāmāḥ*), and the successful completion of the *bīja, bindu*, etc. (*pūrveṣāṃ prayojanārtham upasaṃhāraḥ*) for achieving the purpose. For a different interpretation of *kārya* see *Abhinavabhāratī*, vol. III, pp. १५ and १६. Also see *Nāṭyadarpaṇa* (G.O.S., १९५९), page ४२. The *artha* of *arthaprakṛti* is taken by Dhanika as *prayojana*, and *prakṛti* as *hetu* or *upāya*. Bhojarāja takes *artha* as *kathāśarīra* and *prakṛti* as *kāraṇa. arthaprakṛtayaḥ pañca kathādehasya hetavaḥ* is the half verse by Bhoja which is quoted by Bahurūpamiśra who follows him in this and in many other points. Kumārasvāmin notes the two interpretations thus: *arthaprakṛtayaḥ prayojanasiddhihetava iti kecit. kathāśarīrakāraṇānīti bhojarājādayaḥ*. (*Pratāparudrīya*, Balamanorama Press ed., १९५०, p. ७५). --- In essence Abhinava's interpretation of the *arthaprakṛti*s seems to be the same as that of Dhanika. See the Introduction for a discussion on this. See *Abhinavabhāratī*, vol. III, page १२—*yatra* (*tatra*?) *arthaḥ = phalam, tasya prakṛtaya upāyāḥ; phalahetava ity arthaḥ*. For a further explanation of the point see *Locana* with *Bālapriyā* (K.S.S., १९४०), page ३३९.

...19 अवस्थाः पञ्च कार्यस्य प्रारब्धस्य फलार्थिभिः।
आरम्भयत्नप्राप्त्याशानियताप्तिफलागमाः॥ १९॥ § 132

अर्थप्रकृतिव्यतिरिक्तं संप्रत्यवस्थापञ्चकमुच्यत इति दर्शयति अन्यदिति। § 133

यथोद्देशं लक्षणमाह— § 134

...20ab औत्सुक्यमात्रमारम्भः फललाभाय भूयसे। § 135

इदमहं संपादयामि इत्यध्यवसायमात्रमारम्भ इत्युच्यते। यथा रत्नाव-
ल्याम्— 17

प्रारम्भेऽस्मिन् स्वामिनो वृद्धिहेतौ दैवे चेत्थं
दत्तहस्तावलम्बे।* § 137

इत्यादिना सचिवायत्तसिद्धेर्वत्सराजस्य कार्यारम्भो यौगंधरायणमुखेन दर्शितः। § 138

कार्यसिद्धिहेतोः प्रयत्नादन्यः किमारम्भो नामावस्थान्तरमस्ति। तत्राह इदमहमिति। इदमहं संपादयामीति मनसा संकल्प्य हि कश्चित् कार्यार्थं व्याप्रियते। तस्मात् स संकल्प एव प्रयत्नपूर्वभावी कार्यारम्भ इत्युच्यते। तद्दर्शितम् औत्सुक्यमात्रमिति। अत एव हि कार्यसाधनेच्छामात्रमाद्यप्रवृत्तिरित्युच्यते इति। ननु फलभोक्तुर्वत्सराजस्यैव कार्यारम्भेण भवितव्यम्। किमत्र यौगंधरायणेन। तत्राह सचिवायत्तसिद्धेरिति। यथा यजमानेन वृतानामृत्विजां व्यापारो यजमानस्य फलहेतुर्भवति तद्वत् वत्सराजसचिवव्यापारोऽपि वत्सराजस्य व्यापारो भवति। तदायत्तसिद्धित्वात् तस्येति। § 139

अथ *प्रयत्नः*— § 140

...20cd प्रयत्नस्तु तदप्राप्तौ व्यापारोऽतित्वरान्वितः॥ २०॥
§ 141

---

५ *] १।८

११ हि] M.G.T. reads *kāryasādhake kasyecchāmātram*. Gr.MS. reads *kāryasādhakasyecchāmātra* (ṃ?) *tv ādyā prakṛtir ity ucyate iti*.

१५ स्य] Tri.MS. which has skipped over some lines before (see Note ४१) starts again here, and reads *vyāpārasyaiva*.

तस्य फलस्याप्राप्तौ सत्यामुपाययोजनादिरूपश्चेष्टाविशेषः प्रयत्नः। यथा रत्नावल्यामालेख्याभिलेखनादिर्वत्सराजसमागमोपायः—

**सागरिकः** *तहवि मे णत्थि अण्णो दंसणोवाओ त्ति जहतह आलिहिअ जहासमीहिअं करिस्सं।*

इत्यादिना प्रतिपादितः। § 142

*प्राप्त्याशा*माह— § 143

## ...21ab उपायापायशङ्काभ्यां प्राप्त्याशा प्राप्तिसंभवः। § 144

18 उपायस्यापायशङ्कायाश्च भावादनिर्धारितैकान्ता फलप्राप्तिः प्राप्त्याशा। यथा रत्नावल्यां तृतीयेऽङ्के वेषपरिवर्ताभिसरणादौ समागमोपायस्य वासवदत्तालक्षणापायशङ्कायाश्च—*एवं जदि अआलवादावली विअ आअच्छिअ अण्णदो ण णइस्सदि वासवदत्ता। इत्यादिना दर्शितत्वादनिर्धारितैकान्ता सागरिकासमागमप्राप्तिरुक्त। § 145

उपायापायशङ्काभ्यामित्यत्र शङ्कापदमुत्तरत्रैव [अन्वेति] न पूर्वत्रेति दर्शयति उपायस्यापायशङ्कायाश्च भावादिति। § 146

*नियताप्ति*माह— § 147

## ...21cd अपायाभावतः प्राप्तिर्नियताप्तिः सुनिश्चिता॥ २१॥ § 148

अपायाभावादवधारितैकान्ता फलप्राप्तिर्नियताप्तिरिति। यथा रत्नावल्याम्—

**विदूषकः** *सागरिका उण दुक्करं जीविस्सदि।*

---

१ स्याप्राप्तौ] N.S.P. omits *satyām*.
२ *] 'तथापि मे नास्त्यन्यो दर्शनोपाय इति यथातथालिख्य यथासमीहितं करिष्यामि।' इति च्छाया.
२ त्थि] There are different readings in the edition of the *Ratnā:alī* to which I had access.
३ *] रत्ना॰ पृ॰ ४६
४ तृतीयेऽङ्के] पृ॰ १२९
४ स्य] N.S.P. *samāgamopāye sati,* and … *-pāyaśaṇkāyā evaṃ.*
५ *] 'एवं यदि अकालवातावलीवागत्यान्यतो न नेष्यति वासवदत्ता।' इति च्छाया.
७ निर्धारितैकान्ता] N.S.P. omits *sāgarikā*.
५ *] 'सागरिका पुनः दुष्करं जीविष्यति।' इति च्छाया.
५ रं] The edition of the *Ratnā:alī* to which I had access has different readings here.
५ *] पृ॰ १२४

इत्युपक्रम्य,

*किं ण उपायं चिंतेसि।

इत्यनन्तरम्,

राजा वयस्य, देवीप्रसादनं मुक्त्वा नान्यमत्रोपायं पश्यामि।*

इत्यनन्तराङ्कार्थबिन्दुनानेन देवीलक्षणापायस्य प्रसादनेन निवारणान्नियता फलप्राप्तिः सूचितेति। § 149

अर्थप्रकृतीनामिति। बीजादीनामर्थप्रकृतीनामवस्थाभिः पञ्चभिर्योगात् य- 19
थासंख्यं संधयो भवन्ति। बीजस्यारम्भेणान्वयो मुखसंधिः। बिन्दोः प्रयत्नेनान्वयः प्रतिमुखसंधिः। पताकायाः प्राप्त्याशयान्वयो गर्भसंधिः। यद्यप्यनियतैव पताका, तथापि यदा पताका भवति तदानीमवस्थापर्वणा प्राप्त्याशया योगात् तन्निबन्धनगर्भसंधिर्भवति। यदा तु सा नास्ति तदानीं गर्भसंधिः केवला प्राप्त्याशा भवतीति। एवमुपर्यपि नेयम्। § 150

*फलयोगमाह*— § 151

...22ab **समग्रफलसंपत्तिः फलयोगो यथोचिता।** § 152

यथा रत्नावल्यां रत्नावलीलाभात् चक्रवर्तित्वावाप्तिरिति। § 153

*संधिलक्षणमाह*— § 154

...22cd **अर्थप्रकृतयः पञ्च पञ्चावस्थासमन्विताः॥ २२॥** § 155

...23ab **यथासंख्येन जायन्ते मुखाद्याः पञ्च संधयः।** § 156

अर्थप्रकृतीनां पञ्चानां यथासंख्येनावस्थाभिः पञ्चभिर्योगाद्यथासंख्येनैव वक्ष्यमाणलक्षणा मुखाद्याः पञ्च संधयो जायन्ते। § 157

---

२ *] 'किं नोपायं चिन्तयसि।' इति च्छाया.
४ *] पृ० १२५
१० या] Gr.MS. and Tri.MS. read what is given in the text. T.MS. and M.G.T. read as *prāptyāśāyogāt*.
११ संधिः] This reading *garbhasaṃdhiḥ kevalā prāptyāśā bhavatīti* is found in M.G.T. Tri.MS. reads as *garbhasaṃdhiṃ kevalaprāptyāśā bhavatīti*. T.MS. and Gr.MS. seem to read *garbhasaṃdhiṃ vinā*. The reading *garbhasaṃdhiḥ kevalā prāptyāśā bhavatīti* seems to me to be preferable. See the Introduction for a discussion on the *arthaprakṛti*s, *avasthā*s and *saṃdhi*s.
२ थोचिता] N.S.P. *yathoditā*.
३ लीलाभात्] N.S.P. *-lābhacakravartitva-*, etc.
५ थासंख्येनैव] N.S.P. *vakṣyamāṇā mukhādyāḥ*.

*संधिसामान्यलक्षण*माह— § 158

...23cd *अवान्तरार्थसंबन्धः संधिरेकान्वये सति॥ २३॥
§ 159

एकेन प्रयोजनेनान्वितानां कथांशानामवान्तरैकप्रयोजनसंबन्धः संधिः। § 160

यद्यपि रूपकेषु मुखाद्याः पञ्चापि संधयो भवन्ति, तथापि सामान्यत एवेतिवृत्तमात्रगामिनि ज्ञाते हि संधौ संधिविशेषो ज्ञायते। तेन संधिसामान्यलक्षणं संप्रति ब्रूत इत्याह संधिसामान्यलक्षणमाहेति। § 161

के पुनस्ते *संधयः*— § 162

...24ab मुखप्रतिमुखे गर्भः सावमर्शोपसंहृतिः। § 163

यथोद्देशं लक्षणमाह— § 164

...24cd मुखं बीजसमुत्पत्तिर्नानार्थरससंभवा॥ २४॥ § 165
20

...25ab अङ्गानि द्वादशैतस्य बीजारम्भसमन्वयात्। § 166

बीजानां समुत्पत्तिरनेकप्रकारप्रयोजनस्य रसस्य हेतुर्मुखसंधिरिति व्याख्येयम्। तेनात्रिवर्गफले प्रहसनादौ रसोत्पत्तिहेतोरेव बीजत्वमिति। अस्य च बीजारम्भार्थयुक्तानि द्वादशाङ्गानि भवन्ति। § 167

बीजानां समुत्पत्तिरिति। सूत्रे नानाविधस्यार्थस्य रसस्य च मुखसंधिप्रयोजकत्वमिति प्रतिभाति। तदव्यापित्वादयुक्तम्। तेन तत् सूत्रं नानाविधप्रयोजनस्य रसस्य हेतुर्मुखसंधिरिति रसमात्रस्यैव मुखसंधिप्रयोजकत्वकथनपरतया व्याख्येयम्। तथा व्याख्याने व्यापकत्वं भवतीत्याह तेनेति। तेन व्याख्यानेन अर्थेन=त्रिवर्गेण शून्ये प्रहसनादावपि मुखसंधिलक्षणं व्यापकं भवति। न हि मुखनिर्वहणसंधिशून्यमितिवृत्तं नाम भवति। बीजारम्भार्थयुक्तानीति। बीजेन, आरम्भेण, अर्थेन = प्रयोजनेन च संबद्धानीत्यर्थः। § 168

२ *] N.S.P. *antaraikārthasaṃbandhaḥ.*

४ वा] ‘संश्रया’ इति पाठः.

तान्याह— § 169

...25cd उपक्षेपः परिकरः परिन्यासो विलोभनम्॥ २५॥
§ 170

...26 युक्तिः प्राप्तिः समाधानं विधानं परिभावना।
उद्भेदभेदकरणान्यन्वर्थान्यथ लक्षणम्॥ २६॥ § 172

एतेषां स्वसंज्ञाव्याख्यातानामपि सुखार्थं लक्षणं क्रियते— § 173

...27a बीजन्यास उपक्षेपस् § 174

यथा रत्नावल्याम्—

*नेपथ्ये*

द्वीपादन्यस्मादपि मध्यादपि जलनिधेर्दिशोऽप्यन्तात्। आनीय झटिति 21
घटयति विधिरभिमतमभिमुखीभूतः॥* § 176 &

इत्यादिना यौगंधरायणो वत्सराजस्य सत्नावलीप्राप्तिहेतुभूतमनुकूलदैवं स्वव्यापारं बीजत्वेनोपक्षिप्तवानित्युपक्षेपः। § 177

*परिकर*माह— § 178

...27b तद्बाहुल्यं परिक्रिया। § 179

यथा तत्रैव—

अन्यथा क्व सिद्धादेशप्रत्ययप्रार्थितायाः सिंहलेश्वरदुहितुः समुद्रे प्रवहणभङ्गमग्नोत्थितायाः फलकासादनम्। इत्यादिना

सर्वथा स्पृशन्ति स्वामिनमभ्युदयाः इत्यन्तेन बीजोत्पत्तेरेव बहुकरणात् परिकरः। § 180

*परिन्यास*माह— § 181

---

६ *] १।७

६ याः] पृ० १२

...27c **तन्निष्पत्तिः परिन्यासो** § 182

यथा तत्रैव—

प्रारम्भेऽस्मिन् स्वामिनो वृद्धिहेतौ दैवे चेत्थं दत्तहस्तावलम्बे।
सिद्धेर्भ्रान्तिर्नास्ति सत्यं तथापि स्वेच्छाकारी भीत एवास्मि
भर्तुः॥* § 185

इत्यनेन यौगंधरायणः स्वव्यापारस्य दैवयोगात् निष्पत्तिमुक्तवानिति परिन्यासः। § 186

*विलोभन*माह— § 187

...27d **गुणाख्यानाद् विलोभनम्॥ २७॥** § 188

यथा रत्नावल्याम्—

अस्तापास्तसमस्तभासि नभसः पारं प्रयाते रवा- वास्थानीं
समये समं नृपजनः सायंतने संपतन्।
संप्रत्येष सरोरुहद्युतिमुषः पादांस्तवासेवितुं प्रीत्युत्कर्षकृतो
दृशामुदयनस्येन्दोरिवोद्वीक्षते॥* § 191

22 इति वैतालिकमुखेन चन्द्रतुल्यवत्सराजगुणवर्णनया सागरिकायाः समागमहेत्वनुरागबीजानुगुण्येनैव विलोभनाद् विलोभनमिति। § 192

यथा च वेणीसंहारे—

मन्थायस्तार्णवाम्भः प्लुतकुहरवलन्मन्दरध्वानधीरः
कोणाघातेषु गर्जत्प्रलयघनघटान्योन्यसंघट्टचण्डः।
कृष्णाक्रोधाग्रदूतः कुरुकुलनिधनोत्पातनिर्घातवातः
केनास्मत्सिंहनादप्रतिरसितसखो दुन्दुभिस्ताडितोऽयम्॥*
§ 195

इत्यादिना यशोदुन्दुभिः इत्यन्तेन द्रौपद्या विलोभनाद् विलोभनमिति। § 196

अथ *युक्तिः*— § 197

---

४ *] रत्ना° १।८
५ योगात्] N.S.P. *svavyāpāradaivayor niṣpattim*, etc.
५ कृतो] A.T.A. *diśām*.
५ *] १।२४
९ धीरः] A.T.A. *-pratikuhara-*, etc.
१० दूतः] A.T.A. *kuruśata* and *nirghātapātaḥ*.
१० *] १।२२
११ इत्यादिना] १।२५

...28a **संप्रधारणमर्थानां युक्तिः** § 198

यथा रत्नावल्याम्—

मया पि चैनां देवीहस्ते सबहुमानं निक्षिपता युक्तमेवानुष्ठितम्। कथितं च मया यथा बाभ्रव्यः कञ्चुकी सिंहलेश्वरामात्येन वसुभूतिना सह कथंकथमपि समुद्रादुत्तीर्य कोशलोच्छित्तये गतेन रुमण्वता घटितः।* इत्यनेन सागरिकाया अन्तः पुरस्थाया वत्सराजस्य सुखेन दर्शनादिप्रयोजनावधारणाद् बाभ्रव्यसिंहलेश्वरामात्ययोश्च नायकसमागमहेतुत्वेनावधारणाद् युक्तिरिति। § 199

अथ *प्राप्तिः*— § 200

...28b **प्राप्तिः सुखागमः।** § 201
23

यथा वेणीसंहारे—

**चेटी** *भट्टिणि, परिकुविदो विअ कुमारो लक्खीअदि।*

इत्युपक्रमे,

मथ्नामि कौरवशतं समरे न कोपाद् दुःशासनस्य रुधिरं न पिबाम्युरस्तः। संचूर्णयामि गदया न सुयोधनोरू संधिं करोतु भवतां नृपतिः पणेन॥* § 203&

**द्रौपदी** *श्रुत्वा सहर्षम्*

*नाह, अस्सुदपुव्वं खु ईदिसं पियवअणं। ता पुणो पुणो भण।

इत्यनेन भीमक्रोधबीजान्वयेनैव सुखप्राप्त्या द्रौपद्याः प्राप्तिरिति। § 204

यथा च रत्नावल्याम्—

**सागरिका** *श्रुत्वा सहर्षं परिवृत्य सस्पृहं पश्यन्ती*

*कधं अअं सो राआ उदयणो जस्स अहं तादेण दिण्णा। ता परप्पेसणदूसिदं वि मे जीविदं एदस्स दंसणेण बहुमदं संजादं।*

---

५ तेन] N.S.P. *gatasya rumaṇvato.*

५ *] पृ॰ १२

७ योश्च] N.S.P. -*amātyayoḥ ... hetuprayojanatvena.*

**भीमः** ३ वेणीसंहारे] A.T.A. gives here the example of *Ratnā :alī* first and then that of *Veṇīsaṃhāra.*

४ *] 'भर्त्रि, परिकुपित इव कुमारो लक्ष्यते।' इति च्छाया.

४ *] पृ॰ १९

६ *] १।१५

६ *] 'नाथ, अश्रुतपूर्वं खलु ईदृशं प्रियवचनम्। तत् पुनः पुनर्भण।' इति च्छाया.

६ खु] N.S.P. *khu edaṃ vaaṇaṃ.*

इति सागरिकायाः सुखागमात् प्राप्तिरिति। § 205

अथ *समाधानम्*— § 206

## ...28c बीजागमः समाधानं § 207

यथा रत्नावल्याम्—

**वासवदत्ता** *तेण हि उअणेहि मे पूआणिमित्ताइं उवअरणाइं।

**सागरिका** *भट्टिणि, एदं सव्वं सज्जं।

24 **वासवदत्ता** *निरूप्यात्मगतम्*

*अहो पमादो परिअणस्स। जस्स एव्व दंसणपहादो पअत्तेण रक्खीअदि तस्स एव्व अज्ज कहं दिट्ठिगोअरं आअदा। भोदु। एव्वं दाव। *प्रकाशम्* हञ्जे सागरिए, *पूजोवअरणं कंचणमालाहत्थे समप्पेहि। कीस तुमं अज्ज पराहीणे परिअणे मअणूसवे सारिअं उज्झिअ इहागदा। ता तहिं एव्व गच्छ।*

इत्युपक्रमे,

**सागरिका** *स्वगतम्*

*सारिआ दाव मए सुसंगदाए हत्थे समप्पिदा। पेक्खिदुं च मे कुतूहलं। ता अलक्खिआ पेक्खिस्सं।

इत्यनेन वासवदत्ताया रत्नावलीवत्सराजयोर्दर्शनप्रतीकारात् सारिकायाः सुसंगताया हस्ते समर्पणेनालक्षितप्रेक्षणेन च वत्सराजसमागमहेतोर्बीजस्योपादानात् समाधानमिति। § 208

यथा च वेणीसंहारे—

---

६ *] 'कथमयं स राजोदयनो यस्याहं तातेन दत्ता। तत् परप्रेषणदूषितमपि मे जीवितमेतस्य दर्शनेन बहुमतं संजातम्।' इति च्छाया.
६ *] पृ॰ ४०
३ *] 'तेन ह्युपनय मे पूजानिमित्तानि उपकरणानि।' इति च्छाया.
३ पूआणिमित्ताइं] In N.S.P. *pūāṇimittāiṃ* is omitted.
४ *] 'भर्त्रि, एतत् सर्वं सज्जम्।' इति च्छाया.
७ *] 'अहो प्रमादः परिजनस्य। यस्यैव दर्शनपथात् प्रयत्नेन रक्ष्यते तस्यैव अद्य कथं दृष्टिगोचरमागता। भवतु। एवं तावत्। चेटि सागरिके, पूजोपकरणं काञ्चनमालाहस्ते समर्पय। कथं त्वमद्य पराधीने परिजने मदनोत्सवे सारिकां मुक्त्वेहागता। तस्मात् तत्रैव गच्छ।' इति च्छाया.
८ स्स] N.S.P. *tassa jjeva.*
९ *] *pūjovaaraṇaṃ kaṃcaṇamālāhatthe samappehi* is missing in N.S.P.
१० वे] N.S.P. *sāriaṃ mottūṇa*, etc.
११ *] पृ॰ ३२
१४ *] 'सारिका तावन्मया सुसंगताया हस्ते समर्पिता। प्रेक्षितुं च मे कुतूहलम्। तदलक्षिता प्रेक्षिष्ये।' इति च्छाया.
१७ सारिकायाः] N.S.P. *susaṃgatārpaṇena*, etc.

भीमः भवति पाञ्चालराजतनये, *श्रूयतामचिरेणैव कालेन—

चञ्चद्भुजभ्रमितचण्डगदाभिघातसंचूर्णितोरुयुगलस्य सुयोधनस्य। स्त्यानावनद्धघनशोणितशोणपाणिरुत्तंसयिष्यति कचांस्तव देवि भीमः॥* § 210&

इत्यनेन वेणीसंहारहेतोः क्रोधबीजस्य पुनरुपादानात् समाधानम्। § 211

अथ *विधानम्*— § 212

...28d **विधानं सुखदुःखकृत्॥ २८॥** § 213

यथा मालतीमाधवे प्रथमेऽङ्के—

*यान्त्या मुहुर्वलितकंधरमाननं त- दावृत्तवृन्तशतपत्रनिभं वहन्त्या।
दिग्धोऽमृतेन च विषेण च पक्ष्मलाक्ष्या गाढं निखात
इव मे हृदये कटाक्षः॥ § 215&

यद्विस्मयस्तिमितमस्तमितान्यभावमानन्दमन्दममृतप्लवनादिवाभूत्। तत्संनिधौ तदधुना हृदयं मदीयमङ्गारचुम्बितमिव व्यथमानमास्ते॥* § 216&

इत्यनेन मालत्यवलोकनस्यानुरागस्य समागमहेतोर्बीजानुगुण्येनैव माधवस्य सुखदुःखकारित्वाद् विधानमिति। § 217

यथा च वेणीसंहारे—

**द्रौपदी** *णाध, पुणोवि तुम्मेहिं अहं आअच्छिअ समासासिदव्वा।

भीमः ननु पाञ्चालराजतनये, किमद्याप्यलीकाश्वासनया।

भूयः परिभवक्लान्तिलज्जाविधुरिताननम्। अनिः शेषितकौरव्यं न पश्यसि वृकोदरम्॥* § 219&

---

१९ *] A.T.A. *śrūyatām ayam,* etc.
२ *] १।२१
५ *] A.T.A. omits the verse *yāntyā muhur valita-,* etc.
५ *] १।३२
५ *] 'नाथ, पुनरपि त्वयाहमागत्य समाश्वासयितव्या।' इति च्छाया.
५ भूयः] A.T.A. *-paribhavakṣānti.*
५ *] १।२६

इति संग्रामस्य सुखदुःखहेतुत्वाद् विधानमिति। § 220

अथ *परिभावना*— § 221

## ...29a परिभावोऽद्भुतावेशः § 222

यथा रत्नावल्याम्—

**सागरिका** *दृष्ट्वा सविस्मयम्*

*कधं पच्चक्खो एव्व भयवं अणंगो पूअं पडिच्छदि। अम्हाणं तादस्स
26 अंतेउरे चित्तगदो एव्व। अहंपि इव ट्ठिदा एव्व णं पूजइस्सं।*

इत्यनेन वत्सराजस्यानङ्गरूपतयापह्नवादनङ्गस्य च प्रत्यक्षस्य पूजाग्रहणस्य लोकोत्तरत्वादद्भुतरसावेशः परिभावना। § 223

यथा च वेणीसंहारे—

**द्रौपदी** *किं दाणिं एसो पलअजलधरत्थणिदमंसलो खणे खणे समरदुंदुभी ताडीअदि त्ति।*

इति लोकोत्तरसमरदुन्दुभिध्वनेर्विस्मयरसावेशाद् द्रौपद्याः परिभावना। § 224

अथोद्भेदः— § 225

## ...29b अद्भेदो गूढभेदनम्। § 226

यथा रत्नावल्यां वत्सराजस्य कुसुमायुधव्यपदेशगूढस्य वैतालिकवचसा अस्तापास्त— इत्यादिना उदयनस्य— इत्यन्तेन बीजानुगुण्येनैवोद्भेदनादुद्भेदः। § 227

यथा च वेणीसंहारे— आर्य, किमिदानीमध्यवस्यति गुरुः। इत्युपक्रमे *नेपथ्ये*

यत् सत्यव्रतभङ्गभीरुमनसा यत्नेन मन्दीकृतं यद् विस्मर्तुमपीहितं
शमवता शान्तिं कुलस्येच्छता। तद् द्यूतारणिसंभृतं नृपव-
धूकेशाम्बराकर्षणैः क्रोधज्योतिरिदं महत् कुरुवने यौ-
धिष्ठिरं जृम्भते॥* § 229&

---

२ रिभावोऽद्भुतावेशः ] A.T.A. reads: *adbhutāvedhaḥ, rasāvedhaḥ,* and *rasāvedhād.*
५ *] 'कथं प्रत्यक्ष एव भगवाननङ्गः पूजां प्रतीच्छति। अस्माकं तातस्य गृहे चित्रगत एव। अहमपीहास्थितैवैनं पूजयिष्यामि।' इति च्छाया.
६ *] पृ° ३७
९ *] 'किमिदानीमेप प्रलयजलधरस्तनितमांसलः क्षणे क्षणे समरदुन्दुभिस्ताड्यते।' इति च्छाया.
१० *] पृ° ३०
४ सा] १।२४
० स्य] N.S.P. omits *prasaram,* and reads in the remark as *krodhasyodbhedaḥ.*
९ णिसंभृतं] N.S.P. *nṛpasutā-.*
९ *] १।२४

भीमः *श्रुत्वा सहर्षम्*

जृम्भतां जृम्भतां संप्रत्यप्रतिहतप्रसरमार्यस्य क्रोधज्योतिः।*

इत्यनेन छन्नस्य द्रौपदीकेशसंयमनहेतोर्युधिष्ठिरक्रोधबीजस्योद्भेदादुद्भेदः।
§ 230

अथ *करणम्*— § 231

...29c करणं प्रकृतारम्भो § 232

यथा रत्नावल्याम्—

**सागरिका** **णमो दे कुसुमाउह, ता अमोहदंसणो मे होहि त्ति दिट्ठिआ दिट्ठं जं पेक्खिदव्वं। ता जाव ण को वि मं पेक्खइ ताव इदो गमिस्सं।*

इत्यनेनान्तराङ्कप्रकृतनिर्विघ्नदर्शनारम्भणात् करणम्। § 233

यथा च वेणीसंहारे—

**भीमः** तत् पाञ्चालि, गच्छामो वयमिदानीं कुरुकुलक्षयाय।

**सहदेवः** आर्य, गच्छाम इदानीं गुरुजनानुज्ञाता विक्रममाचरितुम्।*

इत्यनेनानन्तराङ्कप्रस्तूयमानसंग्रामारम्भकरणात् करणमिति। सर्वत्र चेहोद्देश-प्रतिनिर्देशवैषम्यं क्रियाक्रमस्याविवक्षितत्वादिति। § 234

अथ *भेदः*— § 235

...29d भेदः प्रोत्साहनाद् भवेत्॥ २९॥ § 236

यथा वेणीसंहारे—

**द्रौपदी** **णाह, मा क्खु जण्णसेणीपरिभवुद्दीविदकोवा अणवेक्खिदसरीरा परिक्कमिस्सध। जदो अप्पमत्त संचरणीयाइं सुणीयंति रिउबलाइं।

---

∘ *] पृ° २९

∘ *] N.S.P. omits Sāgarikā.

∘ *] 'नमस्ते कुसुमायुध, तदमोघदर्शनो मे भविष्यसीति दिष्ट्या दृष्टं यत् प्रेक्षितव्यम्। तद्यावन्न कोऽपि मां प्रेक्षते तावदितो गमिष्यामि।' इति च्छाया.

∘ ठिआ] N.S.P. omits *diṭṭhiā*, and reads *bhavissasi* for *hohi*.

∘ *] पृ° ३८

∘ नानुज्ञाता] N.S.P. *vikramānurūpam*.

∘ *] पृ° ३१

∘ णात्] N.S.P. *ārambhaṇāt karaṇam iti*.

∘ त्र] See my paper on the *Daśarūpaka*, in *The Journal of the University of Gauhati*, १९६०, for a discussion on this line.

२ वेत्] N.S.P. *protsāhanā matā*, and Bahurūpamiśra *protsāhanā bhavet*.

भीमः अयि सुक्षत्रिये,

अन्योन्यास्फालभिन्नद्विपरुधिरवसासान्द्रमस्तिष्कपङ्के मग्नानां स्यन्द- 28
नानामुपरिकृतपदन्यासविक्रान्तपत्तौ। स्फीतासृक्पानगोष्ठीर-
सदशिवशिवातूर्यनृत्यत्कबन्धे संग्रामैकार्णवान्तःपयसि विच-
रितुं पण्डिताः पाण्डुपुत्राः॥* § 238&

इत्यनेन विषण्णाया द्रौपद्याः क्रोधोत्साहबीजानुगुण्येनैव प्रोत्साहनाद् भेद इति। § 239

एतानि च द्वादश मुखसंधेरङ्गानि बीजारम्भद्योतकानि साक्षात् पारंपर्येण वा विधेयानि। एतेषामुपक्षेपपरिकरपरिन्यासयुक्त्युद्भेदसमाधानानामवश्यंभावितेति। § 240

अथ साङ्गं *प्रतिमुखसंधि*माह— § 241

...30 लक्ष्यालक्ष्य इवोद्भेदस्तस्य प्रतिमुखं भवेत्।
*बिन्दुप्रयत्नानुगमादङ्गान्यस्य त्रयोदश॥ ३०॥ § 243

तस्य बीजस्य किंचिल्लक्ष्यः किंचिदलक्ष्य इवोद्भेदः प्रकाशनं तत् प्रतिमुखम्। यथा रत्नावल्यां द्वितीयेऽङ्के वत्सराजसागरिकासमागमहेतोरनुरागबीजस्य प्रथमाङ्कोपक्षिप्तस्य सुसंगताविदूषकाभ्यां ज्ञायमानतया किंचिल्लक्ष्यस्य वासवदत्तया च चित्रफलकवृत्तान्तेन किंचिदुन्नीयमानस्य दृश्यादृश्यरूपतयोद्भेदः प्रतिमुखसंधिरिति। § 244

वेणीसंहारेऽपि द्वितीयेऽङ्के भीष्मादिवधेन किंचिल्लक्ष्यस्य कर्णाद्यवधाद्यालक्ष्यस्य क्रोधबीजस्योद्भेदः। § 245

सहभृत्यगणं सबान्धवं सहमित्रं ससुतं सहानुजम्।
स्वबलेन निहन्ति संयुगे न चिरात् पाण्डुसुतः सुयोधनम्॥
§ 248

---

३ *] N.S.P. omits Draupadī.
३ *] ‘नाथ, मा खलु याज्ञसेनीपरिभवोद्दीपितकोपा अनवेक्षितशरीराः परिक्रमिष्यथ। यतोऽप्रमत्तसंचरणीयानि श्रूयन्ते रिपुबलानि।’ इति च्छाया.
२ ङ्के] A.T.A. *vasāmāṃsa*-.
२ *] १।२७
२ ङ्गानि] N.S.P. *mukhāṅgāni*.
२ क्ष्य] N.S.P. *lakṣyālakṣyatayodbhedaḥ*.
३ *] A.T.A. -*prayatnābhigamād*.
९ द्वितीयेऽङ्के] २।५

इत्यादिभिः

दुःशासनस्य हृदयक्षतजाम्बुपाने दुर्योधनस्य च यथा
गदयोरुभङ्गे।
तेजस्विनां समरमूर्धनि पाण्डवानां ज्ञेया जयद्रथवधेऽपि तथा
प्रतिज्ञा॥* § 251

इत्येवमादिभिश्च बलवतां पाण्डवानां वासुदेवसहायानां संग्रामल- 29
क्षणस्य बिन्दुभेदस्योद्भेदः प्रतिमुखसंधिरिति। § 252

अस्य च पूर्वाङ्कोपक्षिप्तबिन्दुरूपबीजप्रयत्नार्थानुगतानि त्रयोदशाङ्गानि भवन्ति। तान्याह— § 253

...31 विलासः परिसर्पश्च विधूतं शमनर्मणी।
नर्मद्युतिः प्रगमनं निरोधः पर्युपासनम्॥ ३१॥ § 255

...32ab *वज्रं पुष्पमुपन्यासो वर्णसंहार इत्यपि। § 256

यथोद्देशं लक्षणमाह— § 257

...32c *रत्यर्थेहा विलासः स्याद् § 258

यथा रत्नावल्याम्—

**सागरिका** *हिअअ, पसीद। किं इमिणा आआसमेत्तफलेण दुल्लहजणप्पत्थणाणुबन्धेण।

इत्युपक्रम्य,—

*तहावि तस्स णत्थि अण्णो दंसणोवाओ त्ति आलेक्खगदं त्तं जणं कदुअ जधासमीहिदं करिस्सं।

इत्येतैर्वत्सराजसमागमरतिं चित्रादिजन्यामप्युद्दिश्य सागरिकायाश्चेष्टाप्रयत्नोऽनुरागबीजानुगतो विलास इति। § 259

---

३ *] वे॰ सं॰ २।२८
४ मादिभिश्च] N.S.P. omits *balavatām*, etc. up to *bindubhedasya*.
४ द्युतिः] 'प्रगयणम्' इति पाठः.
५ *] A.T.A. *puṣpaṃ vajram*.
२ *] 'रत्युत्थेहा' इति पाठः.
३ *] 'हृदय, प्रसीद प्रसीद। किमनेनायासमात्रफलेन दुर्लभजनप्रार्थनानुबन्धेन।' इति च्छाया.
६ *] 'तथापि तस्य नास्त्यन्यो दर्शनोपाय इति आलेख्यगतं तं जनं कृत्वा यथासमीहितं करिष्यामि।' इति च्छाया.
६ हावि] In N.S.P. the order in this line is slightly different.

अथ *परिसर्पः*— § 260

...32d
30

## दृष्टनष्टानुसर्पणम्॥ ३२॥ § 261

## परिसर्पो § 262

यथा वेणीसंहारे —

**कञ्चुकी** योऽयमुद्यतेषु बलवत्सु, अथवा किं बलवत्सु, वासुदेवसहायेष्वरिष्वद्याप्यन्तः पुरसुखमनुभवति। इदमपरमयथातथं स्वामिनश्चेष्टितम्—

आशस्त्रग्रहणादकुण्ठपरशोस्तस्यापि जेता मुने- स्तापायास्य न पाण्डुसूनुभिरयं भीष्मः शरैः शायितः। प्रौढानेकधनुर्धरारिविजयश्रान्तस्य चैकाकिनो बालस्यायमरातिलूनधनुषः प्रीतोऽभिमन्योर्वधात्॥ § 264&

इति भीष्मादिवधेन दृष्टस्य कर्णाद्यवधाच्च अदृष्टस्य बलवतां वासुदेवसहायानां पाण्डवानां संग्रामलक्षणबिन्दुरूपविजयप्रयत्नान्वयेन। कञ्चुकिमुखेनानुसर्पणं परिसर्प इति। § 265

यथा च रत्नावल्यां सारिकावचनचित्रदर्शनाभ्यां सागरिकानुरागबीजस्य दृष्टनष्टस्य क्वासौ क्वासौ इत्यादिना वत्सराजेनानुसरणात् परिसर्प इति। § 266

अथ *विधूतम्*— § 267

...33a

## विधूतं स्यादरतिस् § 268

यथा रत्नावल्याम्—

**सागरिका** *सहि, अहिअं मे संतावो बाधेदि। *सुसंगत दीर्घिकातो नलिनीदलानि मृणालिकाश्चानीयास्या अङ्गे ददाति*

---

४ वेणीसंहारे] २।२
६ म्] N.S.P. omits *ceṣṭitam.*
९ इति] N.S.P. reads *ity anena bhīṣmādivadhe dṛṣṭasya abhimanyuvadhān naṣṭasya balavatāṃ pāṇḍavānāṃ vāsudevasahāyānāṃ saṃgrāmalakṣaṇabindubījaprayatnānvayena kañcukimukhe bījānusarpaṇaṃ parisarpa iti.*
९ च] This line is missing in A.T.A.

**सागरिका** *तानि क्षिपन्ती*

*सहि, अवणेहि एदाइं। किं अआरणे अत्ताणं आयासेसि ? णं भणामि—

31 दुल्लहजणाणुराओ लज्जा गरुई परव्वसो अप्पा। पिअसहि विसमं पेम्मं मरणं सरणं णवर एक्कं॥** § 270&

इत्यनेन सागरिकाया अनुरागबीजान्वयेन शीतोपचारविधूननाद् विधूतम्। § 271

यथा च वेणीसंहारे भानुमत्या दुःस्वप्नदर्शनेन दुर्योधनस्यानिष्टशङ्का पाण्डवविजयशङ्का चारतेः विधूननमिति। § 272

अथ *शमः*— § 273

...33b **तच्छमः शमः।** § 274

तस्या अरतेरुपशमः शमः। यथा रत्नावल्याम्—

**राजा** वयस्य, अनया लिखितोऽहमिति यत् सत्यमात्मन्यपि मे बहुमानस्तत् कथं न पश्यामि।*

इत्युपक्रमे—

**सागरिका** *आत्मगतम्*

*हिअअ, समस्सस। मणोरहो वि दे एत्तिअं भूमिं गदो।

इति किंचिदरत्युपशमात् शम इति। § 275

अथ *नर्म*— § 276

...33c **परिहासवचो नर्म** § 277

यथा रत्नावल्याम्—

**सुसंगता** *सहि, जस्स किदे तुमं आअदा सो अअं अग्गदो चिट्ठदि।

---

३ *] 'सखि, अधिकं मे संतापो बाधते।' इति च्छाया.
२ *] 'सखि, अपनयैतानि। किमकारण आत्मानमायासयसि ? ननु भणामि—दुर्लभजनानुरागो लज्जा गुर्वी परवश आत्मा। प्रियसखि विषमं प्रेम मरणं शरणं केवलमेकम्॥' इति च्छाया.
५ रिकाया] N.S.P. *bījānvayena.*
५ *] रत्ना० २।१
५ *] पृ० ५०
५ वेणीसंहारे] पृ० ४१—५१
५ त्या] N.S.P. *duḥkhapradarśanena.*
४ *] पृ० ७२
५ मे] N.S.P. *iti prakrame.*
७ *] 'हृदय, समाश्वसिहि। मनोरथोऽपि त एतावतीं भूमिं गतः।' इती च्छाया.
३ *] 'सखि, यस्य कृते त्वमागता सोऽयं पुरतस्तिष्ठति।' इति च्छाया.
३ अअं] N.S.P. *purado.*

**सागरिका** *सासूयम्*

*सुसंगदे, कस्स किदे अहं आअदा ?

**सुसंगता** *अइ अप्पसंकिदे, णं चित्तफलअस्स। ता गेण्ह एदं।* इत्यनेन बीजान्वितं परिहासवचनं नर्म। § 278

32 यथा च वेणीसंहारे—

*दुर्योधनश्चेटीहस्तादर्घपात्रमादाय देव्याः समर्पयति। पुनः*

**भानुमती** *अर्घं दत्त्वा*

*हला, उवणेहि मे कुसुमाइं जाव अवराणं वि देवाणं सवरिअं णिवत्तेमि*हस्तौ प्रसारयति। दुर्योधनः पुष्पाण्युपनयति। भानुमत्यास्तत्स्पर्शजातकम्पाया हस्तात् पुष्पाणि पतन्ति*

*इत्यनेन नर्मणा दुःस्वप्नदर्शनोपशमार्थं देवतापूजाविघ्नकारिणा बीजोद्घाटनात् परिहासस्य प्रतिमुखाङ्गत्वं युक्तमिति। § 279

ननु बीजाद्यन्वितं खल्वङ्गं भवति। इह च युधिष्ठिरोत्साहः द्रौपदीकेशसंयमनलक्षणस्य कार्यस्य बीजम्। न च भानुमतीदुःस्वप्नशान्तिपरिकरपुष्पपातरूपस्य परिहासस्य बीजादिसंबन्ध इति प्रतिमुखसंध्यङ्गत्वमयुक्तम्। तत्राह अनेन Gr.MS. and Tri.MS. read karmaṇeti. नर्मणेति। § 280

अथ *नर्मद्युतिः*— § 281

...33d **धृतिस्तज्जा द्युतिर्मता॥ ३३॥** § 282

यथा रत्नावल्याम्—

**सुसंगता** *सहि, अदक्खिणा दाणिं सि तुमं। जा एवं पि भट्टिणा हत्थावलंबिदा कोवं ण मुंचसि।

---

२ *] 'सुसंगते, कस्य कृतेऽहमागता ?' इति च्छाया.

४ *] 'अयि आत्मशङ्किते, ननु चित्रफलकस्य। तद् गृहाणेतत्।' इति च्छाया.

४ अइ] For *appasaṃkide*, the printed *Ratnā :alī* has *aṇṇasaṃkide*.

४ *] पृ० ७६

७ मादाय] A.T.A. *arghyapātra-*, etc.

९ *] 'हला, उपनय मे कुसुमानि यावदपरेषामपि देवानां सपर्यां निर्वर्तयामि।' इति च्छाया.

१२ *] Before *ity anena* A.T.A. quotes some sentences from *Veṇīsaṃhāra*.

१६ म्] M.G.T. reads *yuktam*. This is obviously an error of the scribe.

३ *] 'सखि, अदक्षिणेदानीमसि त्वम्। येवमपि भर्त्रा हस्तावलम्बिता कोपं न मुञ्चसि।' इति च्छाया.

३ क्खिणा] N.S.P. *adiṇiṭṭhurā*.

**सागरिका** *सभ्रूभङ्गमीषद्विहस्य।*

*सुसंगदे, दाणिं पि ण विरमसि।*

इत्यनेनानुरागबीजोद्घाटनान्वयेन धृतिर्नर्मजा द्युतिरिति दर्शितमिति। § 283

अथ *प्रगमनम्*— § 284 33

...34a *यथोत्तरा वाक् *प्रगमो § 285

यथा रत्नावल्याम्—

**विदूषकः** *भो वअस्स, दिट्ठिआ वड्ढसे।

**राजा** *सकौतुकम्*

वयस्य, किमेतत्।

**विदूषकः** *भो, एदं क्खु तं जं मए भणिदं तुमं एव्व आलिहिदो। को अण्णो कुसुमाउहव्ववदेसेण णिण्हवीअदि।*

इत्यादिना,

परिच्युतस्तत्कुचकुम्भमध्यात् किं शोषमायासि मृणालहार।
न सूक्ष्मतन्तोरपि तावकस्य तत्रावकाशो भवतः किमु स्यात्॥*
§ 288

*इत्यन्तेन राजविदूषकसागरिकासुसंगतानामन्योन्यवचनेनोत्तरोत्तरानुरागबीजोद्घाटनात् प्रगमनमिति। § 289

अथ *निरोधः*— § 290

...34b हितरोधो निरोधनम्। § 291

यथा रत्नावल्याम्—

**राजा** धिङ् मूर्ख—

प्राप्ता कथमपि दैवात् कण्ठमनीतैव सा प्रकटरागा। रत्नावलीव कान्ता

---

२ *] 'सुसंगते, इदानीमपि न विरमसि।' इति च्छाया.
२ *] पृ° ८३
३ येन] A.T.A. *udghāṭanena.*
१ अथ] 'प्रगयणम्' इति पाठः.
२ *] N.S.P. *uttarā vāk pragamanam.*
३ *] 'भो वयस्य, दिष्ट्या वर्धसे।' इति च्छाया.
७ *] 'भोः, एतत् खलु तद्यन्मया भणितं त्वमेवालिखितः। कोऽन्यः कुसुमायुधव्यपदेशेन निह्नूयते।' इति च्छाया.
८ *] पृ° ६७
११ *] रत्ना° २।१४
१२ *] N.S.P. *ity anena.*
१३ नात्] 'प्रगयणम्' इति पाठः.

मम हस्ताद् भ्रंशिता भवता॥* § 293&

इत्यनेन वत्सराजस्य सागरिकासमागमरूपहितस्य वासवदत्ताप्रवेशसूचकेन विदूषकवचसा निरोधात् निरोधनमिति। § 294

34 अथ *पर्युपासनम्*— § 295

...34c **पर्युपास्तिरनुनयः** § 296

यथा रत्नावल्याम्—

प्रसीदेति ब्रूयामिदमसति कोपे न घटते करिष्याम्येवं नो पुनरिति
भवेदभ्युपगमः। न मे दोषोऽस्तीति त्वमिदमपि हि ज्ञास्यसि
मृषा किमेतस्मिन् वक्तुं क्षममिति न वेद्मि प्रियतमे॥*

§ 298&

इत्यनेन चित्रगतयोर्नायकयोर्दर्शनात् कुपिताया वासवदत्ताया अनुरागोद्घाटनान्वयेन पर्युपासनमिति। § 299

अथ *पुष्पम्*— § 300

...34d **पुष्पं वाक्यं विशेषवत्॥ ३४॥** § 301

यथा रत्नावल्याम्—

*राजा सागरिकां हस्ते गृहीत्वा स्पर्शं नाटयति*

**विदूषकः** *भो एसा अपुव्वा सिरी तुए समासादिदा।*

राजा वयस्य, सत्यम्—

श्रीरेषा पाणिरप्यस्याः पारिजातस्य पल्लवः। कुतोऽन्यथा स्रवत्येष स्वेद-
च्छद्मामृतद्रवः॥* § 303&

इत्यनेन नायकयोः साक्षादन्योन्यदर्शनादिना सविशेषानुरागोद्घाटनात् पुष्प-

---

० *] पृ० ८५

५ ति] A.T.A. reads *asati doṣe*, and *kariṣye naivāham*.

५ *] २।१९

५ त्ताया] N.S.P. *vāsavadattāyā anunayanaṃ nāyakayor anurāgo-*, etc.

४ *] 'भोः, एषापूर्वा श्रीस्त्वया समासादिता।' इति च्छाया.

४ भो] A.T.A. *bho vayassa*.

४ *] पृ० ८२

८ *] २।१७

म्। § 304

अथोपन्यासः— § 305

...35a *प्रसादनमुपन्यासो § 306

यथा रत्नावल्याम्— 35

**सुसंगता** *भट्टा, अलं संकाए। मए वि भट्टिणो पसाएण कीलिदं एव्व। ता किं कण्णाभरणेण। अदो वि मे गरुओ पसाओ, जं कीस तए अहं एत्थ आलिहिअ त्ति कुविआ मे पिअसही साअरिआ। ता पसादीअदु।*

इत्यनेन सुसंगतावचसा सागरिका मया लिखिता सागरिकया च त्वमिति सूचयता प्रसादोपन्यासेन बीजोद्भेदादुपन्यास इति। § 307

अथ *वज्रम्*— § 308

...35b वज्रं प्रत्यक्षनिष्ठुरम्। § 309

यथा रत्नावल्याम्—

**वासवदत्ता** *चित्रफलकं निर्दिश्य*

*अज्जउत्त, का एसा तुह समीवे चिट्ठइ, एदं किं वसंतअस्स विण्णाणं।*

पुनः *अज्जउत्त, ममावि एदं चित्तकम्म पेक्खंतीए सीसवेअणा समुप्पण्णा। इत्यनेन वासवदत्तया वत्सराजस्य सागरिकानुरागोद्भेदनात् प्रत्यक्षनिष्ठुराभिधानं वज्रमिति। § 310

अथ *वर्णसंहारः*— § 311

---

२ *] 'उपन्यासस्तु सोपानं' इति पाठः.
२ न्यासो] A.T.A. gives *vajraṃ*, etc. first, and then *upanyāsa*.
३ *] 'भर्तः, अलं शङ्कया। मयापि भर्तुः प्रसादेन क्रीडितमेव। तत् किं कर्णाभरणेन। असावपि मे गुरुः प्रसादः, यत् कथं त्वयाहमत्रालिखितेति कुपिता मे प्रियसखी सागरिका। तत् प्रसाद्यताम्।' इति च्छाया.
४ णेण] N.S.P. *kaṇṇābharaṇakeṇa*.
६ *] पृ० ७९
५ *] 'आर्यपुत्र, का एषा तव समीपे तिष्ठति एतत् किं वसन्तकस्य विज्ञानम्।' इति च्छाया.
५ का] N.S.P. *esā vi jā tuhā samīve*.
६ *] पृ० ८९
७ *] 'आर्यपुत्र, ममाप्येतच्चित्रकर्म पश्यन्त्याः शीर्षवेदना समुत्पन्ना।' इति च्छाया.

...35cd *चातुर्वर्ण्योपगमनं वर्णसंहार इष्यते॥ ३५॥ § 312

यथा वीरचरिते तृतीयेऽङ्के—

परिषदियमृषीणामेष वृद्धो युधाजित् सह
नृपतिरमात्यैर्लोमपादश्च वृद्धः।
36 अयमविरतयज्ञो ब्रह्मवादी पुराणः प्रभुरपि जनकानामद्रुहो
याचकास्ते॥* § 315

इत्यनेन ऋषिक्षत्रियामात्यादीनां संगतानां वर्णानां वचसा रामविजयाशंसिनः परशुरामदुर्नयस्याद्रोहयाञ्चाद्वारेणोद्भेदनाद् वर्णसंहार इति। § 316

एतानि च त्रयोदश प्रतिमुखाङ्गानि मुखसंध्युपक्षिप्तबिन्दुलक्षणावान्तरबीजमहाबीजप्रयत्नानुगतानि विधेयानि। एतेषां च मध्ये परिसर्पप्रशमवज्रोपन्यासपुष्पाणां प्राधान्यम्। इतरेषां यथासंभवं प्रयोग इति। § 317

अथ *गर्भसंधि*माह— § 318

...36 गर्भस्तु दृष्टनष्टस्य बीजस्यान्वेषणं मुहुः।
द्वादशाङ्गः पताका स्यान्न वा स्यात् प्राप्तिसंभवः॥
३६॥ § 320

प्रतिमुखसंधौ लक्ष्यालक्ष्यरूपतया स्तोकोद्भिन्नस्य बीजस्य यः सविशेषोद्भेदपूर्वकः सान्तरायो लाभः पुनर्विच्छेदः पुनः प्राप्तिः पुनर्विच्छेदः पुनश्च तस्यैवान्वेषणं वारंवारं सोऽनिर्धारितैकान्तफलप्राप्त्याशात्मको गर्भसंधिरिति। तत्र चौत्सर्गिकत्वेन प्राप्तायाः पताकाया अनियमं दर्शयति—पताका स्यान्न वा इत्यनेन। प्राप्तिसंभवस्तु स्यादेवेति दर्शयति—स्यात् प्राप्तिसंभवः इति। यथा रत्नावल्यां तृतीयेऽङ्के वत्सराजस्य वासवदत्तालक्षणापायेन तद्वेषपरीग्रहसागरिकाभिसरणोपायेन च विदूषकवचसा सागरिकाप्राप्त्याशा प्रथमं पुनर्वासवदत्तया विच्छेदः पुनः प्राप्तिः पुनर्विच्छेदः पुनरपायनिवारणोपायान्वेषणं नास्ति देवीप्रसादनं मुक्त्वान्य उपायः इत्यनेन दर्शितमिति। § 321

तत्र चौत्सर्गिकत्वेनेति। पताकाप्राप्त्याशान्वयो हि गर्भसंधिः। सा च
37 पताका अविशेषेण सर्वत्र प्राप्ता। तादृशस्तस्या अनियमं दर्शयतीत्यर्थः।
अवस्थान्वयो हि तस्याः संधिप्रयोजकः। तदभावे तन्निबन्धनसंधिमात्रमेव
न स्यात्। अवस्थाविशेष कृतस्तु स्यादेवेति ब्रवीतीत्याह प्राप्तिसंभवस्त्विति।

---

१ *] ‘चातुर्वर्णो’ इति पाठः.
२ रिते] A.T.A. *Mahāvīracarite*.
४ *] ३।५
८ तानि] A.T.A. omits *mahābīja*.
४ स्य] N.S.P. omits *yaḥ*.
११ णं] रत्ना° पृ° १२५

अनियता हि पताका। *नियता तु प्राप्त्याशा। तस्याः [नियमेन] गर्भसंध्यनुप्रविष्टत्वात्। § 322

स च द्वादशाङ्गो भवति, तान्युद्दिशति— § 323

...37 अभूताहरणं मार्गो रूपोदाहरणे क्रमः।
संग्रहश्चानुमानं च तोटकाधिवले तथा॥ ३७॥ § 325

...38ab उद्वेगसंभ्रमाक्षेपा लक्षणं च प्रणीयते। § 326

यथोद्देशं लक्षणमाह— § 327

...38c अभूताहरणं छद्म § 328

यथा रत्नावल्याम्—

**काञ्चनमाला** *साधु रे अमच्च वसंतअ, साधु। अदिसइदो तुए अमच्चो जोगंधराअणो इमाए संधिविग्गहचिंताए।*

इत्यादिना प्रवेशकेन गृहीतवासवदत्तावेषायाः सागरिकाया वत्सराजाभिसरणं छद्म विदूषकसुसंगताक्लृप्तं काञ्चनमालानुवादद्वारेण दर्शितमिति अभूताहरणम्। § 329

अथ *मार्गः*— § 330

...38d मार्गस्तत्त्वार्थकीर्तनम्॥ ३८॥ § 331

---

१ *] The point noted by Śāradātanaya as *apatāke niveśaḥ syād bindor bījasya vā kvacit* (p. २१०) does not seem to be known to Bh.Nṛ. Bh.Nṛ does not seem to be aware also of Śiṅgabhūpāla's statement: *patākayā vihīne tu bindum vā viniveśayet* (T.S.S., p. २१५). Perhaps he was earlier than these two. See the Introduction. --- In the text of the *L.T.* here we should perhaps supply *niyamena* before *garbhasaṃdhyanupraviṣṭatvāt*. Otherwise it is not clear. Only T.MS. reads *kāryaniyatā tu prāptyāśā*.

३ *] 'साधु रे अमात्य वसन्तक, साधु। अतिशयितस्त्वयामात्यो यौगंधरायणोऽनया संधिविग्रहचिन्तया।' इति च्छाया.

४ *] पृ° १४

२ म्] A.T.A. *tattvānukīrtanam*.

यथा रत्नावल्याम्—

**विदूषकः** *दिट्ठिआ वड्ढसि समीहिदब्भधिकाए कज्जसिद्धीए।

**राजा** वयस्य, *अपि कुशलं प्रियायाः ?

38 **विदूषकः** *अइरेण सयं एव्व पेक्खिअ जाणिहिसि।

**राजा** दर्शनमपि भविष्यति ?

**विदूषकः** *सगर्वम्*
*कीस ण भविस्सदि, जस्स दे उवहसिदविहप्फदिबुद्धिविहवो अहं अमच्चो।

**राजा** तथापि कथमिति श्रोतुमिच्छामि।

**विदूषकः** *कर्णे कथयति*
*एव्वं।*

इत्यनेन यथा विदूषकेण सागरिकासमागमः सूचितः, तथैव निश्चितरूपो राज्ञे निवेदित इति तत्त्वार्थकथनात् मार्ग इति। § 332

अथ *रूपम्*— § 333

...39a

## रूपं वितर्कवद्वाक्यं § 334

यथा रत्नावल्याम्—

**राजा** अहो किमपि कामिजनस्य स्वगृहिणीसमागमपरिभाविनोऽभिनवं जनं प्रति पक्षपातः। तथा हि—*

प्रणयविशदां दृष्टिं वक्त्रे ददाति न शङ्किता घटयति घनं कण्ठाश्लेषे रसान्न पयोधरौ। वदति बहुशो गच्छामीति प्रयत्नधृताप्यहो
रमयतितरां संकेतस्था तथापि हि कामिनी॥* § 336&

इत्यनेन रत्नावलीसमागमप्राप्त्याशानुगुण्येनैव देवीशङ्कायाश्च वितर्काद् रूप-

---

१ *] 'दिष्ट्या वर्धसे समीहिताभ्यधिकया कार्यसिद्ध्या।' इति च्छाया.
३ *] N.S.P. omits *api*.
४ *] 'अचिरेण स्वयमेव प्रेक्ष्य ज्ञास्यसि।' इति च्छाया.
८ *] 'कथं न भविष्यति, यस्य त उपहसितबृहस्पतिबुद्धिविभवोऽहममात्यः।' इति च्छाया.
१२ *] 'एवम्' इति च्छाया.
१२ *] पृ० १०२
४ *] पृ० ११०
७ *] ३।९

मिति। § 337

अथो*दाहरणम्*— § 338 39

...39b **सोत्कर्षं स्यादुदाहृतिः।** § 339

यथा रत्नावल्याम्—

**विदूषकः** *सहर्षम्*

*ही ही भोः, कोसंबीरज्जलाहेणावि ण तादिसो वअस्सस्स परितोसो आसि, यादिसो मम सआसादो पिअवअणं सुणिअ भविस्सदि त्ति तक्केमि।*

इत्यनेन रत्नावलीप्राप्तिवार्तापि कौशाम्बीराज्यलाभादतिरिच्यत इत्युत्कर्षाभिधानादुदाहृतिरिति। § 340

अथ *क्रमः*— § 341

...39c **क्रमः संचिन्त्यमानाप्तिर्** § 342

यथा रत्नावल्याम्—

**राजा** उपनतप्रियासमागमोत्सवस्यापि मे किमिदमत्यर्थमुत्ताम्यति चेतः। अथवा—*

तीव्रः स्मरसंतापो न तथादौ बाधते यथासन्ने। तपति प्रावृषि सुतरामभ्यर्णजलागमो दिवसः॥* § 344&

**विदूषकः** *आकर्ण्य*

*भोदि सागरिए, एसो पिअवअस्सो तुमं एव्व उद्दिसिअ उक्कंठाणिब्भरं मंतेदि। ता निवेदेमि से तुहागमणं।

इत्यनेन वत्सराजस्य सागरिकासमागममभिलषत एव भ्रान्तसागरिकाप्राप्तिरिति क्रमः। § 345

अथ *क्रमान्तरं* मतभेदेन— § 346

५ *] 'ही ही भोः, कौशाम्बीराज्यलाभेनापि न तादृशो वयस्यस्य परितोष आसीत्, यादृशो मम सकाशात् प्रियवचनं श्रुत्वा भविष्यतीति तर्कयामि।' इति च्छाया.

७ *] पृ॰ १०१

४ *] पृ॰ ११४

७ *] ''भवति सागरिके, एष प्रियवयस्यस्त्वामेवोद्दिश्योत्कण्ठानिर्भरं मन्त्रयति। तन्निवेदयामि तस्मै तवागमनम्।' इति च्छाया.

७ *] ३।१०

...39d **भावज्ञानमथापरे॥ ३९॥** § 347

यथा रत्नावल्याम्—

राजा *उपसृत्य*

प्रिये सागरिके—*

शीतांशुर्मुखमुत्पले तव दृशौ पद्मानुकारौ करौ रम्भागर्भ-
निभं तवोरुयुगलं बाहू मृणालोपमौ। इत्याह्लादक-
राखिलाङ्गि रभसान्निःशङ्कमालिङ्ग्य मा- मङ्गानि त्वम-
नङ्गतापविधुराण्येह्येहि निर्वापय॥* § 349&

इत्यादिना इह तदप्यस्त्येव बिम्बाधरे। इत्यन्तेन वासवदत्तया वत्सराजमावस्य ज्ञातत्वात् क्रमान्तरमिति। § 350

अथ *संग्रहः*— § 351

...40a **संग्रहः सामदानोक्तिर्** § 352

यथा रत्नावल्याम्—

साधु वयस्य, साधु। इदं ते पारितोषिकम् *इति कटकं ददाति*

इत्याभ्यां सामदानाभ्यां विदूषकस्य सागरिकासमागमकारिणः संग्रहात् संग्रह इति। § 353

अथा*नुमानम्*— § 354

...40b **अभ्यूहो लिङ्गतोऽनुमा।** § 355

यथा रत्नावल्याम्—

राजा धिङ् मूर्ख, त्वत्कृत एवायमापतितोऽस्माकमनर्थः। कुतः—*

समारूढा प्रीतिः प्रणयबहुमानात् प्रतिदिनं व्यलीकं वीक्ष्येदं कृतम-
41 कृतपूर्वं खलु मया। प्रिय मुञ्चत्यद्य स्फुटमसहना जीवित-
मसौ प्रकृष्टस्य प्रेम्णः स्खलितमविषह्यं हि भवति॥*
§ 357&

३ *] पृ० ११५
६ *] ३।११
६ इत्यादिना] ३।१३
३ *] पृ० १२३
५ *] ३।१५

**विदूषकः** *भो वअस्स, वासवदत्ता किं करिस्सदि त्ति ण जाणामि। सागरिआ उण दुक्करं जीविस्सदि त्ति तक्केमि।

इत्यत्र प्रकृष्टप्रेमस्खलनेन सागरिकानुरागजन्येन वासवदत्ताया मरणाभ्यूहनमनुमानमिति। § 358

अथा*धिबलम्*— § 359

...40c **अधिबलमभिसंधिः** § 360

यथा रत्नावल्याम्—

**काञ्चनमाला** *भट्टिणि, इअं सा चित्तसालिआ। ता वसंतअस्स सण्णं करेमि। *छोटिकां ददाति*

इत्यादिना वासवदत्ताकाञ्चनमालाभ्यां सागरिकासुसंगतावेषाभ्यां राजविदूषकयोरतिसंधानादधिबलमिति। § 361

अथ *तोटकम्*— § 362

...40d **संरब्धं तोटकं वचः॥ ४०॥** § 363

यथा रत्नावल्याम्—

**वासवदत्ता** *उपसृत्य*

*अज्जउत्त, जुत्तमिणं सरिसमिणं। *पुनः सरोषम्*
अज्जउत्त, उट्ठेहि। किं अज्जवि अहिजादाए सेवादुक्खमणुभवीअदि।
कंचणमाले, एदेण एव्व लदापासेण बंधिअ आणेहि एणं दुट्ठबम्हणं।
एदं पि दुट्ठकण्णअं अग्गदो करेहि।*

इत्यनेन वासवदत्तासंरब्धवचसा सागरिकासमागमान्तरायभूतेनानियतप्राप्तिकारणं तोटकमुक्तम्। § 364

यथा च वेणीसंहारे—प्रयत्नपरिबोधितः स्तुतिभिरद्य शेषे निशाम्।* 42
इत्यादिना, धृतायुधो यावदहं तावदन्यैः किमायुधैः।* इत्यन्तेनान्योन्यं कर्णाश्वत्थाम्नोः संरब्धवचसा सेनाभेदकारिण पाण्डवविजयप्राप्त्याशान्वितं तोटकमिति। § 365

---

० *] ‘भो वयस्य, वासवदत्ता किं करिष्यतीति न जानामि। सागरिका पुनर्दुष्करं जीविष्यतीति तर्कयामि।’ इति च्छाया.

३ *] ‘भर्त्रि, इयं सा चित्रशालिका। तद्वसन्तकस्य संज्ञां करोमि।’ इति च्छाया.

६ मिति] N.S.P. *-yor abhisaṃdhīyamānatvād.*

५ *] ‘आर्यपुत्र, युक्तमिदं सदृशमिदम्। आर्यपुत्र, उत्तिष्ठ। किमद्याप्यभिजातायाः सेवादुःखमनुभूयते। काञ्चनमाले, एतेनैव लतापाशेन बद्धानयैन दुष्टब्राह्मणम्। एतामपि दुष्टकन्यकामग्रतः कुरु।’ इति च्छाया.

८ *] पृ० १३२

११ *] ३।३४

१२ *] ३।४६

ग्रन्थान्तरे तु— § 366

...41ab *तोटकस्यान्यथाभावं ब्रुवतेऽधिबलं बुधाः। § 367

यथा रत्नावल्याम्—

राजा देवि, एवमपि प्रत्यक्षदृष्टव्यलीकः किं विज्ञापयामि—

आताम्रतामपनयामि विलक्ष एव लाक्षाकृतां चरणयोस्तव देवि मूर्ध्ना।

कोपोपरागजनितां तु मुखेन्दुबिम्बे हर्तुं क्षमो यदि परं करुणा मयि स्यात्॥* § 369 &

§ 370

...41cd *संरब्धवचनं यत्तु तोटकं तदुदाहृतम्॥ ४१॥ § 371

यथा रत्नावल्याम्—

राजा प्रिये वासवदत्ते, प्रसीद प्रसीद।

वासवदत्ता *अश्रूणि धारयन्ती*

*अज्जउत्त, मा एव्वं भण। अण्णसंकंताइं खु एदाइं अक्खराइं त्ति।*

§ 372

यथा च वेणीसंहारे—

राजा अये सुन्दरक, कच्चित् कुशलमङ्गराजस्य ?

पुरुषः *कुसलं सरीरसेत्तकेण।

43 राजा किं तस्य किरीटिना हता धौरेयाः, क्षतः सारथिः, भग्नो वा रथः ?

पुरुषः *देव, णं भग्गो रहो भग्गो से मणोरहो।

---

२ *] Bahurūpamiśra gives *kapaṭasyānyathābhāvam*.
३ ल्याम्] पृ॰ १२१
५ *] ३।१४
१ *] Bracketed portion is omitted by A.T.A. and Bahurūpamiśra. Omission seems to be proper. But it was given in the N.S.P.
५ *] 'आर्यपुत्र, मैवं भण। अन्यसंक्रान्तानि खल्वेतान्यक्षराणिति।' इति च्छाया.
५ *] पृ॰ १२०
८ *] 'कुशलं शरीरमात्रकेण।' इति च्छाया.
१० *] 'देव, न भग्नो रथः। भग्नोऽस्य मनोरथः।' इति च्छाया.

**राजा** *ससंभ्रमम्*

कथम् ?*

इत्येवमादिना संरब्धवचसा तोटकमिति। § 373

अथोद्वेगः— § 374

...42a **उद्वेगोऽरिकृता भीतिः** § 375

*यथा रत्नावल्याम्—

**सागरिका** *आत्मगतम्*

*कहं अकिदपुण्णेहिं अत्तणो इच्छाए मरिउं पि ण पारीअदि।*

इत्यनेन वासवदत्तातः सागरिकाया भयमिति उद्वेगः। यो हि यस्यापकारी स तस्यारिः। § 376

यथा च वेणीसंहारे—

**सूतः** *श्रुत्वा सभयम्*

कथमासन्न एवासौ कौरवराजपुत्रमहावनोत्पातमारुतो मारुतिरनुपलब्धसंज्ञश्च तावदयं महाराजः। भवतु। दूरमपहरामि स्यन्दनम्। कदाचिदयमनार्यो दुःशासन इवास्मिन्नप्यनार्यमाचरिष्यति।*

इत्यरिकृता भीतिरुद्वेगः। § 377

अथ *संभ्रमः*— § 378

...42b **शङ्कात्रासौ च संभ्रमः।** § 379

यथा रत्नावल्याम्—

**विदूषकः** *पश्यन्*

*का उण एसा। *ससंभ्रमम्*

कधं देवी वासवदत्ता अत्ताणं वावदेदि।

**राजा** *ससंभ्रममुपसर्पन्*

क्वासौ क्वासौ।*

इत्यनेन वासवदत्ताबुद्धिगृहीतायाः सागरिकाया मरणशङ्कया संभ्रम इति।

---

३ *] पृ॰ १०५

३ *] A.T.A. gives the illustration from *Veṇīsaṃhāra* first, and then that from the *Ratnā :alī*.

५ *] ‘कथमकृतपुण्यैरात्मन इच्छया मर्तुमपि न पार्यते।’ इति च्छाया.

५ *] पृ॰ १३४

१२ *] पृ॰ ९६

५ *] ‘का पुनरेषा। कथं देवी वासवदत्तात्मानं व्यापादयति।’ इति च्छाया.

८ *] पृ॰ १२६

§ 380

44 यथा च वेणीसंहारे—

*नेपथ्ये कलकलः*

**अश्वत्थामा** *ससंभ्रमम्*

मातुल मातुल, कष्टम्। एष भ्रातुः प्रतिज्ञाभङ्गभीरुः किरीटी समं शरवर्षैर्दुर्योधनराधेयावभिद्रवति। सर्वथा पीतं शोणितं दुःशासनस्य भीमेन।*

इति शङ्का। तथा

*प्रविश्य संभ्रान्तः सप्रहारः*

**सूतः** त्रायतां त्रायतां कुमारः।

इति त्रासः। इत्येताभ्यां त्रासशङ्काभ्यां दुःशासनद्रोणवधसूचकाभ्यां पाण्डवविजयप्राप्त्याशान्वितः संभ्रम इति। § 381

अथा*क्षेपः*— § 382

...42cd **गर्भबीजसमुद्भेदादाक्षेपः परिकीर्तितः॥ ४२॥** § 383

*यथा रत्नावल्याम्—

**राजा** वयस्य, देवीप्रसादनं मुक्त्वा नान्यमत्रोपायं पश्यामि।*

पुनः क्रमान्तरे सर्वथा देवीप्रसादनं प्रति निष्प्रत्याशीभूताः स्मः। पुनः तत् किमिह स्थितेन देवीमेव गत्वा प्रसादयामि। इत्यनेन देवीप्रसादायत्ता सागरिकासमागमसिद्धिरिति गर्भबीजोद्भेदादाक्षेपः। § 384

यथा च वेणीसंहारे—

**सुन्दरकः** *अहवा किमेत्थ देव्वं उआलहामि। तस्स क्खु एदं णिब्भच्छिदविदुरवअणबीअस्स परिभूदपिदामहहिदोवदेसंकुरस्स सउणिप्पोच्छाहणारूढमूलस्स कूडविससाहिणो पंचालीकेसग्गहणकुसुमस्स फलं परिणमेदि।*

इत्यनेन बीजमेव फलोन्मुखतयाक्षिप्यत इत्याक्षेपः। § 385

45 एतानि द्वादश गर्भाङ्गानि प्राप्त्याशाप्रदर्शकत्वेनोपनिबन्धनीयानि। एषां च मध्येऽभूताहरणमार्गतोटकाधिबलाक्षेपाणां प्राधान्यम्। इतरेषां यथासंभवं प्रयोग इति साङ्गो गर्भसंधिरुक्तः। § 386

---

७ *] पृ° १३
३ *] There is some difference in the reading in the printed *Ratnā :alī*.
४ *] पृ° १२५
५ रे] पृ° १३३
५ पुनः] पृ° १३५
८ *] ‘अथवा किमत्र दैवमुपालभे। तस्य खल्वेतन्निर्भर्त्सितविदुरवचनबीजस्य परिभूतपितामहहितोपदेशाङ्कुरस्य शकुनिप्रोत्साहनारूढमूलस्य कूटविषशाखिनः पाञ्चालीकेशग्रहणकुसुमस्य फलं परिणमति।’ इति च्छाया.
१० स्स] A.T.A. *jūdavisasāhiṇo*.
११ *] पृ° १०३

तत्प्रदर्शकत्वेनोपनिबध्यमानान्यपि गर्भसंध्यङ्गान्येव भवन्ति। तेनोक्तं प्राप्त्याशाप्रदर्शकत्वेनेति। § 387

अथाव*मर्शः*— § 388

...43 क्रोधेनावमृशेद् यत्र व्यसनाद्वा विलोभनात्।
गर्भनिर्भिन्नबीजार्थः सोऽवमर्श इति स्मृतः॥ ४३॥
§ 390

अवमर्शनमवमर्शः पर्यालोचनम्। तच्च क्रोधेन वा, व्यसनाद्वा, विलोभनेन वा। भवितव्यमनेनार्थेनेति [एवम्] अवधारितैकान्तफलप्राप्त्यवसाया[ना]त्मा गर्भसंध्युद्भिन्नबीजार्थसंबन्धो विमर्शोऽवमर्शः। यथा रत्नावल्यां चतुर्थेऽङ्के अग्निविद्रवपर्यन्तो वासवदत्ताप्रसत्त्या निरपायो रत्नावलीप्राप्त्यवसानात्मा विमर्शो दर्शितः। § 391

यथा च वेणीसंहारे दुर्योधनरुधिराक्तभीमसेनागमपर्यन्तः—

तीर्णे भीष्ममहोदधौ कथमपि द्रोणानले निर्वृते
कर्णाशीविषभोगिनि प्रशमिते शल्येऽपि याते दिवम्।
भीमेन प्रियसाहसेन रभसादल्पावशेषे जये सर्वे
जीवितसंशयं वयममी वाचा समारोपिताः॥* § 394

इत्यत्र स्वल्पावशेषे जये *इत्यादिभिर्विजयप्रत्यर्थिभूतसमस्तभीष्मादिमहारथवधादववारितैकान्तविजयावमर्शनादवमर्शनं दर्शितमित्यवमर्थसंधिः। § 395

तस्याङ्ग*संग्रह*माह— § 396 46

...44 तत्रापवादसंफेटौ विद्रवद्रवशक्तयः।
द्युतिः प्रसङ्गश्छलनं व्यवसायो विरोधनम्॥ ४४॥
§ 398

---

७ प्रसत्त्या ] Correction : ; प्रसक्त्या (sic !)प्रसत्त्या

---

३ इति ] N.S.P. *-marśo 'ṅgasaṃgrahaḥ.*
७ तुर्थेऽङ्के ] पृ° १८६
८ सानात्मा ] N.S.P. *nirapāyaratnāvalīprāptyavasāyātmā.*
११ * ] ६।१
१२ * ] N.S.P. omits *-bhūta-*.

...45ab **प्ररोचना विचलनमादानं च त्रयोदश।** § 399

यथोद्देशं लक्षणमाह— § 400

...45c **दोषप्रख्यापवादः स्यात्** § 401

यथा रत्नावल्याम्—

**सुसंगता** *सा खु तवस्सिणी भट्टिणीए उज्जइणिं णीअदित्ति पवादं करिअ उवत्थिदे अद्धरत्ते ण जाणीअदि कहिंपि णीदेत्ति।

**विदूषकः** *सोद्वेगम्*

*अदिणिग्घिणं क्खु किदं देवीए।*

पुनः।*

**विदूषकः** *भो वअस्स, मा खु अण्णधा संभावेहि। सा खु देवीए उज्जइणीए पेसिदा। अदो अप्पिअं त्ति ण कहिदं।

**राजा** अहो निरनुरोधा मयि देवी।

इत्यनेन वासवदत्तादोषप्रख्यापनादपवादः। § 402

यथा च वेणीसंहारे—

**युधिष्ठिरः** पाञ्चालक, कच्चिदासादिता तस्य दुरात्मनः कौरवापसदस्य पदवी ?

**पाञ्चालकः** न केवलं पदवी। स एव दुरात्मा देवीकेशपाशस्पर्शपातकप्रधानहेतुरुपलब्धः।*

इति दुर्योधनस्य दोषप्रख्यापनादपवाद इति। § 403

47 अथ *संफेटः*— § 404

...45b **संफेटो रोषभाषणम्।** § 405

अथ *विद्रवः*— § 410

---

३ *] 'सा खलु तपस्विनी भाट्टिन्योज्जयिनीं नीयत इति प्रवादं कृत्वोपस्थितेऽर्धरात्रे न ज्ञायते कुत्रापि नीतेति।' इति च्छाया.
६ *] 'अतिनिर्घृणं खलु कृतं देव्या।' इति च्छाया.
६ *] पृ० १३९
७ *] पृ० १४७
८ *] 'भो वयस्य, मा खल्वन्यथा संभावय। सा खलु देव्योज्जयिन्यां प्रेषिता। अतोऽप्रियमिति न कथितम्।' इति च्छाया.
८ ण] N.S.P. omits *ṇa*.
१५ *] पृ० १५७

...45c **विद्रवो वधबन्धादिर्** § 411

यथा छलितरामे— § 412

येनावृत्य मुखानि साम पठतामत्यन्तमायासितं बाल्ये येन
हृताक्षसूत्रवलयप्रत्यर्पणैः क्रीडितम्।
युष्माकं हृदयं स एष विशिखैरापूरितांसस्थलो
मूर्च्छाघोरतमःप्रवेशविवशो बद्धा लवो नीयते॥ § 414

यथा च रत्नावल्याम्—

हर्म्याणां हेमशृङ्गश्रियमिव शिखरैरर्चिषामादधानः
सान्द्रोद्यानद्रुमाग्रग्लपनपिशुनितात्यन्ततीव्राभितापः।
कुर्वन् क्रीडामहीध्रं सजलजलधरश्यामलं धूमपातै- रेष 48
प्लोषार्तयोषिज्जन इह सहसैवोत्थितोऽन्तःपुरेऽग्निः॥* § 417

इत्यादि। पुनः 49

**वासवदत्ता** *अज्जउत्त, ण क्खु अहं अत्तणो कारणादो भणामि। एसा मए णिग्घिणहिअआए संजदा सागरिआ विवज्जदि।*

इत्यनेन सागरिकावधबन्धाग्निभिर्विद्रव इति। § 418

अथ *द्रवः*— § 419

...45d **द्रवो गुरुतिरस्कृतिः॥ ४५॥** § 420

यथोत्तरचरिते—

वृद्धास्ते न विचारणीयचरितास्तिष्ठन्तु हुं वर्तते
सुन्दस्त्रीदमनेऽप्यखण्डयशसो लोके महान्तो हि ते।
यानि त्रीण्यकुतोमुखान्यपि पदान्यासन् खरायोधने यद्वा
कौशलमिन्द्रसूनुदमने तत्राप्यभिज्ञो जनः॥* § 423

इत्यनेन लवो रामस्य गुरोस्तिरस्कारं कृतवानिति द्रवः। § 424

यथा च वेणीसंहारे—

**युधिष्ठिरः** भगवन् कृष्णाग्रज सुभद्राभ्रातः,

ज्ञातिप्रीतिर्मनसि न कृता क्षत्रियाणां न धर्मो रूढं सख्यं तदपि

७ *] ४।१४
८ *] 'आर्यपुत्र, न खल्वहमात्मनः कारणाद् भणामि। एषा मया निर्घृणहृदयया संयता सागरिका विपद्यते।' इति च्छाया.
९ *] पृ० १७१
४ सो] A.T.A. *akuṇṭhayaśaso.*
५ *] ५।३४

गणितं नानुजस्यार्जुनेन। तुल्यः कामं भवतु भवतः शिष्ययोः स्नेहबन्धः कोऽयं पन्था यदसि विगुणो मन्दभाग्ये मयीत्थम्॥* § 426&

इत्यादिना बलभद्रं गुरुं युधिष्ठिरस्तिरस्कृतवानिनि द्रवः। § 427

अथ *शक्तिः*— § 428

...46a **विरोधशमनं शक्तिस्** § 429

यथा रत्नावल्याम्—

सव्याजैः शपथैः प्रियेण वचसा चित्तानुवृत्त्याधिकं वैलक्ष्येण परेण
पादपतनैर्वाक्यैः सखीनां मुहुः। प्रत्यासत्तिमुपागता न हि
तथा देवी रुदत्या यथा प्रक्षाल्येव तयैव बाष्पसलिलैः
कोपोऽपनीतः स्वयम्॥* § 431&

इत्यनेन सागरिकालाभविरोधिवासवदत्ताकोपोपशमनात् शक्तिः। § 432

यथा चोत्तरचरिते लवः प्राह—

विरोधो विश्रान्तः प्रसरति रसो निर्वृतिघन- स्तदौद्धत्यं क्वापि
व्रजति विनयः प्रह्वयति माम्।
झटित्यस्मिन् दृष्टे किमपि परवानस्मि यदि वा
महार्घस्तीर्थानामिव हि महतां कोऽप्यतिशयः॥* § 435

§ 436

अथ *द्युतिः*— § 437

...46b **तर्जनोद्वेजने द्युतिः।** § 438

यथा वेणीसंहारे—

एतच्च वचनमुपश्रुत्य रामानुजस्य सकलदिङ्निकुञ्जपूरिताशातिरिक्तमुद्भ्रान्तसलिलचरशतसंकुलं त्रासोद्वृत्तनक्रग्राहमालोड्य सरःसलिलं भैरवं च गर्जित्वा कुमारवृकोदरेणाभिहितम्—*

जन्मेन्दोरमले कुले व्यपदिशस्यद्यापि धत्से गदां मां दुःशासनकोष्ण-

० *] ६।२०
५ *] ४।१
६ *] ६।११
५ *] पृ० १६१

शोणितसुराक्षीबं रिपुं भाषसे। दर्पान्धो मधुकैटभद्विषि ह-
रावप्युद्धतं चेष्टसे मत्त्रासान्नृपशो विहाय समरं पङ्केऽधुना
लीयसे॥* § 440&

इत्यादिना त्यक्तोत्थितः सरभसम् इत्यन्तेन दुर्वचनजलावलोड-नाभ्यां दुर्योधनतर्जनोद्वेजनकारिभ्यां पाण्डवविजयानुकूलदुर्योधनोत्थापन-हेतुभ्यां भीमस्य द्युतिरुक्ता। § 441

अथ *प्रसङ्गः*— § 442

...46c **गुरुकीर्तनं प्रसङ्गश्** § 443

यथा रत्नावल्याम्—

**वसुभूतिः** देव, यासौ सिंहलेश्वरेण स्वदुहिता रत्नावली नामायुष्मती वास-वदत्तां लावाणके दग्धामुपश्रुत्य देवाय पूर्वप्रार्थिता सती प्रतिदत्ता।*

इत्यनेन रत्नावल्या लाभानुकूलाभिजनप्रकाशिना प्रसङ्गाद् गुरुकीर्तनेन प्र-सङ्गः। § 444

तथा मृच्छकटिकायाम्—

**चाण्डालकः** *एस सागलदत्तस्स सुओ अज्जविणअदत्तस्स णत्तू चालुदत्तो वावादिदुं वज्झट्ठाणं णीअदि। एदेण किल गणिआ वसंतसेणा सुवण्णलोभेण वावदिदत्ति।*

मखशतपरिपूतं गोत्रमुद्भासितं यत् सदसि निबिडचैत्यब्रह्मघोषैः पुर-

स्तात्। मम निधनदशायां वर्तमानस्य पापै- स्तदसदृश-
मनुष्यैर्घुष्यते घोषणायाम्॥* § 446&

इत्यनेन चारुदत्तवधसूचनया अवधाभ्युदयानुकूलं प्रसङ्गाद् गुरुकीर्तनमिति प्रसङ्गः। § 447

अथ *छलनम्*— § 448

...46d **छलनं चावमाननम्॥ ४६॥** § 449

---

० *] ६।७

४ *] पृ॰ १६८

**चारुदत्तः** ७ *] 'एष सागरदत्तस्य सुत आर्यविनयदत्तस्य नप्ता चारुदत्तो व्यापादयितुं वध्यस्थानं नीयते। एतेन किल गणिका वसन्तसेना सुवर्णलोभेन व्यापादितेति।' इति च्छाया.

८ *] पृ॰ २२९

१० *] मुच्छ॰ १०।१२

१० नेन] N.S.P. *cārudattava-dhābhyudayānukūlam.*

यथा रत्नावल्याम्—

राजा अहो निरनुरोधा मयि देवी।*

इत्यनेन वासवदत्तयेष्टासंपादनाद् वत्सराजस्यावमाननात् छलनम्। § 450

यथा च रामाभ्युदये सीतायाः परित्यागेनावमाननात् छलनमिति। § 451

अथ *व्यवसायः*— § 452

...47a **व्यवसायः स्वशक्त्युक्तिः** § 453

यथा रत्नावल्याम्—

*किं धरणीए मिअंको आआसे महिहरो जले जलणो। मज्झण्हंमि पओसो दाविज्जउ देहि आणत्तिं॥ § 455& अहवा किं बहुणा जंपिएण—

मज्झ पइण्णा एसा भणामि हिअएण जं महसि दट्ठुं। तं ते दावेमि फुडं गुरुणो मंतप्पहावेण॥* § 456&

इत्यनेनैन्द्रजालिको मिथ्याग्निसंभ्रमोत्थापनेन वत्सराजस्य हृदयस्थसागरिकादर्शनानुकूलां स्वशक्तिमाविष्कृतवान्। § 457

यथा च वेणीसंहारे—

नूनं तेनाद्य वीरेण प्रतिज्ञाभङ्गभीरुणा।
बध्यते केशपाशस्ते स चास्याकर्षणे क्षमः॥* § 460

इत्यनेन युधिष्ठिरः स्वदण्डशक्तिमाविष्करोति। § 461

अथ *विरोधनम्*— § 462

...47b ***संरब्धानां विरोधनम्।** § 463

अथ *प्ररोचना*— § 474

---

२ *] पृ° १४१

३ नेन] A.T.A. *vāsavadattayān-iṣṭasaṃpādanāt.*

५ *] 'किं धरण्यां मृगाङ्क आकाशे महीधरो जले ज्वलनः मध्याह्ने प्रदोषो दर्श्यतां देह्याज्ञप्तिम्॥ अथवा किं बहुना जल्पितेन।[[४।८]] मम प्रतिज्ञैषा भणामि हृदयेन यद्वाञ्छसि द्रष्टुम्। तत्ते दर्शयामि स्फुटं गुरोर्मन्त्रप्रभावेण॥' --- इति च्छाया.

५ *] रत्ना° ४।९

५ *] ६।६

२ *] 'संरम्भोक्तिः' इति पाठः.

...47cd **सिद्धामन्त्रणतो भाविदर्शिका स्यात् प्ररोचना॥ ४७॥** § 475

यथा वेणीसंहारे—

**पाञ्चालकः** अहं च देवेन चक्रपाणिना

इत्युपक्रम्य

कृतं संदेहेन—

पूर्यन्तां सलिलेन रत्नकलशा राज्याभिषेकाय ते
कृष्णात्यन्तचिरोज्झिते च कबरीबन्धे करोतु क्षणम्।
रामे शातकुठारभासुरकरे क्षत्रद्रुमोच्छेदिनि- क्रोधान्धे च
वृकोदरे परिपतत्याजौ कुतः संशयः॥* § 478

इत्यादिना मङ्गलानि कर्तुमाज्ञापयति देवो युधिष्ठिरः। इत्यन्तेन द्रौप- 54
दीकेशसंयमनयुधिष्ठिरराज्याभिषेकयोर्भाविनोरपि सिद्धत्वेन दर्शिका प्ररोचनेति। § 479

अथ *विचलनम्*— § 480

...48a **विकत्थना विचलनम्** § 481

यथा वेणीसंहारे—

**अर्जुनः** तात, अम्ब—*

सकलरिपुजयाशा यत्र बद्धा सुतैस्ते तृणमिव परिभूतो यस्य गर्वेण
लोकः। रणशिरसि निहन्ता तस्य राधासुतस्य प्रणमति
पितरौ वां मध्यमः पाण्डवोऽयम्॥ § 483&

चूर्णिताशेषकौरव्यः क्षीबो दुःशासनासृजा। भङ्क्ता सुयोधन-
स्योर्वोर्भीमोऽयं शिरसाञ्चति॥* § 485&

इत्यनेन विजयबीजानुगतस्वगुणाविष्करणाद् विचलनमिति। § 486

यथा च रत्नावल्याम्—

देव्या मद्वचनात् तथाभ्युपगतः पत्युर्वियोगस्तया सा देवस्य कलत्र-

३ पाणिना] पृ॰ १६५
७ *] वे॰ सं॰ ६।१२
८ इत्यादिना] पृ॰ १६७
३ *] ५।२७
६ *] वे॰ सं॰ ५।२८

संघटनया दुःखं मया स्थापिता। तस्याः प्रीतिमयं करिष्यति
जगत्स्वामित्वलाभः प्रभोः सत्यं दर्शयितुं तथापि वदनं
शक्नोमि नो लज्जया॥* § 488&

इत्यनेनान्यपरेणापि यौगंधरायणेन मया जगत्स्वामित्वानुबन्धी कन्यालाभो वत्सराजस्य कृत इति स्वगुणानुकीर्तनाद् विचलनमिति। § 489

अथ *दानम्*— § 490

...48b **आदानं कार्यसंग्रहः।** § 491

यथा वेणीसंहारे—

**यौगंधरायणः** ननु भोः समन्तपञ्चकसंचारिणः—

रक्षो नाहं न भूतं रिपुरुधिरजलाप्लाविताङ्गः प्रकामं निस्तीर्णोरुप्र-
तिज्ञाजलनिधिगहनः क्रोधनः क्षत्रियोऽस्मि। भो भो राज-
न्यवीराः समरशिखिशिखादग्धशेषाः कृतं व- स्त्रासेनानेन
लीनैर्हतकरितुरगान्तर्हितैरास्यते यत्॥* § 493&

इत्यनेन समस्तरिपुवधकार्यस्य संगृहीतत्वादादानम्। § 494

यथा च रत्नावल्याम्—

**सागरिका** *दिशोऽवलोक्य*

*दिट्ठिआ समंतादो पज्जलिदो भअवं हुअवहो, अज्ज करिस्सदि दुक्खावसाणं।*

इत्यनेनान्यपरेणापि सागरिकायाः दुःखावसानेन कार्यस्य संग्रहादादानम्। यथा च जगत्स्वामित्वलाभः प्रभोः इति दर्शितमेवम्। § 495

इत्येतानि त्रयोदशावमर्शाङ्गानि। *तत्रैतेषामपवादशक्तिव्यवसायप्ररोचनादानानि प्रधानानीति। § 496

अथ *निर्वहणसंधिः*— § 497

...48cd **बीजवन्तो मुखाद्यर्था विप्रकीर्णा यथायथम्॥ ४८॥**
§ 498

---

० *] ४।२०
६ *] वे० सं० ६।३७
६ *] 'दिष्ट्या समन्तात् प्रज्वलितो भगवान् हुतवहोऽद्य करिष्यति दुःखावसानम्।' इति च्छाया.
६ *] पृ० १७४

६ रिकायाः] N.S.P. *anyapareṇāpi duḥkhāvasānakāryasya.*
६ च] ४।२०
६ *] *apavāda* is missing in A.T.A.

...49ab ऐकार्थ्यमुपनीयन्ते यत्र निर्वहणं हि तत्। § 499

यथा वेणीसंहारे—

**कञ्चुकी** *उपसृत्य सहर्षम्*

महाराज, वर्धसे वर्धसे। अयं खलु कुमारभीमसेनः सुयोधनक्षत-जारुणीकृत सकलशरीरो दुर्लक्षव्यक्तिः।* 56

इत्यादिना द्रौपदीकेशसंयमनादीनां मुखसंध्यादिबीजानां निजनिजस्थानोप-क्षिप्तानामेकार्थतया योजनम्। § 500

यथा च रत्नावल्यां सागरिकारत्नावलीवसुभूतिबाभ्रव्यादीनामर्थानां मुखसंध्यादिषु प्रकीर्णानां वत्सराजैककार्यार्थत्वम्—

**वसुभूतिः** *सागरिकां निर्वर्ण्यापवार्य*

बाभ्रव्य, सुसदृशीयं राजपुत्र्या।*

इत्यादिना दर्शितमिति निर्वहणसंधिः। § 501

अथ तदङ्गानि— § 502

...49cd संधिर्विबोधो ग्रथनं निर्णयः परिभाषणम्॥ ४९॥
§ 503

...50 प्रसादानन्दसमयाः कृतिर्भाषोपगूहने।
पूर्वभावोपसंहारौ प्रशस्तिश्च चतुर्दश॥ ५०॥ § 505

यथोद्देशं लक्षणमाह— § 506

...51a संधिर्बीजोपगमनं § 507

यथा रत्नावल्याम्—

**वसुभूतिः** बाभ्रव्य, सुसदृशीयं राजपुत्र्या।

**बाभ्रव्यः** ममाप्येवमेव प्रतिभाति।*

इत्यनेन नायिकानुरागबीजोपगमात् संधिरित। § 508

यथा च वेणीसंहारे—

**भीमः** भवति यज्ञवेदिसंभवे, स्मरति भवती यत् तन्मयोक्तम्—*

---

५ *] पृ॰ १७९
११ *] पृ॰ १७८
५ *] पृ॰ १७८
७ *] पृ॰ २०१

चञ्चद्भुजभ्रमितचण्डगदाभिघातसंचूर्णितोरुयुगलस्य सुयोधनस्य। स्त्यानाव-

बद्धघनशोणितशोणपाणिरुत्तंसयिष्यति कचांस्तव देवि भीमः॥*

§ 510 &

इत्यनेन मुखोपक्षिप्तस्य बीजस्य पुनरुपगमात् संधिरिति। § 511

57 अथ *विबोधः*— § 512

...51b **विबोधः कार्यमार्गणम्।** § 513

यथा रत्नावल्याम्—

**वसुभूतिः** *निरूप्य*

देव, कुत इयं कन्यका ?

**राजा** देवी जानाति।

**वासवदत्ता** *अज्जउत्त, एसा सागरादो पाविअत्ति भणिअ अमच्चजोगंधराअणेण मम हत्थे निहिदा। अदो ज्जेव सागरिअत्ति सद्दावीअदि।

**राजा** *आत्मगतम्*

यौगंधरायणेन न्यस्ता। कथमसौ ममानिवेद्य करिष्यति।*

इत्यनेन रत्नावलीलक्षणकार्यान्वेषणाद् विबोधः। § 514

यथा च वेणीसंहारे—

**भीमः** मुञ्चतु मुञ्चतु मामार्यः क्षणमेकम्।

**युधिष्ठिरः** किमपरमवशिष्टम् ?

**भीमः** सुमहदवशिष्टम्। संयमयामि तावदनेन दुःशासनशोणितोक्षितेन पाणिना पाञ्चाल्या दुःशासनावकृष्टं केशहस्तम्।

**युधिष्ठिरः** गच्छतु भवान्। अनुभवतु तपस्विनी वेणीसंहारम्।*

इत्यनेन केशसंयमनकार्यस्यान्वेषणाद् विबोध इति। § 515

अथ *ग्रथनम्*— § 516

---

२ *] वे० सं० १।२१

१ अथ] A.T.A. and Bahurūpamiśra read *virodhaḥ* in the place of *vibodhaḥ*, all through.

७ *] ‘आर्यपुत्र, एषा सागरात् प्राप्तेति भणित्वामात्ययौगंधरायणेन मम हस्ते निहिता, अत एव सागरिकेति शब्द्यते।’ इति च्छाया.

१० *] पृ० १७९

१७ *] पृ० २००

...51c **ग्रथनं तदुपक्षेपो** § 517

यथा रत्नावल्याम्—

**यौगंधरायणः** देव, क्षम्यतां यद्देवस्यानिवेद्य मयैतत् कृतम्।*

इत्यनेन वत्सराजस्य रत्नावलीप्रापणकार्योपक्षेपाद् ग्रथनम्। § 518

यथा च वेणीसंहारे—

**भीमः** पाञ्चालि, न खलु मयि जीवति संहर्तव्या दुःशासनविलुलिता वेणिरात्मपाणिना। तिष्ठतु। स्वयमेवाहं संहरामि।*

इत्यनेन द्रौपदीकेशसंयमनकार्यस्योपक्षेपाद् ग्रथनम्। § 519

अथ *निर्णयः*— § 520 58

...51d **ऽनुभूताख्या तु निर्णयः॥ ५१॥** § 521

यथा रत्नावल्याम्—

**यौगंधरायणः** *कृताञ्जलिः*

देव, श्रूयताम्। इयं सिंहलेश्वरदुहिता सिद्धादेशेनोपदिष्टा, योऽस्याः पाणिं ग्रहीष्यति स सार्वभौमो राजा भविष्यतीति। तत्प्रत्ययादस्माभिः स्वाम्यर्थे बहुशः प्रार्थ्यमानापि सिंहलेश्वरेण देव्या वासवदत्तायाश्चित्तखेदं परिहरता यदा न दत्ता, तदा लावाणिके देवी दग्धेति प्रसिद्धिमुत्पाद्य तदन्तिकं बाभ्रव्यः प्रहितः।*

इत्यनेन यौगंधरायणः स्वानुभूतमर्थं ख्यापितवानिति निर्णयः। § 522

यथा च वेणीसंहारे—

**भीमः** देव देव अजातशत्रो, क्वाद्यापि दुर्योधनहतकः। मया हि तस्य दुरात्मनः—*

भूमौ क्षिप्त्वा शरीरं निहितमिदमसृक्चन्दनाभं निजाङ्गे लक्ष्मीरार्ये निषिक्ता चतुरुदधिपयः सीमया सार्धमुर्व्या। भृत्या मित्राणि योधाः कुरुकुलमखिलं दग्धमेतद्रणाग्नौ नामैकं यद् ब्रवीषि क्षितिप तदधुना धार्तराष्ट्रस्य शेषम्॥* § 524&

इत्यनेन स्वानुभूतार्थकथनान्निर्णय इति। § 525

अथ *परिभाषणम्*— § 526

३ *] पृ० १८३
६ *] पृ० १९६
९ *] पृ० १८३
१२ *] पृ० १९८
१५ *] वे० सं० ६।३९

## ...52a परिभाषा मिथो जल्पः § 527

यथा रत्नावल्याम्—

**रत्नावली** *आत्मगतम्*

*कआवराहा देवीए ण सक्कुणोमि मुहं दंसिदुं।

59 **वासवदत्ता** *सास्रम्। पुनर्बाहू प्रसार्य*

*एहि अयि णिठ्ठुरे, इदाणीं पि बंधुसिणेहं दंसेहि। *अपवार्य* अज्ञउत्त, लज्ञामि क्खु अहं इमिणा णिसंसत्तणेण। ता लहुं अवणेहि से बंधणं।

**राजा** यथाह देवी। *बन्धनमपनयति*

**वासवदत्ता** *वसुभूतिं निर्दिश्य*

*अज्ञ, अमच्चयोगंधरायणेण दुज्ञणीकदम्हि जेण जाणंतेण वि ण णिवेदिदं।*

इत्यनेनान्योन्यवचनात् परिभाषणम्। § 528

यथा च वेणीसंहारे—

**भीमः** कृष्टा येनासि राज्ञां सदसि नृपशुना तेन दुःशासनेन।*

इत्यादिना क्वासौ भानुमती नोपहसति पाण्डवदारान्। इत्यन्तेन भाषणात् परिभाषणम्। § 529

अथ *प्रसादः*— § 530

## ...52b प्रसादः पर्युपासनम्। § 531

यथा रत्नावल्याम्—देव, क्षम्यताम्। इत्यादि दर्शितम्। § 532

यथा च वेणीसंहारे—

**भीमः** *द्रौपदीमुपसृत्य*

देवि पाञ्चालराजतनये, दिष्ट्या वर्धसे रिपुकुलक्षयेण।*

इत्यनेन द्रौपद्या भीमसेनेनाराधितत्वात् प्रसाद इति। § 533

---

३ *] 'कृतापराधा देव्या न शक्नोमि मुखं दर्शयितुम्।' इति च्छाया.
६ *] 'एहि अयि निष्ठुरे, इदानीमपि बन्धुस्नेहं दर्शय। आर्यपुत्र, लज्जे खल्वहमनेन नृशंसत्वेन। तल्लघ्वपनयास्या बन्धनम्।' इति च्छाया.
११ *] 'आर्य, अमात्ययौगंधरायणेन दुर्जनीकृतास्मि येन जानतापि न निवेदितम्।' इति च्छाया.
१२ *] पृ॰ १८१
१५ *] पृ॰ २००
१६ इत्यादिना] पृ॰ २०१
३ त्याम्] पृ॰ १८३
६ *] पृ॰ २००

अथ *नन्दः*— § 534

...52c **आनन्दो वाञ्छितावाप्तिः** § 535

यथा रत्नावल्याम्—

**राजा** यथाह देवी। *रत्नावलीं गृह्णाति* § 536

यथा च वेणीसंहारे— 60

**द्रौपदी** *णाध, विसुमरिदम्हि एदं वावारं। णाधस्स पसादेण पुणो सिक्खिस्सं। *केशान् बध्नाति*

इत्याभ्यां प्रार्थितरत्नावलीकेशसंयमनयोर्वत्सराजद्रौपदीभ्यां प्राप्तत्वादानन्दः। § 537

अथ *समयः*— § 538

...52d **समयो दुःखनिर्गमः॥ ५२॥** § 539

यथा रत्नावल्याम्—

**वासवदत्ता** *रत्नावलीमालिङ्ग्य*

*समस्सस समस्सस बहिणिए।*

इत्यनेन भगिन्योरन्योन्यसमागमेन दुःखनिर्गमात् समयः। § 540

यथा च वेणीसंहारे—

भगवन्, कुतस्तस्य विजयादन्यद् यस्य भगवान् पुराणपुरुषः स्वयमेव नारायणो मङ्गलान्याशास्ते।*

कृतगुरुमहदादिक्षोभसंभूतमूर्तिं गुणिनमुदयनाशस्थानहेतुं प्रजानाम्।
अजममरमचिन्त्यं चिन्तयित्वापि न त्वां भवति जगति

दुःखी किं पुनर्देव दृष्ट्वा॥* § 542&

इत्यनेन युधिष्ठिरदुःखापगमं दर्शयति। § 543

अथ *कृतिः*— § 544

---

६ *] 'नाथ, विस्मृतास्म्येतं व्यापारम्। नाथस्य प्रसादेन पुनः शिक्षिष्ये।' इति च्छाया.
५ *] 'समाश्वसिहि समाश्वसिहि भगिनिके।' इति च्छाया.
५ *] पृ॰ १८०
८ *] पृ॰ २०३
११ *] वे॰ सं॰ ६।४३

...53a
61

## कृतिर्लब्धार्थशमनं § 545

यथा रत्नावल्याम्—

**राजा** को देव्याः प्रसादं न बहु मन्यते।

**वासवदत्ता** *अज्ञउत्त, दूरे से मादुउलं। ता तधा करेसु जधा वंधुअणं न सुमरेदि।*

इत्यन्योन्यवचसा लब्धाया रत्नावल्या राज्ञः सुश्लिष्टये उपशमनात् कृतिरिति। § 546

यथा च वेणीसंहारे—

**कृष्णः** एते खलु भगवन्तो व्यासवाल्मीकि—*

इत्यादिना अभिषेकमारब्धवन्तस्तिष्ठन्ति। इत्यनेन प्राप्तराज्यस्याभिषेकमङ्गलैः स्थिरीकरणं कृतिः। § 547

अथ *भाषणम्*— § 548

...53b

## मानाद्याप्तिश्च भाषणम्। § 549

यथा रत्नावल्याम्—

**राजा** किमतःपरमपि प्रियमस्ति।*

*यातो विक्रमबाहुरात्मसमतां प्राप्तेयमुर्वीतले सारं सागरिका स-
सागरमहीप्राप्त्येकहेतुः प्रिया। देवी प्रीतिमुपागता च भ-
गिनीलाभाज्जिताः कोसलाः किं नास्ति त्वयि सत्यमात्य-
वृषभे यस्मै करोमि स्पृहाम्॥* § 551&

इत्यनेन कामार्थमानादिलाभाद् भाषणमिति। § 552

अथ *पूर्वभावोपगूहने*— § 553

...53cd

## कार्यदृष्टयद्भुतप्राप्ती पूर्वभावोपगूहने॥ ५३॥ § 554

४ *] 'आर्यपुत्र, दूरेऽस्या मातृकुलम्। तत् तथा कुरुष्व यथा बन्धुजनं न स्मरति।' इति च्छाया.
५ *] पृ० १८६
६ सा] N.S.P. *labdhāyāṃ ratnāvalyāṃ*.
८ च] The reference in this context is not clear.
९ *] पृ० २०४
३ *] पृ० १८७
५ *] 'नीतः' इति पाठः
५ *] रत्ना० ४।२०

62

कार्यदर्शनं=पूर्वभावः। यथा रत्नावल्याम्—

**यौगंधरायणः** *एवं विज्ञाय भगिन्याः संप्रति करणीये देवी प्रमाणम्।

**वासवदत्ता** *फुडं एव्व किं ण भणेसि ? पडिवाएहि से रअणमालं त्ति।* इत्यनेन वत्सराजाय रत्नावली दीयताम्। इति कार्यस्य यौगंधरायणाभिप्रायानुप्रविष्टस्य वासवदत्तया दर्शनात् पूर्वभाव इति। § 555

अद्भुतप्राप्तिः=उपगूहनम्। यथा वेणीसंहारे—

*नेपथ्ये*

महासमरानलदग्धशेषाय स्वस्ति भवते राजन्यलोकाय—*

क्रोधान्धैर्यस्य मोक्षात् क्षतनरपतिभिः पाण्डुपुत्रैः कृतानि प्रत्याशं मुक्त-
केशान्यनुदिनमधुना पार्थिवान्तःपुराणि। कृष्णायाः केशपाशः

कुपितयमसखो धूमकेतुः कुरूणां दिष्ट्या बद्धः प्रजानां
विरमतु निधनं स्वस्ति राजन्यकेभ्यः॥* § 557&

**युधिष्ठिरः** देवि, एष ते मूर्धजानां संहारोऽभिनन्दितो नभस्तलचारिणा सिद्धजनेन।

इत्येतेनाद्भुतार्थप्राप्तिरुपगूहनमिति। लब्धार्थशमनात् कृतिरपि भवति। § 558

अथ *काव्यसंहारः*— § 559

...54a वराप्तिः कार्यसंहारः § 560

यथा—किं ते भूयः प्रियमुपकरोमि ?* इत्यनेन काव्यार्थसंहरणात् कार्यसंहार इति। § 561

अथ *प्रशस्तिः*— § 562

63

...54b प्रशस्तिः शुभशंसनम्। § 563

यथा वेणीसंहारे—

---

१ *] Printed text has Rājā for Yaugaṃdharāyaṇaḥ, and also there is difference in the reading.

३ *] 'स्फुटमेव किं न भणसि ? प्रतिपादयास्मै रत्नमालामिति।' इति च्छाया.

३ *] पृ० १८५

७ *] पृ० २०२

१० *] वे० सं० ६।४२

२ संहारः] N.S.P. has *kāvyasaṃhāra*, and *kāvyārthasaṃharaṇāt*.

३ *] वे० सं० २०५

प्रीततरश्चेद् भवान्, तदिदमेवमस्तु—*

*अकृपणमतिः कामं जीव्याज्जनः पुरुषायुषं भवतु भगवन्
भक्तिर्द्वैतं विना पुरुषोत्तमे।
कलितभुवनो विद्वद्बन्धुर्गुणेषु विशेषवित् सततसुकृती भूयाद्
भूपः प्रसाधितमण्डलः॥* § 566

इति शुभशंसनात् प्रशस्तिः। § 567

इत्येतानि चतुर्दश निर्वहणाङ्गानि। एवं चतुःषष्ट्यङ्गसमन्विताः पञ्चसंधयः प्रतिपादिताः। § 568

षट्प्रकारं चाङ्गानां प्रयोजनमित्याह— § 569

...54cd उक्ताङ्गानां चतुःषष्टिः षोढा चैषां प्रयोजनम्॥ ५४॥
§ 570

कानि पुनस्तानि षट् प्रयोजनानि— § 571

...55 इष्टस्यार्थस्य रचना गोप्यगुप्तिः प्रकाशनम्।
रागः प्रयोगस्याश्चर्यं वृत्तान्तस्यानुपक्षयः॥ ५५॥ § 573

विवक्षितार्थनिबन्धनं गोप्यार्थगोपनं प्रकाश्यार्थप्रकाशनमभिनयराग-वृद्धिश्चमत्कारित्वं च काव्यस्येतिवृत्तस्य विस्तर इत्यङ्गैः षट् प्रयोजनानि संपाद्यन्त इति। § 574
64

नन्वङ्गिनि सति तेनैवालम्। किमङ्गैः। तत्राह इष्टस्येति। विवृणोति विव-क्षितार्थेति। अङ्गिना एकेनैव बहूनि परस्परविरुद्धानि च प्रयोजनानि संपाद-यितुं न शक्यन्ते। तस्माद् बहूनामेव तदङ्गानां बहुविधप्रयोजनसंपादकत्वात् सप्रयोजनत्वमिति। अभिनयरागवृद्धिरिति। अभिनयदर्शनेन सामाजिकानां कुतूहलवृद्धिरित्यर्थः। आश्चर्यमित्यस्य विवरणं काव्यस्य चमत्कारित्वमिति। § 575

पुनर्वस्तुविभागमाह— § 576

---

१ *] पृ॰ २०६
२ *] 'अकृपणमरुक्श्रान्तं जीव्यात्' इति पाठः.
३ *] वे॰ सं॰ ६।४६

५ त्कारित्वं] N.S.P. *abhineyarāga*, etc.

...56 द्वेधा विभागः कर्तव्यः सर्वस्यापीह वस्तुनः।
सूच्यमेव भवेत् किंचिद् दृश्यश्राव्यमथापरम्॥ ५६॥
§ 578

कीदृक् सूच्यं, कीदृग् दृश्यश्राव्यमित्याह— § 579

...57 नीरसोऽनुचितस्तत्र संसूच्यो वस्तुविस्तरः।
दृश्यस्तु मधुरोदात्तरसभावनिरन्तरः॥ ५७॥ § 581

पूर्वं वस्तुनः प्रख्यातोत्पाद्यत्वादिविभागप्रदर्शनक्रमेण साङ्गाः संधय उक्ताः। पुनस्तस्यैव विभागमाहेति दर्शयति पुनर्वस्तुविभागमाहेति। सर्वस्यापीति। न केवलमाधिकारिकस्य प्रासङ्गिकात्मनोऽपीत्यर्थः। सूच्यमेवेति। न कदाचित् तस्याङ्कप्रवेश इत्यर्थः। किंचित् सूच्यमेव। अपरम्=असूच्यम्। दृश्यं च श्राव्यं च दृश्यश्राव्यम्। एवं च वस्तु सूच्यासूच्यात्मना द्विविधम्। असूच्यं तु पुनर्द्विविधं दृश्यं श्राव्यं च। तेन फलतो वस्तुनः सूच्यं दृश्यं श्राव्यमिति त्रैविध्यं निष्पन्नमिति। § 582

सूच्यस्य प्रतिपादनप्रकारमाह— § 583

...58 अर्थोपक्षेपकैः सूच्यं पञ्चभिः प्रतिपादयेत्।
विष्कम्भचूलिकाङ्कास्याङ्कावतारप्रवेशकैः॥ ५८॥
§ 585

अस्मिन् त्रिविधेऽपि वस्तुनि सूच्यदृश्ययोः व्यवस्थामुक्त्वा श्राव्यं पश्चाद् 65
वक्ष्यन् सूच्यस्य वस्तुनः सूचनप्रकारं प्रतिपादयति अर्थोपक्षेपकैरित्यादिना। § 586

तत्र *विष्कम्भः*— § 587

...59 वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः।
संक्षेपार्थस्तु विष्कम्भो मध्यपात्रप्रयोजितः॥ ५९॥
§ 589

७ न] In T.MS. and M.G.T. *na* is missing.

अतीतानां भाविनां च कथावयवानां ज्ञापको मध्यमेन मध्यमाभ्यां वा पात्राभ्यां प्रयोजितो विष्कम्भक इति। § 590

मध्यपात्रप्रयोजित इति। एनं समासं मध्येन प्रयोजितः मध्याभ्यां वा प्रयोजित इति विगृह्णाति मध्येन मध्याभ्यां वा प्रयोजित इति। § 591

स द्विविधः—*शुद्धः, संकीर्ण*श्चेत्याह— § 592

...60ab **एकानेककृतः शुद्धः संकीर्णो नीचमध्यमैः।** § 593

एकेन द्वाभ्यां वा मध्यमपात्राभ्यां शुद्धो भवति। मध्यमाधमपात्रैर्युगपत् प्रयोजितः संकीर्ण इति। § 594

एकं वा द्वे वा यदा मध्ये एव पात्रे तदा विजातीयसंस्पर्शाभावात् न संकीर्णता भवति। नीचपात्रसंस्पर्शात्तु विजातीयानुप्रवेशात् संभवत्येव। तेन यदा एकेन मध्यमपात्रेण एकेन नीचपात्रेण द्वित्वं भवति तदानीमेव सांकर्यमुक्तमित्याह मध्यमाधमपात्रैरिति। एकस्मिन्नर्थेऽप्युक्तिप्रत्युक्तिक्रमात् प्रतिपाद्यमाने सति सांकर्यम्। तेनाह युगपदिति। § 595

अथ *प्रवेशकः*— § 596

...60cd **तद्वदेवानुदात्तोक्त्या नीचपात्रप्रयोजितः॥ ६०॥** § 597

66 ...61ab **प्रवेशोऽङ्कद्वयस्यान्तः शेषार्थस्योपसूचकः।** § 598

तद्वदेवेति भूतभविष्यदर्थज्ञापकत्वमतिदिश्यते। अनुदात्तोक्त्या नीचेन नीचैर्वा पात्रैः प्रयोजित इति विष्कम्भलक्षणापवादः। अङ्कद्वयस्यान्तरिति प्रथमाङ्के प्रतिषेध इति। § 599

चरमोक्तोऽपि प्रवेशकस्तद्वदेवेत्यतिदेशसौकर्याय विष्कम्भानन्तरमेव लक्षितः। तद्विवृणोति तद्वदेवेति। नन्वतिदेशप्राप्तश्चेत् सर्वोऽपि विष्कम्भधर्मः किमुपदेशेनेति विमृशन्तं प्रतीदमेवातिदिश्यत इत्याह तद्वदेवेति भूतभविष्यद-

३ मासं] *madhya* is derived by the rule *asāṃpratike* (Pāṇini IV.३.९) in the sense of *utkarṣāpakarṣahīna*. And in this context is means a *pātra* which is neither *uttama* nor *nīca*. From the comments of Bh.Nṛ. it seems *madhyena madhyābhyāṃ vā* should be the reading in the *Avaloka*. MSS. read *madhyamena*, etc.

३ स्यान्तः] 'अन्ते' इति पाठः.

५ रिति] N.S.P. *ante iti*.

र्थज्ञापकत्वमिति। अनुदात्तोक्त्येति पात्रानुगुण्येनोक्तावपि नोदात्तत्वमित्युच्यते। नीचपात्रप्रयोजित इत्यनेन एकं द्वे बहूनि वा पात्राणि स्युः तानि सर्वाणि नीचान्येवेति वदन् संकीर्णतामात्रं निवारयति। अङ्कद्वयस्यान्तरिति। अनेन विष्कम्भो हि द्वयोर्मध्यमात्रम्। एतेन प्रथमाङ्केऽपि प्रथमतः प्रस्तावनां कृत्वा उपर्यङ्के क्रियमाणे मध्यमस्तीति स्यादेव। प्रवेशकस्तु पूर्वं निक्षिप्तेऽप्यङ्के एव भवतीति प्रथमाङ्के फलतः प्रतिषिद्धो भवतीत्याह प्रथमाङ्के प्रतिषेध इति। § 600

अथ *चूलिका*— § 601

...61cd *अन्तर्जवनिकासंस्थैश्चूलिकार्थस्य सूचना॥ ६१॥
§ 602

नेपथ्यपात्रेणार्थसूचनं = चूलिका। यथोत्तरचरिते द्वितीयाङ्कस्यादौ—
*नेपथ्ये*
स्वागतं तपोधनायाः।
*ततः प्रविशति तपोधना*
* इति नेपथ्यपात्रेण वासन्तिकया आत्रेय्याः सूचनात् चुलिका। § 603
यथा वा वीरचरिते चतुर्थाङ्कस्यादौ
*नेपथ्ये*
भो भो वैतालिकाः,* प्रवर्त्यन्तां प्रवर्त्यन्तां मङ्गलानि—*

कृशाश्वान्तेवासी जयति भगवान् कौशिकमुनिः सहस्रांशोर्वंशे जग-
ति विजयि क्षत्रमधुना। विनेता क्षत्रारेर्जगदभयदानव्रतधरः 67
शरण्यो लोकानां दिनकरकुलेन्दुर्विजयते॥* § 605&
इत्यत्र नेपथ्यपात्रैर्देवै रामेण परशुरामो जित इति सूचनात् चूलिका। § 606

अथाङ्कास्यम्— § 607

...62ab अङ्कान्तपात्रैरङ्कास्यं छिन्नाङ्कस्यार्थसूचनात्। § 608

---

१ ते] *Abhinavabhāratī* says *udāttaṃ saṃskṛtaṃ vacanam* (G.O.S. vol. II, p. ४२४).
२ *] 'अन्तर्यवनिका' इति पाठः.
७ *] पृ॰ ५१
९ *] N.S.P. *vaimānikāḥ*.
९ *] पृ॰ ११७
१२ *] वी॰ च॰ ४।१

अङ्कान्त एव पात्रमङ्कान्तपात्रम्। तेन विश्लिष्टस्योत्तराङ्कमुखस्य सूचनं तद्वशेनोत्तराङ्कावतारोऽङ्कास्यमिति। यथा वीरचरिते द्वितीयाङ्कान्ते—

*प्रविश्य*

**सुमन्त्रः** भगवन्तौ वसिष्ठविश्वामित्रौ भवतः सभार्गवानाह्वयतः।

**इतरे** क्व भगवन्तौ ?

**सुमन्त्रः** महाराजदशरथस्यान्तिके।

**इतरे** तदनुरोधात् तत्रैव गच्छामः।*

इत्यङ्कसमाप्तौ

*ततः प्रविशन्त्युपविष्टा वसिष्ठविश्वामित्रपरशुरामाः*

इत्यत्र पूर्वाङ्कान्त एव प्रविष्टेन सुमन्त्रपात्रेण शतानन्दजनककथार्थविच्छेद उत्तराङ्कमुखसूचनादङ्कास्यमिति। § 609

नन्वङ्कमध्ये प्रविष्टमङ्कान्तं यावदनुवर्तमानमपि पात्रमङ्कान्तपात्रमिति वक्तुं शक्यते यथाङ्कावतारे तत्राह अङ्कान्त एवेति। वक्ष्यमाणाङ्कार्थसूचनाय अङ्कान्ते एव प्रविष्टं पात्रमङ्कान्तपात्रमित्यर्थः। विश्लिष्टस्येति। अङ्कावतारत्वं मा प्रसाङ्क्षीदित्युक्तस्य विच्छेदस्य विवरणमित्युक्तं भवति। उत्तराङ्कमुखस्येत्यनेन आस्यशब्दं समञ्जसयति। मुखस्यावयवो ह्यास्यम्। तस्माद् येन दष्टो भवति पूर्वाङ्कस्तदङ्कास्यमित्युक्तं भवति। तद्वशेनाङ्कावतार इति फलितमर्थमाह। § 610

अथा*ङ्कावतारः*— § 611

...62cd अङ्कावतारस्त्वङ्कान्ते पातोऽङ्कस्याविभागतः॥ ६२॥

§ 612

68 ...63ab एभिः संसूचयेत् सूच्यं दृश्यमङ्कैः प्रदर्शयेत्। § 613

यत्र प्रविष्टपात्रेणासूचित एव पूर्वाङ्काविच्छिन्नार्थतयैवाङ्कान्तरमापतति प्रवेशकविष्कम्भकादिशून्यः सोऽङ्कावतारः। यथा मालविकाग्निमित्रे प्रथमाङ्कान्ते—

---

७ *] पृ० ८२

१५ ति] In T.MS. and Gr.MS. *uktaṃ bhavati* is not found.

२ ङ्कान्ते] ‘पात्राङ्कस्य’ इति पाठः.

४ त्र] N.S.P. *praviṣṭamātreṇa sūcitam eva.*

६ *] ‘तेन हि द्वावपि देव्याः प्रेक्षागेहं गत्वा संगीतकोपकरणं कृत्वा तत्रभवतो दूतं विसर्जयतम्। अथवा मृदङ्गशब्द एवैनमुत्थापयिष्यति।’ इति च्छाया.

६ दुअ] N.S.P. *aria.*

**विदूषकः** *तेण हि दुवेवि देवीए पेक्खागेहं गदुअ संगीदोवअरणं कदुअ तत्थभवदो दूदं विसज्जेध। अधवा मुदंगसद्दो एव्व णं उत्थावयिस्सदि।* इत्युपक्रमे मृदङ्गशब्दश्रवणानन्तरं सर्वाण्येव पात्राणि प्रथमाङ्कप्रक्रान्तपात्रसंक्रान्तिदर्शनं द्वितीयाङ्कादावारभन्त इति प्रथमाङ्कार्थाविच्छेदेनैव द्वितीयाङ्कस्यावतरणादङ्कावतार इति। § 614

अङ्कावतारलक्षणमुक्तं विवृणोति यत्रेति। यत्र सूचनार्थेन पात्रान्तरप्रवेशेन विना पूर्वाङ्कप्रविष्टपात्राण्येव पात्राणि कृत्वा पूर्वाङ्काविभागेन उत्तराङ्क समापतति सोऽङ्कावतारः। अविभागत इत्यस्य विवरणम् असूचित एवेति। पृथक् सूचनविरहिण्येव उत्तराङ्कपात्रप्रवेशे पूर्वाङ्कस्थसूचनमात्रेण यत्र तेनाविभागतः उत्तराङ्कः समापतति सोऽङ्कावतार इत्यर्थः। पूर्वाङ्केणोत्तराङ्कस्याविभागेन पातश्च पात्रैकत्वं च यदि स्यात् तदानीमङ्कभेदो न स्यादिति चेत् इतिवृत्तभेदस्यापि भेदकत्वात्। तथैवोदाहरति यथेत्यादिना। § 615

पुनस्त्रिधा वस्तुविभागमाह— § 616

...63cd नाट्यधर्ममवेक्ष्यैतत् पुनर्वस्तु त्रिधेष्यते॥ ६३॥ § 617

केन प्रकारेण त्रैधं तदाह— § 618

...64ab सर्वेषां नियतस्यैव श्राव्यमश्राव्यमेव च। § 619

तत्र— § 620 69

...64cd सर्वश्राव्यं प्रकाशं स्यादश्राव्यं स्वगतं मतम्॥ ६४॥ § 621

सर्वश्राव्यं यद् वस्तु तत् प्रकाशमित्युच्यते। यत्तु सर्वस्याश्राव्यं तत् स्वगतमितिशब्दाभिधेयम्। § 622

वस्तुनः सूच्यत्वं दृश्यत्वं च दर्शितम्। अथ श्राव्यत्वमवशिष्यते। तत्प्रदर्शनप्रकारमाह पुनरिति। प्रसिद्धमित्येवास्माभिर्वस्तु न प्रदर्श्यते किं तु

---

१ *] पृ॰ २१
७ तारः] The lines from here up to *ity arthaḥ* are missing in T.MS.
७ त] Gr.MS. and M.G.T. read *avibhāgaḥ*.
८ वेशे] M.G.T. reads *uttarāṅkapātrapraveśapūrvāṅkasūcanamātreṇa*.
९ र्थः] *na* is missing in T.MS. M.G.T. reads *asmābhiḥ pūrvaṃ tu na dṛśyate*. Tri.MS. reads *pūrvas tu na pradarśyate*. Gr.MS. reads *asmābhir vastunaḥ pradarśyate*.
१० न]

प्रसिद्धं च नाट्योपयुक्तं चेत्युक्तं नाट्यधर्ममवेक्ष्येति। सर्वेषामिति। सर्वेषां श्राव्यं, नियतस्यैव श्राव्यं, सर्वेषामश्राव्यं चेत्यर्थः। सर्वत्वं चात्र नायकव्यतिरिक्तापेक्षया। *ननु नाटकादौ च सर्वश्राव्यं सर्वाश्राव्यमित्युक्तिः क्वचिन्न दृष्टा। तत्रोक्तं सर्वश्राव्यमित्यादि। तद् विवृणोति सर्वश्राव्यं यद् वस्त्विति। § 623

नियतश्राव्यमाह— § 624

...65ab द्विधान्यन्नाट्यधर्माख्यं जनान्तमपवारितम्। § 625

अन्यत्तु नियतश्राव्यं द्विप्रकारं जनान्तिकापवारितभेदेन। § 626

तत्र *जनान्तिक*माह— § 627

...65cd त्रिपताकाकरेणान्यानपवार्यान्तरा कथाम्॥ ६५॥ § 628

...66ab अन्योन्यमन्त्रणं यत् स्याज्जनान्ते तज्जनान्तिकम्। § 629

यस्य न श्राव्यं तमन्तरा ऊर्ध्वसर्वाङ्गुलं वक्रानामिकं त्रिपताकालक्षणं करं कृत्वान्येन सह यन्मन्त्र्यते तज्जनान्तिकमिति। § 630

70 अथा*पवारितम्*— § 631

...66cd रहस्यं कथ्यतेऽन्यस्य परावृत्यापवारितम्॥ ६६॥ § 632

परावृत्यान्यस्य रहस्यकथनमपवारितमिति। § 633

परावृत्येति। अन्येन सह कथयन् ततः परावृत्य अन्यकर्णे यत् कथयति तदपवारितमित्यर्थः। § 634

नाट्यधर्मप्रसङ्गादाकाशभाषितमाह— § 635

३ *] After *nāyakavyatiriktāpekṣayā* all the MSS. read *tathā vivṛṇoti sarvāśrāvyaṃ yad vastv iti.* Its significance is not clear to me.

४ रा] N.S.P. *tasyāntare*, and *vakrānāmikatripatākālakṣaṇam.*

...67 किं ब्रवीष्येवमित्यादि विना पात्रं ब्रवीति यत्।
श्रुत्वेवानुक्तमप्येकस्तत् स्यादाकाशभाषितम्॥ ६७॥
§ 637

स्पष्टार्थः। § 638

नाट्यधर्मप्रसङ्गादिति। स्वयमप्रसक्तस्याप्याकाशभाषितस्य नाट्यधर्माणां प्रसक्तत्वादस्यापि नाट्यधर्मत्वाच्च तत्प्रसङ्गादेतदुच्यत इत्यर्थः। § 639

अन्यान्यपि नाट्यधर्माणि प्रथमकल्पादीनि कैश्चिदुदाहृतानि। तेषामभारतीयत्वान्नाममात्रप्रसिद्धानां केषांचिद् देशभाषात्मकत्वान्नाट्यधर्मत्वाभावाल्लक्षणं नोक्तमित्युपसंहरति— § 640

...68 इत्याद्यशेषमिह वस्तुविभेदजातं रामायणादि च
विभाव्य बृहत्कथां च।
आसूत्रयेत् तदनु नेतृरसानुगुण्या- च्चित्रां
कथामुचितचारुवचःप्रपञ्चैः॥ ६८॥ § 642

इति धनंजयविरचिते दशरूपके प्रथमः प्रकाशः

अन्यान्यपीति। न खलु प्रसिद्धं सर्वमस्माभिरुच्यते। किंतु प्रसिद्धत्वे सति 71
नाट्यधर्मतया यद् भरतपरिगृहीतं तदेवोच्यते। प्रथमकल्पादीनां तु प्रसिद्धत्वेऽपि नाट्यधर्मत्वेन भरतपरिग्रहाभावादस्माभिर्नोच्यत इत्यर्थः। प्रथमपरिच्छेदोक्तस्य वस्तुप्रपञ्चस्योपसंहारः क्रियत इत्याह इत्यादीति। अस्यार्थः। उक्तं ह्यस्माभिरितिहासोद्भूतं लोकोद्भूतं च रूपकाणामितिवृत्तं भवतीति। तदासूत्रयन् नाटकादिकर्ता इतिहासं रामायणादि बृहत्कथादि च सम्यगवलोक्य आसूत्रयेत्। आसूत्रयंश्च नायकरसयोरानुगुण्येन वचनौचित्येन चासूत्रयेदिति। § 644

*वस्तुविभेदजातं—वस्तु वर्णनीयं, तस्य विभेदजातं नाना भेदाः। रामायणादि बृहत्कथां च गुणाढ्यनिर्मितां विभाव्य आलोच्य। तदनु एतदुक्त-

२ सिद्धानां] N.S.P. *nāmamālāprasiddhānām*.
४ जातं] A.T.A. -*viśeṣajātam*.
१ *] The portion given within brackets in N.S.P. (as here) is also not found in A.T.A.
१ जातं] The portion within brackets (which is not found in A.T.A.) is however found in the second Adyar MS. No. ७३३५५ of the *Avaloka*. (No. १७५५ in vol. V of the D.C. of the Kāvya MSS.) This second MS. gives in some places readings different from those given in the N.S.P. edition. Instead of *nāmabhedaḥ* of the N.S.P., this reads *nānā bhedāḥ*, which seems to be better.

रम्। नेत्रिति। नेता वक्ष्यमाणलक्षणः, रसाश्च तेषामानुगुण्याच्चित्रां चित्ररूपां कथामाख्यायिकाम्। चारूणि यानि वचांसि तेषां प्रपञ्चैर्विस्तारैरासूत्रयेद-नुग्रथयेत्। तत्र बृहत्कथामूलं मुद्राराक्षसम्—

चाणक्यनाम्ना तेनाथ शकटालगृहे रहः।
कृत्यां विधाय सप्ताहात् सपुत्रो निहतो नृपः॥ § 647

योगानन्दे यशःशेषे पूर्वनन्दसुतस्ततः।
चन्द्रगुप्तो धृतो राज्ये चाणक्येन महौजसा॥ § 649

इति बृहत्कथायां सूचितम्। *रामायणोक्तकथामूलं वीर-चरितादि। आदिपदात् भारताद्युक्तदुष्यन्तशकुन्तलादिकथामूलमभिज्ञान-शाकुन्तलादि ज्ञेयम्। § 650

इति श्रीविष्णुसूनोर्धनिकस्य कृतौ दशरूपावलोके [१]वस्तुविभागो नाम प्रथमः प्रकाशः समाप्तः

इति धनिककृतस्य दशरूपकावलोकस्य भट्टनृसिंहकृतायां टीकायां प्रथमः परिच्छेदः[२]

# २ द्वितीयः प्रकाशः

१. *vastuvibhāgo nāma* is missing in N.S.P. The expressions *Daśarūpāvaloka* and *Daśarūpakāvaloka* are both correct, as the basic text is known as the *Daśarūpa* and the *Daśarūpaka*, mentioned by Dhanaṃjaya himself. See the *Daśarūpaka* I.२, and IV.८७, and III.७६.

२. M.G.T. and T.MS. read *paricchedaḥ*. Gr.MS. reads *prakāśaḥ*.

५ साहात्] The portion within brackets is to be taken as a later interpolation, as these two verses are found in Kṣemendra's *Bṛhatkathāmañjarī*, which contains readings slightly different from the ones given in the N.S.P. --- Instead of the readings found in ṭhe *Bṛhatkathāmañjarī* (N.S.P., १९३१, page २४) (as given in this edition within brackets) as *saptāhāt, yogānande, dhṛto* and *rājye*, the *DR* of the N.S.P. gives respectively *sahasā, yogānandayaśaśśeṣe* (compound form), *kṛto*, and *rājā*.

८ *] The two sentences *rāmāyaṇokta-*, etc. are found in the second Adyar MS. of the *Avaloka*. The *DR* of the N.S.P. reads, instead of these, as *śrīrāmāyaṇoktaṃ rāmakathādi jñeyam*.

रूपकाणामन्योन्यं भेदसिद्धये वस्तुभेदं प्रतिपाद्येदानीं नायकभेदः प्रतिपाद्यते— § 653 73

...1 नेता विनीतो मधुरस्त्यागी दक्षः प्रियंवदः।
रक्तलोकः शुचिर्वाग्मी रूढवंशः स्थिरो युवा॥ १॥
§ 655

...2 *बुद्ध्युत्साहधृतिप्रज्ञाकलामानसमन्वितः।
शूरो दृढश्च तेजस्वी शास्त्रचक्षुश्च धार्मिकः॥ २॥
§ 657

## द्वितीयः परिच्छेदः[१]

वृत्तवर्तिष्यमाणकथनेन पूर्वोत्तरप्रकाशौ संगमयति रूपकाणामिति। एकार्थत्वेऽपि प्रत्यययोः प्रसिद्धिप्राचुर्येणाह नेता नायक इति। शुचिः बाह्यान्तःकरणयोर्मालिन्यरहितः। वाग्मी=समीचीनत्वे सति बहुभाषी। प्रख्याताभिजनो रूढवंशः। यौवनशाली युवा। निर्णययुक्तं ग्रहणं बुद्धिः। उद्योगहेतुः प्रयत्न उत्साहः। धृतिर्धैर्यम्। गीतादिः कला। मानोऽभिमानः।
§ 658

नेता=नायकः। विनीतो=विनयवान्। § 659
यथा वीरचरिते—

यद् ब्रह्मवादिभिरुपासितवन्द्यपादे विद्यातपोव्रतनिधौ तपतां वरिष्ठे।
दैवात् कृतस्त्वयि मया विनयापचारस्तत्र प्रसीद भगवन्नयमञ्जलिस्ते॥* § 662

§ 663

१. Only M.G.T. gives this heading.

५ *] The reading found in the MSS. is *-smṛti-* (instead of *dhṛti*) which is also given as such by B.M. From Bh.Nṛ's comments it appears that it should be *dhṛti*, and not *smṛti*.
१३ =] N.S.P. *nāyako vinayādiguṇasaṃpanno bhavatīti. tatra vinītaḥ.*
१६ *] ४।२१

74 मधुरः = प्रियदर्शनः। यथा तत्रैव—

राम राम नयनाभिरामतामाशयस्य सदृशीं समुद्वहन्।
अप्रतर्क्यगुणरामणीयकः सर्वथैव हृदयंगमोऽसि मे॥* § 666

§ 667

*त्यागी = सर्वस्वदायकः। यथा—

त्वचं कर्णः शिबिर्मांसं जीवं जीमूतवाहनः।
ददौ दधीचिरस्थीनि नास्त्यदेयं महात्मनाम्॥ § 670

§ 671

दक्षः=क्षिप्रकारी। यथा—

स्फूर्जद्वज्रसहस्रनिर्मितमिव प्रादुर्भवत्यग्रतो रामस्य
त्रिपुरान्तकृद्दिविषदां तेजोभिरिद्धं धनुः।
शुण्डारः कलभेन यद्वदचले वत्सेन दोर्दण्डक स्तस्मिन्नाहित
एव गर्जितगुणं कृष्टं च भग्नं च तत्॥* § 674

§ 675

प्रियंवदः= प्रियभाषी। यथा तत्रैव—

उत्पत्तिर्जमदग्नितः स भगवान् देवः पिनाकी गुरु वीर्यं यत्तु
न तद्गिरा पथि ननु व्यक्तं हि तत् कर्मभिः।
त्यागः सप्तसमुद्रमुद्रितमहीनिर्व्याजदानावधिः सत्यं
ब्रह्मतपोनिधेर्भगवतः किं वा न लोकोत्तरम्॥* § 678

§ 679

रक्तलोकः। यथा तत्रैव—

त्रय्यास्त्राता यस्तवायं तनूजस्तेनाद्यैव स्वामिनस्ते प्रसादात्।
*राजन्वन्तो रामभद्रेण राज्ञा लब्धक्षेमाः पूर्णकामाश्चरामः॥*
§ 682

§ 683

---

३ *] वी० च० २। ३७
५ *] A.T.A. *tyāgaḥ = sarvasvadānam.*
११ *] वीरचरिते १। ५३
१५ *] वी० च० २।३६
१९ *] 'राजन्वत्यः' इति पाठः.
१९ रामः] A.T.A. *drāṇ nandantyaḥ pūrṇakāmāś carema.*
१९ *] वी० च० ४।४४

*एवं शुचिवाग्मिरूढवंश्या अप्युदाहार्याः। तत्र शौचं नाम: मनोनैर्मल्यादिना कामाद्यनभिभूतत्वम्। यथा रघौ— 75

का त्वं शुभे कस्य परिग्रहो वा किं वा मदभ्यागमकारणं ते।
आचक्ष्व मत्वा वशिनां रघूणां मनः परस्त्रीविमुखप्रवृत्ति॥*
§ 686

§ 687

वाग्मी। यथा हनुमन्नाटके—

बाह्वोर्बलं न विदितं न च कार्मुकस्य त्रैयम्बकस्य तनिमा तत एष दोषः।
तच्चापलं परशुराम मम क्षमस्व डिम्भस्य दुर्विलसितानि मुदे गुरूणाम्॥* § 690

§ 691

रूढवंशो यथा—

ये चत्वारो दिनकरकुलक्षत्रसंतानमल्ली
मालाम्लानस्तबकमधुपा जज्ञिरे राजपुत्राः।
रामस्तेषामचरमभवस्ताडकाकालरात्रि प्रत्यूषोऽयं
सुचरितकथाकन्दलीमूलकन्दः॥* § 694

§ 695

स्थिरः=वाङ्मनःक्रियाभिरचञ्चलः। यथा वीरचरिते—

प्रायश्चित्तं चरिष्यामि पूज्यानां वो व्यतिक्रमात्।
न त्वेव दूषयिष्यामि शस्त्रग्रहमहाव्रतम्॥* § 698

यथा वा भर्तृहरिशतके—

प्रारभ्यते न खलु विघ्नभयेन नीचैः प्रारभ्य विघ्नविहता विरमन्ति मध्याः।

---

१ *] N.S.P. *evaṃ śaucādiṣv apy udāhāryam*. And the following portion given within brackets in N.S.P. (as here) is not found in A.T.A. too.
४ *] १६।८
८ *] १।३८
१२ *] अनर्घराघवे ३।२१
१४ लः] A.T.A. -*manaḥkāyādibhiḥ*, and gives the example of *prārabhyate* first and then *prāyaścittam*, etc.
१६ *] ३।८

76 विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः *प्रारब्धमुत्तमजना न परित्यजन्ति॥* § 701

§ 702

युवा प्रसिद्धः। बुद्धिः=ज्ञानम्। गृहीतविशेषकरी तु प्रज्ञा। यथा मालविकाग्निमित्रे—

यद्यत् प्रयोगविषये भाविकमुपदिश्यते मया तस्यै।
तत्तद् विशेषकरणात् प्रत्युपदिशतीव मे बाला॥* § 705

स्पष्टमन्यत्। § 706

नेतृविशेषानाह— § 707

...3ab **भेदैश्चतुर्धा ललितशान्तोदात्तोद्धतैरयम्।** § 708

यथोद्देशं लक्षणमाह— § 709

...3cd **निश्चिन्तो धीरललितः कलासक्तः सुखी मृदुः॥ ३॥** § 710

सचिवादिविहितयोगक्षेमत्वाच्चिन्तारहितः। अत एव गीतादिकलाविष्टो भोगप्रवणश्च शृङ्गारप्रधानत्वाच्च सुकुमारसत्त्वाचारो मृदुरिति ललितः। यथा रत्नावल्याम्—

राज्यं निर्जितशत्रु योग्यसचिवे न्यस्तः समस्तो भरः
सम्यक्पालनलालिताः प्रशमिताशेषोपसर्गाः प्रजाः।
प्रद्योतस्य सुता वसन्तसमयस्त्वं चेति नाम्ना धृतिं कामः
काममुपैत्वयं मम पुनर्मन्ये महानुत्सवः॥* § 713

§ 714

77

अथ *शान्तः*— § 715

...4ab **सामान्यगुणयुक्तस्तु धीरशान्तो द्विजादिकः।** § 716

१ *] 'प्रारब्धमुत्तमगुणास्त्वमिवोद्वहन्ति' इति पाठः क्वचित्.
१ *] नीति॰ श्लो॰ २६
६ *] १।५
६ त्वाचारो] A.T.A. *sattvāśrayaḥ*.
९ *] १।१०

विनयादिनेतृसामान्यगुणयोगी धीरशान्तः। द्विजादिक इति विप्रवणिक्सचिवादीनां प्रकरनेतृणामुपलक्षणम्। विवक्षितं चैतत्। तेन नैश्चिन्त्यादिगुणयोगेऽपि विप्रादीनां शान्ततैव न ललित्यम्। यथा मालतीमाधवमृच्छकटिकादौ माधव-चारुदत्तादिः।

तत उदयगिरेरिवैक एव स्फुरितगुणद्युतिसुन्दरः कलावान्।
इह जगति महोत्सवस्य हेतुर्नयनवतामुदियाय बालचन्द्रः॥*
§ 719

इत्यादि। यथा वा—

मखशतपरिपूतं गोत्रमुद्भासितं यत् सदसि
निबिडचैत्यब्रह्मघोषैः पुरस्तात्।
मम निधनदशायां वर्तमानस्य पापै स्तदसदृशमनुष्यैर्घुष्यते
घोषणायाम्॥ § 722

इत्यादि § 723

गुणोपाधयः खल्वमी शान्तादयः शब्दाः। तेनाह सामान्यगुणयोगीति। सामान्यगुणो नायकमात्रगामी गुणः। द्विजादिशब्दः प्रकरणनायकानामुपलक्षणमिति*। विप्रवणिक्सचिवपुरोहितामात्यसार्थवाहादयः प्रकरणनायकाः। ननु गुणोपाधयः खल्वमी शब्दाः। तेन ललित्यादिहेतुभूतगुणयोगे सति किं विप्रादिर्धीरललितो न भवति। यतो नृपतावेव धीरललितत्वादयो व्यवस्थाप्यन्ते। तत्राह विवक्षितं चैतदिति। यद्धीरशान्तो द्विजादीक एव, न तु क्षत्रियादिरिति तद् विवक्षितमित्यर्थः। § 724

अथ *धीरोदात्तः*— § 725 78

...4cd महासत्त्वोऽतिगम्भीरः क्षमावानविकत्थनः॥ ४॥
§ 726

...5ab स्थिरो निगूढाहंकारो धीरोदात्तो दृढव्रतः। § 727

महासत्त्वः=शोकक्रोधाद्यनभिभूतान्तःसत्त्वः। अविकत्थनः=अना- त्मश्लाघनः। निगूढाहंकारः=विनयच्छन्नावलेपः। दृढव्रतः=अङ्गीकृत- निर्वाहको धीरोदात्तः। यथा नागानन्दे—

---

३ योगेऽपि] N.S.P. *guṇasaṃbhave 'pi.*
६ *] मालती° २।१०

१३ *] This seems to be *arthataḥ pratīkanam.*

सिरामुखैः स्यन्दत एव रक्तमद्यापि देहे मम मांसमस्ति। तृप्तिं न
पश्यामि तवैव तावत् किं भक्षणात् त्वं विरतो गरुत्मन्॥*
§ 729 &

§ 730

यथा च रामं प्रति—

आहूतस्याभिषेकाय विसृष्टस्य वनाय च।
न मया लक्षितस्तस्य स्वल्पोऽप्याकारविप्लवः॥ § 733

§ 734

यच्च केषांचित् स्थैर्यादीनां सामान्यगुणानामपि विशेषलक्षणे क्वचित् संकीर्तनं तत् तेषां तत्राधिक्यप्रतिपादनार्थम्। § 735

ननु च कथं जीमूतवाहनादिर्नागानन्दादावुदात्त इत्युच्यते। औदात्त्यं हि नाम सर्वोत्कर्षेण वृत्तिः। तच्च विजिगीषुत्व एवोपपद्यते। जीमूतवाहनस्तु निर्जिगीषुतयैव कविना प्रतिपादितः—

तिष्ठन् भाति पितुः पुरो भुवि यथा सिंहासने किं तथा यत्
संवाहयतः सुखं हि चरणौ तातस्य किं राज्यतः।
किं भुक्ते भुवनत्रये धृतिरसौ भुक्तोज्झिते या गुरो रायासः
खलु राज्यमुज्झितगुरोस्तत्रास्ति कश्चिद् गुणः॥* § 738

इत्यादिना,

पित्रोर्विधातुं शुश्रूषां त्यक्त्वैश्वर्यं क्रमागतम्।
वनं याम्यहमप्येष यथा जीमूतवाहनः॥* § 741

इत्यादिना च।* अतोऽस्यात्यन्तशमप्रधानत्वात् परमकारुणिकत्वाच्च वीतरागादिवच्छान्तता। अन्यच्चात्रायुक्तं यत् तथाभूतं राज्यसुखादौ निरभिलाषं नायकमुपपाद्यान्तरा तथाभूतमलयवत्यनुरागोपवर्णनम्। यच्चोक्तं सामान्यगुणयोगी द्विजादिर्धीरशान्त इति, तदपि पारिभाषिकत्वादवास्तवमित्यभेदकम्। अतो वस्तुगत्या बुद्ध-युधिष्ठिर-जीमूतवाहनादिव्यवहाराः शान्ततामाविर्भावयन्ति। अत्रोच्यते—यत् तावदुक्तं सर्वोत्कर्षेण वृत्तिरौदात्त्यमिति, न तज्जीमूतवाहनादौ परिहीयते न ह्येकरूपैव विजिगीषुता। यः केनापि शौर्यत्यागदयादिनान्यानति शेते स विजिगीषुः, न तु यः पराक्रमेणार्थग्रहादिप्रवृत्तः। *तथात्वे च मार्गदूषकादेरपि धीरोदात्तत्वप्रसक्तिः। रामादेरपि जगत् पालनीयमिति दुष्टनिग्रहे प्रवृत्तस्य नान्तरीयकत्वेन भूम्यादिलाभः। जीमूतवाहनादिस्तु प्राणैरपि परार्थसंपादनाद् विश्वमप्यतिशेत

२ *] ५।१५
२ वः] N.S.P. -*vibhramaḥ*.
१० *] नागा° १।७
१३ *] नाग° १।४

इति धीरोदात्ततमः। यच्चोक्तम्—तिष्ठन् भाति—* इत्यादिना विषयसुखपराङ्मुखतेति, तत् सत्यम्। कार्पण्यहेतुषु स्वसुखतृष्णासु निरभिलाषा एव जिगीषवः। यदुक्तम्—

स्वसुखनिरभिलाषः खिद्यसे लोकहेतोः  प्रतिदिनमथवा ते
वृत्तिरेवंविधैव।
अनुभवति हि मूर्ध्ना पादपस्तीव्रमुष्णं  शमयति परितापं
छाययोपाश्रितानाम्॥* § 744

इत्यादिना। मलयवत्यनुरागोपवर्णनं त्वशान्तरसाश्रयं शान्तनायकतां प्रत्युत निषेधति। शान्तत्वं चानहंकृतत्वं, तच्च विप्रादेरौचित्यप्राप्तमिति वस्तुस्थित्या विप्रादेः शान्तता न स्वपरिभाषामात्रेण। बुद्ध-जीमूतवाहनयोस्तु कारुणिकत्वाविशेषेऽपि सकामनिष्कामकरुणादिभेदाद्भेदः। अतो जीमूतवाहनादेर्धीरोदात्तत्वमिति। § 745

ननु सामान्यद्वारा प्राप्तानां स्थिरत्वादिगुणानां पुनः किमर्थं क्वचिदुदात्तादौ विशेषसंकीर्तनम्। तत्राह यच्चेति। जीमूतव हनादिरुदात्तत्वेनोदाहृतः। तदसहमानश्चोदयति नन्विति। जीमूतवाहनादिः बुद्धादिवच्छान्त एव। स कथमुदात्तत्वेन उदाह्रियत इति चोद्यार्थः। शमप्रधानत्वादिति। शमो नाम मनसो निरभिलाषत्वम्। कारुण्यं परदुःखदुःखित्वम्। वीतरागादिवदिति। बुद्धादिवदित्यर्थः। शान्तत्वं सदपि जीमूतवाहनादेरुपरितनेन मलयवत्यनुरागेण व्याहतमित्याह अन्यच्चात्रेति। यच्च धीरललितत्वादिगुणयोगेऽपि विप्रादिर्धीरशान्त एव न तु धीरललितादिरिति तदपि स्वपरिभाषामात्रं न वास्तवम्। उपपत्तिशून्या स्वसंज्ञा खलु परिभाषेति। तदेतदाह यच्चेति। वस्तुगत्येति। परिभाषां विहायेत्यर्थः। बुद्धयुधिष्ठिरजीमूतवाहनादीति। बुद्धादिसहपाठेन जीमूतवाहनोऽपि तद्वच्छान्त एवेति द्योतयति। अस्य शान्तत्वम् उदात्तत्वाद् विरुद्धम्। तेन जीमूतवाहनः उदात्त एवेति प्रतिपादयितुमारभते अत्रोच्यत इति। ननु उदात्ततया प्रतिपन्नस्य रामादेर्भूम्यादिलाभ एव धीरोदात्तत्वे प्रयोजकः। तत्राह रामादेरपीति। उदात्तत्वपरिपन्थिशमप्रधानत्वं जीमूतवाहनादेः कविनोक्तमिति पूर्वपक्षिणा प्रतिपादितमनुभाष्य परिहरति यच्चोक्तमित्यादिना। न बुद्धादिवदविशिष्टं निरभिलाषित्वमेव जीमूतवाहनादौ। किंतु स्वसुखनिरभिलाषित्वमित्युदाहरणेन दर्शयति यदुक्तमिति। न्यायतः प्राप्तमपि शान्तत्वम् उपरितनेन मलयवत्यनुरागेण व्याहतमित्युक्तं परिहरति मलयवत्यनुरागोपवर्णनं त्विति। प्रत्युतेति। मलयवत्यनुरागोपवर्णनस्य शान्तनायकतां प्रति न केवलं

---

१४ *] N.S.P. *ity anena ca.*
२१ यः] N.S.P. *parāpakāreṇa.*
२२ *] A.T.A. *tathā conmārga-*, etc.
१ *] नागा° १।७

५ *] शाकु° ५।७
९ त्वाविशेषेऽपि] N.S.P. *-karuṇatvādidharmatvād bhedaḥ.*

विरोध एव किं तु तन्निषेध एवेत्यर्थः। यदुक्तं शान्तो द्विजादिक एव न तु क्षत्रियादिरिति तदपि न पारिभाषिकमेव किं तु वास्तवमिति प्रतिपादयति शान्तत्वं चेति। औचित्यप्राप्तमिति। गुणिसंवादो गुणानामौचित्यं यथा जलस्य शैत्यम्, अग्नेरौष्ण्यमितिवत्। बुद्धादिसहपाठेन निरभिलाषित्वं कारुणिकत्वं च जीमूतवाहनादेरुक्तम्। तत्र निरभिलाषित्वं पूर्वमेव परिहृतम्। कारुणिकत्वमिदानीम् औदात्त्याविरुद्धमिति प्रतिपादयति बुद्धजीमूतवाहनयोस्त्विति। उपसंहरति अत इति। § 746

81

अथ *धीरोद्धतः*— § 747

...5cd दर्पमात्सर्यभूयिष्ठो मायाछद्मपरायणः॥ ५॥ § 748

...6ab धीरोद्धतस्त्वहंकारी चलश्चण्डो विकत्थनः। § 749

दर्पः=शौर्यादिमदः। मात्सर्यम्=असहनता। मन्त्रबलेनाविद्यमानवस्तुप्रकाशनं=माया। छद्म=वञ्चनामात्रम्। चलः=अनवस्थितः। चण्डः= रौद्रः। विकत्थनः=स्वगुणशंसी धीरोद्धतो भवति। यथा जामदग्न्यः—कैलासोद्धारसारत्रिभुवनविजय—* इत्यादि। यथा च रावणः—त्रैलोक्यैश्वर्यलक्ष्मीहठहरणसहा बाहवो रावणस्य। इत्यादि। § 750

धीरललितादिशब्दाश्च यथोक्तगुणसमारोपितावस्थाभिधायिनः वत्सवृषभमहोक्षादिशब्दवत्। न जात्या कश्चिदवस्थितरूपो ललितादिरस्ति। तदा हि महाकविप्रबन्धेषु विरुद्धानेकरूपाभिधानमसंगतमेव स्यात्, जातेरनपायित्वात्। यथा च भवभूतिनैक एव जामदग्न्यः—

ब्राह्मणातिक्रमत्यागो भवतामेव भूतये।
जामदग्न्यश्च वो मित्रमन्यथा दुर्मनायते॥* § 753

इत्यादिना रावणं प्रति धीरोदात्तत्वेन कैलासोद्धारसार— इत्यादिभिश्च रामादीन् प्रति प्रथमं धीरोद्धतत्वेन पुनः पुण्या ब्राह्मणजातिः इत्यादिभिश्च

११ द्वारा] T.MS. reads *sāmānyadvāropāttānām.* All others read as given in the text.
२१ म्] Gr. MS. reads what is given in the text. M.G.T. omits *udāttatvāt.* The portion from *śāntatvam* up to *rāmādeḥ* is missing in T.MS.
२६ विशिष्टं] Gr. MS. reads *avaśiṣṭam,* and M.G.T. as *anuśiṣṭam.*
७ *] वी० च० २।१६
१४ *] वी० च० २।१०
१५ त्वेन] वी० च० २।१६
१६ पुनः] वी० च० ४।२२

धीरशान्तत्वेनोपवर्णितः। न चावस्थान्तराभिधानमनुचितम्। अङ्गभूतनायकानां नायकान्तरापेक्षया महासत्त्वतादेरव्यवस्थितत्वात्। अङ्गिनस्तु रामादेरेकप्रबन्धोपात्तान् प्रत्येकरूपत्वादारम्भोपात्तावस्थातोऽवस्थान्तरोपादानमन्याय्यम्। यथोदात्तत्वाभिमतस्य रामस्य छद्मना वालिवधादमहासत्त्वतया स्वावस्थापरित्याग इति। वक्ष्यमाणानां च दक्षिणाद्यवस्थानां पूर्वां प्रत्यन्ययाहृतः इति नित्यसापेक्षत्वेनाविर्भावादुपात्तावस्थातोऽवस्थान्तराभिधानमङ्गाङ्गिनोरप्यविरुद्धम्। § 754

एते धीरललितादिशब्दा यदि व्यवस्थितरूपाभिधायिनः तदानीं महाक- 82
विप्रबन्धेषु एकस्य नायकस्य अव्यवस्थितरूपाभिधानमसंगतमेव स्यात्। अस्ति च तत्। *यद्यव्यवस्थितरूपाभिधायिनः, तदानीमेकस्मिन् प्रबन्धे धीरोदात्तत्वेन परिगृहीतस्यापि नायकस्य धीरोद्धतत्वेनाप्यभिधानं न्याय्यमेव स्यात्। न चैवम्। स्थिते चैवं यथा तेषामव्यवस्थितरूपाभिधायित्वेऽपि प्रबन्धनायकस्य उपात्तरूपाद् रूपान्तराभिधानं न प्रसजेत् तथा वक्तुमारभते धीरललितादिशब्दाश्चेति। द्वैधं शब्दानाम्। केचिद् व्यवस्थितरूपाभिधायिनः यथा गोमहिषादिशब्दाः। केचिदव्यवस्थितरूपाभिधायिनः यथोपाधिशब्दाः। ते ह्येकस्मिन्नेव धर्मिणि भवन्ति यथा देवदत्तः श्यामः पाचको दण्डी चेति। धीरललितादिशब्दाश्च गुणमेवोपाधीकृत्य गुणिनि वर्तन्ते। एक एव हि जामदग्न्यो रावणं प्रति धीरोदात्तो भवति। रामं प्रति प्रथमं धीरोद्धतो भवति पश्चाद् धीरशान्तो भवति। अमीषां शब्दानां जात्यभिधायित्वे नैतद् युज्यते। न हि गोशब्दवाच्यो गौः कदाचित् महिषो भवति। तदाह जातेरनपायित्वादिति। नित्यमेकमनेकवृत्ति हि सामान्यम्। सैव च जातिः। तथा च यावदाश्रयभाविन्यास्तस्याः कथमपाय इति। ननु धीरकलितादिशब्दाः यदि गुणारोपितावस्थाभिधायिनस्तर्हि एकस्यैव नायकस्य उपात्तावस्थातः प्रवन्धेष्ववस्थान्तराभिधानमनुचितं स्यात्। तत्राह न चेति। द्विधा खलु नाय-

---

५ इति] This seems to have reference to *Udāttarāghava* of Māyurāja. See Dhanika's comments on III. २४: *yathā chadmanā vālivadho māyurājenodāttarāghave parityaktaḥ* (and not to *Rāmābhyudaya* of Yaśovarman as noted by B.M. on III. २४).

५ स्थानां] २।६

१० *] This is the reading in M.G.T. and it seems to be so in Gr.MS. too. T.MS. and Tri.MS. read *yady apy avyavasthita-*, etc.

१२ चैवं] *sthite caivam* is missing in Gr.MS. T.MS. reads *asti caivam* which obviously seems to be an error of the scribe.

१२ था] T.MS. reads *teṣām apy avyavasthitarūpābhidhāyitve,* whereas the others read what is given in the text.

१३ जेत्] Only T.MS. reads *na prasajyeta*.

१६ को] This is the reading in Gr.MS. and Tri.MS. T.MS. reads *yācako* instead of *pācako,* and M.G.T. is corrupt here.

काः। कश्चित् प्रधानभूतः। अन्ये तदङ्गभूता इति। तदङ्गभूतानां नायकानां तत्तच्छब्दादिवाच्यो महासत्त्वादिः प्रधाननायकापेक्षावशादव्यवस्थितो भवति। उत्तरोत्तरान् खलु महासत्त्वानपेक्ष्य पूर्वपूर्वो महासत्त्वतया गृहीतोऽपि लघुसत्त्वो भवति। तस्मात् तदभिधायिशब्दोऽपि तत्राव्यवस्थिताभिधायी भवति। अङ्गिनि तु नायके नैवमित्याह अङ्गिनस्त्विति। तस्यापेक्षणीयान्तराभावादित्यर्थः। एतद् व्यतिरेकदृष्टान्तेनोपपादयति यथेति। प्रथममुदात्तत्वेन परिगृहीतस्य रामस्य छद्मना वालिवधः अनुदात्तत्वमापादयतीति तथा न परिग्राह्य इति। नन्वङ्गिन्येव उपात्तावस्थातः अवस्थान्तराभिधानं दृश्यते। यथा प्रथमं ललिततया परिगृहीतस्य पश्चाद् दक्षिणतया। *तथा च प्रथमं शठतया परिगृहीतस्य पुनर्धृष्टतेति। तत्राह वक्ष्यमाणानां चेति। तेषां हि दक्षिणत्वादीनामुत्पत्तिशिष्टैव सापेक्षतेति वक्ष्यते। अन्यस्यां नायिकायामनुरक्तः पूर्वां प्रति दक्षिणः शठो धृष्टो वा भवति। तस्मात् तेषां दाक्षिण्यादीनां नित्यसापेक्षत्वादुपात्तावस्थातोऽवस्थान्तराभिधानमङ्गवदङ्गिनोऽप्यविरुद्धं भवति। एकप्रबन्धगतस्याङ्गिनो नायकस्यावस्थान्तराभिधानमनुचितमित्येतत् नित्यसापेक्षाण्यवस्थान्तराणि विहायेत्यर्थः। § 755

अथ *शृङ्गारनेत्रवस्थाः*— § 756

...6cd स दक्षिणः शठो धृष्टः पूर्वां प्रत्यन्यया हृतः॥ ६॥
§ 757

नायकप्रकरणात् पूर्वां नायिकां प्रत्यन्ययापूर्वनायिकयापहृतचित्तस्त्र्यवस्थो वक्ष्यमाणभेदेन सह चतुरवस्थः। तदेवं पूर्वोक्तानां चतुर्णां प्रत्येकं चतुरवस्थत्वेन षोडशधा नायकः। § 758

तथाविधान् दक्षिणादीनेव दर्शयति अथेति। ननु पूर्वामाद्यां प्रतीत्येतावन्मात्रोक्तौ नायिकां प्रतीति कथं गम्यते। तत्राह नायकप्रकरणादिति। वक्ष्यमाणभेदेन सहेति। अनुकूल इत्यपि हि कश्चिन्नायकभेदो वक्ष्यते। तेन सह शृङ्गारनायकश्चतुरवस्थो भवति—दक्षिणः शठो धृष्टोऽनुकूलश्चेति। तदेवं

---

३ पेक्ष्य] T.MS. reads *pūrvapūrvatayā*.
८ इति] In T.MS. after *udāttatvena* the other words are missing. See Note १६०a to *Daśarūpāvaloka*. Tri.MS. and M.G.T. read *tathā na parigṛhyata iti*. Gr.MS. reads what is given in the text.
९ *] Tri.MS. and Gr.MS. seem to read: *yathā ca prathamaṃ lalitatayā parigṛhītasya paścād dakṣiṇatā. dakṣiṇatayā parigṛhītasya punaḥ śaṭhatā. yathā ca prathamaṃ śaṭhatayā parigṛhītasya punar dhṛṣṭateti.*
१४ त्] What a brilliant comment at the end of the discussion !

धीरललितादीनां नायकानां प्रत्येकं दक्षिणशठधृष्टानुकूलभेदेन चातुर्विध्यात् नायकानां षोडशत्वं भवतीति। § 759

तत्र— § 760

...7a **दक्षिणोऽस्यां सहृदयो** § 761

योऽस्यां ज्येष्ठायां हृदयेन सह व्यवहरति स दक्षिणः। यथा ममैव—

प्रसीदत्यालोके किमपि किमपि प्रेमगुरवो रतिक्रीडाः
कोऽपि प्रतिदिनमपूर्वोऽस्य विनयः।
सविश्रम्भः कश्चित् कथयति च किंचित् परिजनो न चाहं
प्रत्येमि प्रियसखि किमप्यस्य विकृतिम्॥ § 764

§ 765

यथा वा— 84

उचितः प्रणयो वरं विहन्तुं बहवः खण्डनहेतवो हि दृष्टाः।
उपचारविधिर्मनस्विनीनां ननु पूर्वाभ्यधिकोऽपि भावशून्यः॥*
§ 768

§ 769

अथ *शठः*— § 770

...7b **गूढविप्रियकृच्छठः।** § 771

दक्षिणस्यापि नायिकान्तरापहृतचित्ततया विप्रियकारित्वाविशेषेऽपि सहृदयत्वेन शठाद्विशेषः। यथा—

शठोऽन्यस्याः काञ्चीमणिरणितमाकर्ण्य सहसा यदाश्लिष्यन्नेव
प्रशिथिलभुजग्रन्थिरभवः।
तदेतत् क्वाचक्षे घृतमधुमयत्वद्बहुवचो- विषेणाघूर्णन्ती किमपि
न सखी मे गणयति॥* § 774

§ 775

---

९ *] मालविकाग्नि° ३।३
६ *] अमरु° श्लो° १०९

ननु शठाद् दक्षिणस्यापूर्वनायिकापहृतचित्तत्वेन पूर्वां प्रति विप्रियकारित्वाविशेषे सति न किंचिद् भेदमुपलभामहे। तत्राह दक्षिणस्यापीति। घृतमधुमयेन त्वद्वचोविषेण आघूर्णन्तीत्यर्थः। § 776

अथ *धृष्टः*— § 777

...7c **व्यक्ताङ्गवैकृतो धृष्टो** § 778

यथामरुशतके—

लाक्षालक्ष्म ललाटपट्टमभितः केयूरमुद्रा गले वक्त्रे
कज्जलकालिमा नयनयोस्ताम्बूलरागोऽपरः।
85 दृष्टा कोपविधायि मण्डनमिदं प्रातश्चिरं प्रेयसो
लीलातामरसोदरे मृगदृशः श्वासाः समाप्तिं गताः॥* § 781

§ 782

भेदान्तरमाह— § 783

...7d **ऽनुकूलस्त्वेकनायिकः॥ ७॥** § 784

यथा—

अद्वैतं सुखदुःखयोरनुगतं सर्वास्ववस्थासु यद् विश्रामो
हृदयस्य यत्र जरसा यस्मिन्नहार्यो रसः।
कालेनावरणात्ययात् परिणते यत् स्नेहसारे स्थितं भद्रं
तस्य सुमानुषस्य कथमप्येकं हि तत् प्राप्यते॥* § 787

§ 788

किमवस्थः पुनरेषां वत्सराजादिर्नाटिकानायकः स्यादित्युच्यते। पूर्वमनुपजातनायिकान्तरानुरागोऽनुकूलः। परतस्तु दक्षिणः। ननु च गूढविप्रियकारित्वाद् व्यक्तरविप्रियत्वाच्च शाठ्यधार्ष्ट्ये अपि कस्मान्न भवतः। न, तथाविधविप्रियत्वेऽपि वत्सराजादेरा प्रबन्धसमाप्तेर्ज्येष्ठां नायिकां प्रति सहृदयत्वाद् दक्षिणतैव। न चोभयोर्ज्येष्ठाकनिष्ठयोर्नायकस्य स्नेहेन न भवितव्यमिति वाच्यम्, अविरोधात्। महाकविप्रबन्धेषु च—

३ चोविषेण] M.G.T. and Tri.MS. read *viśeṣeṇa*. See also Arjunavarmadeva's comment on this, with which Bh.Nṛ's seems to agree in essence.
५ *] श्लो॰ ६०
५ *] उ॰ च॰ १।३८

स्नाता तिष्ठति कुन्तलेश्वरसुता वारोऽङ्गराजस्वसु- र्द्यूते
रात्रिरियं जिता कमलया देवी प्रसाद्याद्य च।
इत्यन्तःपुरसुन्दरीः प्रति मया विज्ञाय विज्ञापिते
देवेनाप्रतिपत्तिमूढमनसा द्वित्राः स्थितं नाडिकाः॥* § 791

इत्यादावपक्षपातेन सर्वनायिकासु प्रतिपत्त्युपनिबन्धनात्। तथा च 86
भरतः—

मधुरस्त्यागी रागं न याति मदनस्य नापि वशमेति।
अवमानितश्च नार्या विरज्यते स तु भवेज्ज्येष्ठः॥* § 794

इति। अत्र न रागं याति न मदनस्य वशमेति इत्यनेनासाधारण एकस्यां स्नेहो निषिद्धो दक्षिणस्येति। अतो वत्सराजादेराप्रबन्धसमाप्ति स्थितं दाक्षिण्यमिति। षोडशानामपि प्रत्येकं ज्येष्ठमध्यमाधमत्वेनाष्टाचत्वारिंशन्नायकभेदा भवन्ति। § 795

सुमानुषस्येति। शोभनस्य मानुषस्य। मानुषशब्दादण्प्रत्ययेऽपे मानुषमित्येव रूपं भवतीति। गूढविप्रियकारित्वाविशेषेऽपि दक्षिणत्वेनैव व्यवहारे किं कारणमित्यभिप्रेत्य पृच्छति किमवस्थः पुनरिति। नाटिकानायक इति विशिंषन् उभयनायिकावत्त्वं तस्यावश्यंभावीति ब्रूते। प्रष्टा स्वाभिप्रायमभिव्यनक्ति ननु चेति। नन्वेकस्य ज्येष्ठायां दाक्षिण्यमेव, कनिष्ठायां तु स्नेह एव। तत्राह न चेति। एकस्याविरुद्धमनेकनायिकाङ्गीकारमेव तर्शयति महाकविप्रबन्धेषु चेति। नन्वनेन ग्रन्थेन कनिष्ठायां कथमसाधारणस्नेहो निषिद्धः। तत्राह अनुरागं न याति न मदनस्य वशमेतीत्यनेनेति। § 796

सहायानाह— § 797

...8 पताकानायकस्त्वन्यः पीठमर्दो विचक्षणः।
तस्यैवानुचरो भक्तः किंचिदूनश्च तद्गुणैः॥ ८॥ § 799

प्रागुक्तप्रासङ्गिकेतिवृत्तविशेषः पताका। तन्नायकः पीठमर्दः प्रधानेतिवृत्तनायकस्य सहायः। यथा मालतीमाधवे मकरन्दः, रामायणे सुग्रीवः। § 800

सहायान्तरमाह— § 801 87

२ *] अयं श्लोको भोजप्रबन्धेऽपि दृश्यते। श्लो॰ ३०२
६ *] ना॰ शा॰ [GOS] २३।५६
१५ क्ति] *nanu ceti* is missing in T.MS.
१५ स्य] T.MS. and Gr.MS. read *na tv ekasya*, and others give it as *nanv ekasya*.

...9ab **एकविद्यो विटश्चान्यो हास्यकृच्च विदूषकः।** § 802

गीतादिविद्यानां नायकोपयोगिनीनामेकस्या विद्याया वेदिता विटः। हास्यकारी विदूषकः। अस्य च विकृताकारवेषादित्वं हास्यकारित्वेनैव लभ्यते। यथा शेखरको नागानन्दे विटः। विदूषकः प्रसिद्ध एव। § 803

नन्वेकविद्यामात्रेण प्रयोगोपयोगो नास्ति। तत्राह गीतादिविद्यानामित। ननु विदूषकस्य वक्ष्यमाणं विकृताकारवेषादित्वं नोपात्तम्। तत्राह अस्य चेति। § 804

अथ *प्रतिनायकः*— § 805

...9cd **लुब्धो धीरोद्धतः स्तब्धः पापकृद् व्यसनी रिपुः॥**
**९॥** § 806

तस्य नायकस्येत्थंभूतः प्रतिपक्षनायको भवति। यथा रामयुधिष्ठिरयोः रावणदुर्योधनौ। § 807

सूत्रस्यैवं संगतिरित्याह तस्य नायकस्येति। § 808

अथ *सात्त्विका नायकगुणाः*— § 809

...10 **शोभा विलासो माधुर्यं गाम्भीर्यं स्थैर्यतेजसी।**
**ललितौदार्यमित्यष्टौ सत्त्वजाः पौरुषा गुणाः॥ १०॥**
§ 811

तत्र— § 812

...11ab **नीचे घृणाधिके स्पर्धा शोभायां शौर्यदक्षते।** § 813

88 नीचे घृणा यथा वीरचरिते—

उत्तालताडकोत्पातदर्शनेऽप्यप्रकम्पितः।
नियुक्तस्तत्प्रमाथाय स्त्रैणेन विचिकित्सति॥* § 816

§ 817

गुणाधिके स्पर्धा यथा—

---

३ च] N.S.P. omits *ca*.
२ गाम्भीर्यं] ‘धर्य’ इति पाठः.
३ ष्टौ] ‘सात्त्विकाः’ इति पाठः.
५ *] १।३७

एतां पश्य पुरःस्थलीमिह किल क्रीडाकिरातो हरः
कोदण्डेन किरीटिना सरभसं चूडान्तरे ताडितः।
इत्याकर्ण्य कथाद्भुतं हिमनिधावद्रौ सुभद्रापते- मन्दं
मन्दमकारि येन निजयोर्दोर्दण्डयोर्मण्डलम्॥ § 820

§ 821

शौर्यशोभा यथा, ममैव—

अन्त्रैः स्वैरपि संयताग्रचरणो मूर्च्छाविरामक्षणे
स्वाधीनव्रणिताङ्गशस्त्रनिचितो रोमोद्गमं वर्मयन्।
*भुग्नानुद्वलयन् निजान् परभटान् संतर्जयन् निष्ठुरं धन्यो
धाम जयश्रियः पृथुरणस्तम्भे पताकायते॥ § 824

§ 825

दक्षशोभा यथा वीरचरिते—

स्फूर्जद्वज्रसहस्रनिर्मितमिव प्रादुर्भवत्यग्रतो रामस्य
त्रिपुरान्तकृद्दिविषदां तेजोभिरिद्धं धनुः।
शुण्डारः कलभेन यद्वदचले वत्सेन दोर्दण्डक-
स्तस्मिन्नाहित एव गर्जितगुणं कृष्टं च भग्नं च तत्॥* § 828

§ 829

शोभा तूपाधिभेदेन नीचे घृणाकारिणी अधिके स्पर्धाकारिणी शौर्यवती दाक्ष्यवतीति चतुर्धा विभक्ता सूत्रकारेण नीचे इत्यादिना। तथैव सोदाहरणं दर्शयति नीचे घृणा यथेत्यादिना। § 830

अथ *विलासः*— § 831 89

...11cd **गतिः सधैर्या दृष्टिश्च विलासे सस्मितं वचः॥ ११॥**
§ 832

यथा—

दृष्टिस्तृणीकृतजगत्त्रयसत्त्वसारा धीरोद्धता नमयतीव
गतिर्धरित्रीम्।

६ *] N.S.P. reads *bhagnān,* etc. and A.T.A. *-bhaṭān ādharṣayan helayā* at the end of the line.
१० *] १।५३
१३ कारेण] Bh.Nṛ. uses the word *sūtrakāra* with reference to Dhanaṃjaya, the author of the *Daśarūpaka.*

कौमारकेऽपि गिरिवद् गुरुतां दधानो वीरो रसः
किमयमेत्युत दर्प एव॥* § 835

§ 836

अथ *माधुर्यम्*— § 837

...12ab श्लक्ष्णो विकारो माधुर्यं संक्षोभे सुमहत्यपि। § 838

विकारहेतौ सत्यपि मधुरो विकारो माधुर्यम्। यथा—

कपोले जानक्याः करिकलभदन्तद्युतिमुषि स्मरस्मेरं
गण्डोड्डमरपुलकं वक्त्रकमलम्।
मुहुः पश्यञ्शृण्वन् रजनिचरसेनाकलकलं जटाजूटग्रन्थिं
द्रढयति रघूणां परिवृढः॥* § 841

§ 842

अथ *गाम्भीर्यम्*— § 843

...12cd गाम्भीर्यं यत्प्रभावेन विकारो नोपलक्ष्यते॥ १२॥

§ 844

मृदुविकारोपलम्भाद्विकारानुपलब्धिरन्येति माधुर्यादन्यद्गाम्भीर्यम्। यथा—

आहूतस्याभिषेकाय विसृष्टस्य वनाय च।
न मया लक्षितस्तस्य स्वल्पोऽप्याकारविप्लवः॥ § 847

§ 848

90 ननु सत्यपि महति विकारहेतौ मृदुर्विकारो माधुर्यमित्युक्तम्। विकारच्छादको महान् गुणो गाम्भीर्यमित्युच्यते। तेन माधुर्यगाम्भीर्ययोरैक्यमेव प्राप्तम्। तत्राह मृदुविकारोपलम्भादिति। पूर्वत्र उपलभ्यमानोऽपि विकारो मृदुरित्येतावत्। उत्तरत्र विकारोपलम्भ एव नास्ति। तेन माधुर्यगाम्भीर्ययोर्नैकत्वमिति। § 849

अथ *स्थैर्यम्*— § 850

१ *] उ॰ च॰ ६।१९
५ *] हनु॰ ना॰ १।१९

...13ab **व्यवसायादचलनं स्थैर्यं विघ्नकुलादपि।** § 851

यथा वीरचरिते—

प्रायश्चित्तं चरिष्यामि पूज्यानां वो व्यतिक्रमात्।
न त्वेव दूषयिष्यामि शस्त्रग्रहमहाव्रतम्॥* § 854

§ 855

अथ *तेजः*— § 856

...13cd **अधिक्षेपाद्यसहनं तेजः प्राणात्ययेष्वपि॥ १३॥** § 857

यथा—

ब्रूत नूतनकूष्माण्डफलानां के भवन्त्यमी।
अङ्गुलीदर्शनाद्येन न जीवन्ति मनस्विनः॥ § 860

§ 861

अथ *ललितम्*— § 862

...14ab **शृङ्गाराकारचेष्टात्वं सहजं ललितं मृदु।** § 863

स्वाभाविकः शृङ्गारो मृदुः। तथाविधा शृङ्गारचेष्टा च ललितम्। यथा ममैव—

लावण्यमन्मथविलासविजृम्भितेन स्वाभाविकेन
सुकुमारमनोहरेण।
किं वा ममेव सखि योऽपि ममोपदेष्टा तस्यैव किं न 91
विषमं विदधीत तापम्॥ § 866

§ 867

अथौदार्यम्— § 868

...14cd **प्रियोक्त्याजीविताद् दानमौदार्यं सदुपग्रहः॥ १४॥**
§ 869

४ *] ३।८

प्रियवचनेन सह आ जीवितावधेर्दानमौदार्यं सतामुपग्रहश्च। यथा नागानन्दे—

सिरामुखैः स्यन्दत एव रक्तमद्यापि देहे मम मांसमस्ति।
तृप्तिं न पश्यामि तवैव तावत किं भक्षणात् त्वं विरतो
गरुत्मन्॥* § 872

§ 873

*सदुपग्रहो* यथा—

एते वयममी दाराः कन्येयं कुलजीवितम्।
ब्रूत येनात्र वः कार्यमनास्था बाह्यवस्तुषु॥ § 876

See → (कुमार° ६।६३ § 877

अथ *नायिका*— § 878

...15ab **स्वान्या साधारणस्त्रीति तद्गुणा नायिका त्रिधा।** § 879

तद्गुणेति यथोक्तसंभवे नायकसामान्यगुणयोगिनी नायिकेति। स्वस्त्री परस्त्री साधारणस्त्रीत्यनेन विभागेन त्रिधा। § 880

तत्र स्वीयाया विभागगर्भं सामान्यलक्षणमाह— § 881

...15cd **पौराचाररता साध्वी क्षमालज्जाविभूषिता।***
**मुग्धा मध्या प्रगल्भेति स्वीया शीलार्जवादियुक्॥**
**१५॥** § 883

शीलं=सुवृत्तम्। पतिव्रताकुटिला लज्जावती पुराचारनिपुणा स्वीया नायिका। § 884

92 स्वीया त्रिधा—मुग्धा मध्या प्रगल्भेति विभज्य मुग्धादीनां लक्षणे वक्तव्ये विभागातिलङ्घनेन तासां लक्षणवचनमन्तर्नीतविभागमित्याह तत्रेति। सामान्यलक्षणमिति। मुग्धादीनां तिसृणामप्यनुगतं लक्षणमित्यर्थः। पुराचारनिपुणेति*। पुरस्य आचारः पुराचारः। तत्र निपुणा लोकयात्रानिपुणेत्यर्थः। § 885

४ *] ५।१५
२ *] A.T.A. gives this half verse *paurācāra-*, etc. but is omitted by N.S.P. and by Bahurūpamiśra.
४ निपुणा] N.S.P. *puruṣopacāranipuṇā*.
९ *] It is clear from this that *puruṣopacāranipuṇā* found in previous editions is not correct.

तत्र *शीलवती* यथा—

कुलवालिआणं पेच्छह जोव्वणलाअण्णविब्भमविलासा।
*पवसंति व्व पवसिए एंति व्व पिये घरं एन्ते॥ § 888

§ 889

कुलवालिआणं।

कुलपालिकानां प्रेक्षध्वं यौवनलावण्यविभ्रमविलासाः।
प्रवसन्तीव प्रोषिते आयान्तीव प्रिये गृहमायाते॥ § 892

§ 893

*आर्जवादियोगिनी* यथा—

हसिअं अविआरमुद्धं भमिअं विरहिअविलाससच्छाअं।
भणिअं सहावसरलं धण्णाण घरे कलत्ताणं॥ § 896

§ 897

हसिअं।

हसितमविकारमुग्धं भ्रमितं विरहितविलाससच्छायम्।
भणितं स्वभावसरलं धन्यानां गृहे कलत्राणाम्॥ § 900

§ 901

*लज्ञावती* यथा—

लज्ञापज्ञत्तपसाहणाइं परचिंताणिप्पिवासाइं।
अविणअदिम्मोहाइं धण्णाण घरे कलत्ताइं॥ § 904

§ 905

सा चैवंविधा स्वीया मुग्धा-मध्या-प्रगल्भाभेदात् त्रिविधा। § 906
लज्ञा। 93

लज्ञापर्याप्तप्रसाधनानि परचिन्तानिष्पिपासानि।
अविनयदिङ्मोहानि धन्यानां गृहे कलत्राणि॥ § 909

§ 910

---

३ *] N.S.P. *pasavanti*. See for a different reading *H.K.A.*
२ च्छाअं] N.S.P. *succhāaṃ*.
२ णाइं] N.S.P. *paratitti-*, etc. (*paratṛpti-*, etc.), and *-duṃmehāiṃ (durmedhāṃsi)* in the next line.

अविनयदिङ्मोहानीति। एषामविनये दिङ्मोह एव। अविनयमार्गस्मरणमेव न विद्यत इत्यर्थः। सा चैवंविधेति। एतादृशसामान्यलक्षणयोगिनीत्यर्थः। § 911

तत्र— § 912

...16ab **मुग्धा नववयःकामा रतौ वामा मृदुः क्रुधि।** § 913

प्रथमावतीर्णतारुण्यमन्मथा रमणे वामशीला सुखोपायप्रसादना मुग्धनायिका। § 914

मुग्धेतिसूत्रस्यायमर्थः। यस्या वयश्च कामश्च नूतनो भवति, या च रतौ वामा भवति,* क्रोधेऽपि मृदुर्भवति, सा मुग्धेति। तथैव व्याचष्टे प्रथमावतीर्णेत्यादिना। § 915

तत्र *वयोमुग्धा* यथा—

विस्तारी स्तनभार एष गमितो न स्वोचितामुन्नतिं
रेखोद्भासिकृतं वलित्रयमिदं न स्पष्टनिम्नोन्नतम्।
मध्येऽस्या ऋजुरायतार्धकपिशा रोमावली निर्मिता रम्यं
यौवनशैशवव्यतिकरोन्मिश्रं वयो वर्तते॥ § 918

§ 919

यथा च ममैव—

उच्छ्वसन्मण्डलप्रान्तरेखमाबद्धकुड्मलम्।
अपर्याप्तमुरो वृद्धेः शंसत्यस्याः स्तनद्वयम्॥ § 922

§ 923

*काममुग्धा* यथा—

दृष्टिः सालसतां बिभर्ति न शिशुक्रीडासु बद्धादरा श्रोत्रे
प्रेषयति प्रवर्तितसखीसंभोगवार्तास्वपि।
94 पुंसामङ्कमपेतशङ्कमधुना नारोहति प्राग् यथा बाला
नूतनयौवनव्यतिकरावष्टभ्यमाना शनैः॥ § 926

§ 927

६ *] *yā ca ratau vāmā bhavati* is missing in T.MS. M.G.T. reads *yathā ca* instead of *yā ca*.

६ क्रोधेऽपि] Only Gr.MS. reads *krodhe 'pi*, whereas others read without *api*.

*रतौ वामा* यथा—

व्याहृता प्रतिवचो न संदधे गन्तुमैच्छदवलम्बितांशुका।
सेवते स्म शयनं पराङ्मुखी सा तथापि रतये पिनाकिनः॥*
§ 930

§ 931

*मृदुः कोपे* यथा—

प्रथमजनिते बाला मन्यौ विकारमजानती
कितवचरितेनासज्याङ्के विनम्रमुखैव सा।
चिबुकमलिकं चोन्नम्योच्चैरकृत्रिमविभ्रमा
नयनसलिलस्यन्दिन्योष्ठे रुदत्यपि चुम्बिता॥ § 934

एवमन्येऽपि लज्जासंवृतानुरागनिबन्धना मुग्धाव्यवहारा निबन्धनीयाः।
§ 935

यथा—

न मध्ये संस्कारं कुसुममपि बाला विषहते न निश्वासैः
सुभ्रूर्जनयति तरङ्गव्यतिकरम्।
नवोढा पश्यन्ती लिखितमिव भर्तुः प्रतिमुखं प्ररोहद्रोमाञ्चा
न पिबति न पात्रं चलयति॥ § 938

§ 939

कितवचरितेनेति। कितवानां यच्चरितं तेनेत्यर्थः। एवमन्येऽपीति। अन्येऽपि लज्जया संवृतोऽनुरागो येषां निबन्धनं ते मुग्धाव्यवहाराः प्रबन्धे निबन्धनीया इत्यर्थः। § 940

अथ *मध्या*— § 941

...16cd मध्योद्यद्यौवनानङ्गा मोहान्तसुरतक्षमा॥ १६॥ § 942

संप्राप्ततारुण्यकामा मोहान्तरतयोग्या मध्या। § 943 95

तत्र *यौवनवती* यथा—

आलापान् भ्रूविलासो विरलयति लसद्बाहुविक्षिप्तियातं
नीवीग्रन्थिं प्रथिम्ना प्रकटयति मनाङ्मध्यनिम्नो नितम्बः।
उत्पुष्यत्पार्श्वमूर्च्छत्कुचशिखरमुरो नूनमन्तः स्मरेण स्पृष्टा
कोदण्डकोट्या हरिणशिशुदृशो दृश्यते यौवनश्रीः॥ § 946

३ *] कुमार॰ ८।२

§ 947

*कामवती* यथा—*

स्मरनवनदीपूरेणोढाः पुनर्गुरुसेतुभि- र्यदपि
विधृतास्तिष्ठन्त्यारादपूर्णमनोरथाः।
तदपि लिखितप्रख्यैरङ्गैः परस्परमुन्मुखा
नयननलिनीनालाकृष्टं पिबन्ति रसं प्रियाः॥* § 950

§ 951

*मध्यासंभोगो* यथा—

ताव च्चिअ रइसमए महिलाणं विब्भमा विराअंति।
जा णवकुवलअदलसच्छहाइ मुउलेंति णअणाइं॥* § 954

एवं धीरायामधीरायां धीराधीरायामप्युदाहार्यम्। § 955

मध्येतिसूत्रस्यायमर्थः। उद्यद्यौवनम् अनङ्गश्च यस्याः, या च मोहपर्यन्ते सुरते क्षमा भवति, सा मध्येति। तथैव व्याचष्टे संप्राप्ततारुण्येति। कामो नाम संकल्पः। स चाभिप्रायविशेष एव। तेनाह मध्याभावो यथेतिIt appears from this that according to Bh.Nṛ the reading in the Avaloka here was madhyābhāvaḥ, and not madhyāsaṃbhogaḥ. Avaloka MSS. read -saṃbhogaḥ.। ताव च्चिअGr.MS. and T.MS. are not clear here.।

तावदेव रतिसमये महिलानां विभ्रमा विराजन्ते।
*यावन्नवकुवलयदलसच्छाये मुकुलीभवतो नयने॥ § 958

§ 959

96 एवमिति। एवं मध्यायां धीरायाम् अधीरायां धीराधीरायामपि उदाहरणानि दर्शनीयानीति। § 960

अथास्या मानवृत्तिः— § 961

---

२ *] A.T.A. *smararasanadī-*.
४ *] अमरु॰ श्लो॰ १०४
८ *] गाथा॰ १।५
१० र्थः ] *Daśarūpaka-kārikā*s are referred to as *sūtra* by the commentator.
१९ *] T.MS. and M.G.T. read *yāvannavakuvalayadala-sacchāye*, and Tri.MS. reads as *yāvannavakuvalayasacchāye*. Gr.MS. is not clear.

...17 धीरा सोत्प्रासवक्रोक्त्या मध्या साश्रु कृतागसम्।
खेदयेद् दयितं कोपादधीरा परुषाक्षरम्॥ १७॥
§ 963

मध्याधीरा कृतापराधं प्रियं सोत्प्रासवक्रोक्त्या खेदयेत्। यथा माघे—

न खलु वयमनुष्य दानयोग्याः पिबति च पाति च यासकौ
रहस्त्वाम्।
व्रज विटपममुं ददस्व तस्यै भवतु यतः सदृशोश्चिराय योगः॥*
§ 966

§ 967

अस्या मानवृत्तिरिति। एवंभूताया अस्या मानवृत्तिरित्यर्थः। *भवतु यतः सदृशोश्चिराय योग इति। सादृश्यं चैवम्। इयमपि विटं त्वां रहः पिबति पाति चेति विटपा। अयमपि विटपः =पल्लवः। विटपायाः खलु विटपदानं सदृशं भवतीति। § 968

धीराधीरा साश्रु सोत्प्रासवक्रोक्त्या खेदयेत्। यथामरुशतके—

बाले नाथ विमुञ्च मानिनि रुषं रोषान्मया किं कृतं
खेदोऽस्मासु न मेऽपराध्यति भवान् सर्वेऽपराधा मयि।
तत् किं रोदिषि गद्गदेन वचसा कस्याग्रतो रुद्यते
नन्वेतन्मम का तवास्मि दयिता नास्मीत्यतो रुद्यते॥*
§ 971

§ 972

अधीरा साश्रु परुषाक्षरं खेदयेत्। यथा—

यातु यातु किमनेन तिष्ठता मुञ्च मुञ्च सखि मादरं कृथाः।
खण्डिताधरकलङ्कितं प्रियं शक्नुमो न नयनैर्निरीक्षितुम्॥ § 975

§ 976

एवमपरेऽपि व्रीडानुपहिताः स्वयमनभियोगकारिणो मध्याव्यवहारा भ- 97
वन्ति। यथा—

स्वेदाम्भःकणिकाश्चितेऽपि वदने जातेऽपि रोमोद्गमे
विश्रम्भेऽपि गुरौ पयोधरभरोत्कम्पेऽपि वृद्धिं गते।

५ *] ७।५३

७ *] T.MS. and Gr.MS. read *bhavati* instead of *bhavatu*. Mallinātha's commentary, the editions of *Śiśupālavadha* (VII.५३) and other MSS. of *Laghuṭīkā* give it as *bhavatu*.

३ *] श्लो॰ ५७

दुर्वारस्मरनिर्भरेऽपि हृदये नैवाभियुक्तः प्रिय- स्तन्वङ्ग्या
हठकेशकर्षणघनाश्लेषामृते लुब्धया॥ § 979

§ 980

स्वतोऽनभियोजकत्वं तु हठकेशकर्षणघनाश्लेषामृते लुब्धयेवेत्युत्प्रेक्षया प्रतीयते। § 981

ननु मध्यालक्षणं स्वतोऽनभियोजकत्वमुक्तम्। तच्च न मध्यास्वभावेन। किं तु लोभकृतमिति प्रतिभाति। तत्राह स्वतोऽनभियोजकत्वं त्विति। उत्प्रेक्षाप्रतीतिबलादनभियोगो मध्यास्वभावकृत एवेति ज्ञायते। अन्यस्यान्यथाभानं हि उत्प्रेक्षा। तेन मध्यास्वभावकृत एव स्वयमनभियोगः प्रियतमकृतयोर्हठकेशकर्षणघनाश्लेषामृतयोर्लोभहेतुत्वेन उत्प्रेक्ष्यते। *तस्याः स्वारसिकमेवानभियोजकत्वमित्यर्थः। § 982

अथ *प्रगल्भा*— § 983

...18 यौवनान्धा स्मरोन्मत्ता प्रगल्भा दयिताङ्के।
विलीयमानेवानन्दाद् रतारम्भेऽप्यचेतना॥ १८॥
§ 985

*गाढयौवना*, यथा ममैव—

अभ्युन्नतस्तनमुरो नयने च दीर्घे वक्रे भ्रुवावतितरां वचनं
ततोऽपि।
मध्योऽधिकं तनुरतीव गुरुर्नितम्बो मन्दा गतिः किमपि
चाद्भुतयौवनायाः॥ § 988

§ 989

98 यथा च—

स्तनतटमतीव तुङ्गं निम्नो नाभिः समुन्नतं जघनम्।
विषमे मृगशाबाक्ष्या वपुषि नवे क इव न स्खलति॥ § 992

§ 993

*भावप्रगल्भा* यथा—

३ या] N.S.P. *utprekṣāpratīteḥ*.
५ न] M.G.T. reads *madhyāsvabhāvaḥ*.
९ *] Except in Gr.MS., in all others *tasyāḥ* is missing.
९ तुङ्ग] N.S.P. -*taṭam idam uttuṇgaṃ nimno madhyaḥ*, etc.

न जाने संमुखायाते प्रियाणि वदति प्रिये।
सर्वाण्यङ्गानि किं यान्ति नेत्रतामुत कर्णताम्॥* § 996

§ 997

*रतप्रगल्भा* यथा—

कान्ते तल्पमुपागते विगलिता नीवी स्वयं बन्धनाद् वासः
प्रश्लथमेखलागुणधृतं किंचिन्नितम्बे स्थितम्।
एतावत् सखि वेद्मि केवलमहं तस्याङ्गसङ्गे पुनः कोऽसौ
कास्मि रतं नु किं कथमिति स्वल्पापि मे न स्मृतिः॥*
§ 1000

§ 1001

एवमन्येऽपि परित्यक्तह्रीयन्त्रणावैदग्ध्यप्रायाः प्रगल्भाव्यवहारा वेदितव्याः। यथा—

क्वचित् ताम्बूलाक्तः क्वचिदगरुपङ्काङ्कमलिनः क्वचिच्चूर्णोद्गारी
क्वचिदपि च सालक्तकपदः।
वलीभङ्गाभोगैरलकपतितैः शीर्णकुसुमैः स्त्रियाः सर्वावस्थं
कथयति रतं प्रच्छदपटः॥* § 1004

§ 1005

क्वचित् ताम्बूलाक्त इत्यादि। क्वचित् ताम्बूलाक्त इत्यनेन व्यानतं रतमुच्यते। *तद्धि प्रच्छदपटश्लिष्टवदनाया उत्कुञ्चितजघनाया भवति। क्वचिदगरुपङ्काङ्कमलिन इत्यनेन पार्श्वरतमुच्यते। तदा हि प्रच्छदपटस्य मलिनत्वं 99

२ *] अमरु॰ श्लो॰ ६४
६ *] अमरु॰ श्लो॰ १०१
११ *] अमरु॰ श्लो॰ १०७
१३ नेन] All MSS. seem to read *ānata*. According to quotations given by Mallinātha on Bhāravi V.२३, this is *vyānata*, and perhaps this was what was intended by the commentator. Vemabhūpāla's interpretations of this verse which are the same as those given by Arjunavarmadeva, seem to be different from the ones given by Bh.Nṛ. It is not clear whether we are to know from this that Bh.Nṛ. lived at a time when the commentary of Arjunavarmadeva had not yet become popular, or he deliberately gave different interpretations. See also the Introduction.
१४ *] This is the reading in all MSS. except in Gr.MS. which reads *taddhi catuṣpātsādṛśyena bāhubhyāṃ pādābhyāṃ ca pracchadapaṭe sthitāyā bhavati*. Because of the remark *kvacit tāmbūlāktaḥ* in the verse the expressive statement as *pracchadapaṭaśliṣṭavadanāyāḥ* seems to be more appropriate.

भवति। *क्वचिदपि च सालक्तकपद इत्यनेन त्रैविक्रमं रतमुच्यते। तत् खलु कुड्याद्यवष्टम्भेन स्थितायाः उत्क्षिप्तैकपादायाः पादान्तरेण स्थितायाश्च भवति। वलीभङ्गाभोगैरेत्यनेन उत्तानशयनं रतमुच्यते। तदा हि प्रच्छदपटस्य वलीभङ्गो भवति। अलकपतितैः शीर्णकुसुमैरित्यनेन पुरुषायितमुच्यते। तेन ह्यलकेभ्यः कुसुमानि पतन्ति। तेन तेन तत्तज्जातीयान्तराणामप्युपलक्षणात् सर्वावस्थमित्याह। § 1006

अथास्याः *कोपचेष्टा*— § 1007

...19 सावहित्थादरोदास्ते रतौ धीरेतरा क्रुधा।
संतर्ज्य ताडयेन्मध्या मध्याधीरेव तं वदेत्॥ १९॥
§ 1009

सहावहित्थेनाकारसंवरणेनादरेण चोपचाराधिक्येन वर्तते सा सावहित्थादरा। रतावुदासीना क्रुधा कोपेन भवति। § 1010

सावहित्थेतिसूत्रस्यायमर्थः। धीरा क्रुद्धा सावहित्थादरा सती रतावुदास्ते। इतरा=अधीरा क्रुद्धा दयितं संतर्ज्य ताडयेत्। प्रगल्भमध्या=धीराधीरा तु मध्याधीरेव तं वदेदिति। तथैव व्याचष्टे सावहित्थेत्यादिना। § 1011

*सावहित्थादरा* यथामरुशतके—

एकत्रासनसंस्थितिः परिहृता प्रत्युद्गमाद् दूरत-
स्ताम्बूलाहरणच्छलेन रभसाश्लेषोऽपि संविघ्नितः।
आलापोऽपि न मिश्रितः परिजनं व्यापारयन्त्यान्तिके कान्तं
प्रत्युपचारतश्चतुरया कोपः कृतार्थीकृतः॥* § 1014

§ 1015

*रतावुदासीना* यथा—

आयस्ता कलहं पुरेव कुरुते न स्रंसने वाससो
भग्नभ्रूंगतिखण्ड्यमानमधरं धत्ते न केशग्रहे।

---

१ *] Before *kvacid api ca sālaktakapadaḥ* only in M.G.T. the incomplete (it is incomplete unfortunately) line *kvacic cūrṇodgārīty anena* is found.
४ तेन] Only M.G.T. reads *na hy alakebhyaḥ kusumapāto 'nyathā bhavati.*
६ क्रुद्धा] For *avahitthā* see *Daśarūpaka* IV.२९.
८ ध्याधीरेव] For *madhyādhīrā* see II.१७.
३ *] श्लो० १८

अङ्गान्यर्पयति स्वयं भवति नो वामा हठालिङ्गने तन्व्या 100
शिक्षित एष संप्रति कुतः कोपप्रकारोऽपरः॥* § 1018

§ 1019

इतरा *त्वधीरप्रगल्भा* कुपिता सती संतर्ज्य ताडयति। यथामरुशतके—

कोपात् कोमललोलबाहुलतिकापाशेन बद्ध्वा दृढं नीत्वा
केलिनिकेतनं दयितया सायं सखीनां पुरः।
भूयोऽप्येवमिति स्खलत्कलगिरा संसूच्य दुश्चेष्टितं धन्यो
हन्यत एष निह्नुतिपरः प्रेयान् रुदत्या हसन्॥* § 1022

§ 1023

*धीराधीरप्रगल्भा* मध्याधीरेव तं वदति सोत्प्रासवक्रोक्त्या। यथा तत्रैव—

कोपो यत्र भ्रुकुटिरचना निग्रहो यत्र मौनं
यत्रान्योन्यस्मितमनुनयो दृष्टिपातः प्रसादः।
तस्य प्रेम्णस्तदिदमधुना वैशसं पश्य जातं त्वं पादान्ते
लुठसि न च मे मन्युमोक्षः खलायाः॥* § 1026

§ 1027

पुनश्च— § 1028

...20ab द्वेधा ज्येष्ठा कनिष्ठा चेत्यमुग्धा द्वादशोदिताः। § 1029

मध्याप्रगल्भाभेदानां प्रत्येकं ज्येष्ठाकनिष्ठात्वभेदेन द्वादश भेदा भवन्ति। मुग्धा त्वेकरूपैव। § 1030

*ज्येष्ठाकनिष्ठे* यथामरुशतके—

दृष्ट्वैकासनसंस्थिते प्रियतमे पश्चादुपेत्यादरा- देकस्या नयने
निमील्य विहितक्रीडानुबन्धच्छलः।
ईषद्वक्रितकंधरः सपुलकः प्रेमोल्लसन्मानसा- 101
मन्तर्हासलसत्कपोलफलकां धूर्तोऽपरां चुम्बति॥ § 1033

§ 1034

न चानयोर्दाक्षिण्यप्रेमभ्यामेव व्यवहारः। अपि तु प्रेम्णापि। यथा चैतत् तथोक्तं दक्षिणलक्षणावसरे। *एषां च धीरमध्या-अधीरमध्या-धीराधीर-

१ *] अमरु° श्लो° १०६
५ *] श्लो° ९
९ *] अमरु° श्लो° ३८
५ के] श्लो° १९

१० *] The portion given within brackets in N.S.P. (as here) is also not found in A.T.A.

मध्या-धीरप्रगल्भा-अधीरप्रगल्भा-धीराधीरप्रगल्भाभेदानां प्रत्येकं ज्येष्ठा-कनिष्ठाभेदाद् द्वादशानां वासवदत्ता-रत्नावलीवत् प्रबन्धनायिकानामुदाहरणानि महाकविप्रबन्धेष्वनुसर्तव्यानि। § 1035

पुनश्चेति। स्वीया मुग्धामध्याप्रगल्भाभेदेन या त्रेधा विभक्ता एवंभूता सा पुनश्च द्विविधेत्यर्थः। अमुग्धा = मध्या च प्रगल्भा च द्वादशधोदिता। तावद्भेदवत्त्वं च उभयोरपि धीरा धीराधीरा अधीरेति षड् भेदाः तेषां प्रत्येकं ज्येष्ठाकनिष्ठात्वेन द्वैविध्याद् भवति। अमुग्धेति विशेषणस्य विवक्षामाह मुग्धा त्वेकरूपैवेति। धीरत्वाधीरत्वधीराधीरत्वतारतम्येन ज्येष्ठात्वं कनिष्ठात्वं च। तथाविधतारतम्यशून्यत्वात् मुग्धाया एकरूपत्वमेवेति। ननु धीरादिभेदत्रयवत्योर्मध्याप्रगल्भयोः ज्यैष्ठ्यं कानिष्ठ्यं चोच्यते। तदनुपपन्नम्। तयोः कनिष्ठायां प्रियस्य प्रेम्णैव व्यवहारात्। ज्येष्ठायां दाक्षिण्येनैव व्यवहाराच्च। तत्राह Avaloka:2.20ab। अनयोर्ज्येष्ठाकनिष्ठयोर्ज्येष्ठायां दाक्षिण्येनैव व्यवहारः कनिष्ठायां प्रेम्णैवेति योऽयं नियमः स नास्ति। उभयोरपि प्रेम्णापि व्यवहारदर्शनात्। ज्येष्ठायां प्रेम्णा प्रियस्य व्यवहारः किं दृष्टः। ओमित्याह यथा चैतदिति। दक्षिणोऽस्यां = ज्येष्ठायां सहृदय इति हि सहृदयलक्षणम्। सहृदयत्वं च प्रेम्णैवेति। § 1036

अथ *न्यस्त्री*— § 1037

...20cd अन्यस्त्री कन्यकोढा च नान्योढाङ्गिरसे क्वचित्॥
२० ॥ § 1038

...21ab कन्यानुरागमिच्छातः कुर्यादङ्गाङ्गिसंश्रयम्। § 1039

102 नायकान्तरसंबन्धि *न्यन्योढा,* यथा—

दृष्टिं हे प्रतिवेशिनि क्षणमिहाप्यस्मिन् गृहे दास्यसि
प्रायेणास्य शिशोः पिता न विरसाः कौपीरपः पास्यति।
एकाकिन्यपि यामि तद्वनदीस्रोतस्तमालाकुलं
नीरन्ध्रास्तनुमालिखन्तु जरठच्छेदानलग्रन्थयः॥ § 1042

§ 1043

इयं त्वङ्गिनि प्रधाने रसे न क्वचिन्निबन्धनीयेति न प्रपञ्चिता। कन्यका तु पित्राद्यायत्तत्वादपरिणीताप्यन्यस्त्रीत्युच्यते। तस्यां पित्रादिभ्योऽलभ्यमानायां सुलभायामपि परोपरोधस्वकान्ताभयात् प्रच्छन्नं कामित्वं प्रवर्तते। यथा मालत्यां माधवस्य, सागरिकायां च वत्सराजस्येति, तदनुरागश्च

६ यामि ] N.S.P. *tad varam itaḥ*.

स्वेच्छया प्रधानाप्रधान-रससमाश्रयो निबन्धनीयः। यथा रत्नावली-नागानन्दयोः सागरिका-मलयव-त्यनुराग इति। § 1044

नान्योढा अङ्गिरसे क्वचिदित्येतदप्रपञ्चे कारणमुक्तमित्याह इयं त्विति। अनूढायाः कन्यायाः कथमन्यस्त्रीत्ववाचोयुक्तिः। तत्राह कन्यका त्विति। अयमप्यन्यस्त्रीति शब्दनिर्वाह एव। फलं तु प्रच्छन्नकामित्वम्। सुलभायां तस्यां किं प्रच्छन्नकामित्वेन। तत्राह तस्यामिति। स्वकान्ताभयादिति भयमात्रस्योपलक्षणम्। तेन माधवस्य मालत्यां राजभयात् प्रच्छन्नकामित्वम्। स्वेच्छात इत्यस्य व्याख्यानं प्रधानाप्रधानरससमाश्रय इति। § 1045

...21cd साधारणस्त्री गणिका कलाप्रागल्भ्यधौर्त्ययुक्॥ २१॥ § 1046

तद्व्यवहारो विस्तरतः शास्त्रान्तरे निदर्शितः। दिङ्मात्रं तु— § 1047

...22 छन्नकामसुखार्थाज्ञस्वतन्त्राहंयुपण्डकान्।
रक्तेव रञ्जयेदाढ्यान् निःस्वान् मात्रा विवासयेत्॥ २२॥ § 1049

छन्नं ये कामयन्ते ते छन्नकामाः श्रोत्रियवणिग्लिङ्गिप्रभृतयः, सुखार्थः= 103
अप्रयासावाप्तधनः सुखप्रयोजनो वा, अज्ञः=मूर्खः, स्वतन्त्रः = निरङ्कुशः, अहंयुः = अहंकृतः, पण्डकः = बालषण्डादिः, एतान् बहुवित्तान् रक्तेव रञ्जयेदर्थार्थम्। तत्प्रधानत्वात्तद्वृत्तेः। गृहीतार्थान् कुट्टिन्यादिना निष्कासयेत् पुनः प्रतिसंधानाय। इदं तासामौत्सर्गिकं रूपम्। § 1050

छन्नकाम इत्यत्र कामस्य छन्नत्वे प्रवृत्त्यनुपपत्तेः छन्नत्वं क्रियाविशेषणमित्याह छन्नं ये कामयन्त इति। सुखार्थ इत्यत्र अर्थशब्दः प्रयोजनवाची धनवाची वेत्याह अप्रयासावाप्तधन इत्यादिना। पण्डकशब्दः स्त्र्ययोग्यतामात्रवचन इत्याह पण्डको बालषण्डादिरिति। वस्तुतो रागविरहे कारणमाह अर्थार्थमिति। स्वयमनिष्कासने कारणमाह >पुनः प्रतिसंधानायेति। आसां रूपस्य क्वचिदपवादं वक्तुमाह इदं तासामिति। § 1051

रूपकेषु तु— § 1052

...23ab रक्तैव त्वप्रहसने नैषा दिव्यनृपाश्रये। § 1053

७ =] N.S.P. *vātapaṇḍādiḥ*.

प्रहसनवर्जिते प्रकरणादौ रक्तैवैषा विधेया। यथा मृच्छकटिकायां वसन्तसेना चारुदत्तस्य। प्रहसने त्वरक्तापि हास्यहेतुत्वात्। नाटकादौ तु दिव्यनृपनायकाश्रये नैव विधेया। § 1054

सूत्रस्थाप्रहसनेतिविशेषणफलं विवृणोति प्रहसने त्वरक्तापीति। नैषा दिव्यनृपाश्रये इति शुद्धदिव्ये गणिका निषिध्यते। तेन दिव्यमर्त्ये विक्रमोर्वशीयादौ गणिका भवत्येवेति। § 1055

अथ भेदान्तराणि— § 1056

...23cd **आसामष्टाववस्थाः स्युः स्वाधीनपतिकादिकाः॥ २३॥** § 1057

104 स्वाधीनपतिका, वासकसज्जा, विरहोत्कण्ठिता, खण्डिता, कलहान्तरिता, विप्रलब्धा, प्रोषितप्रिया, अभिसारिका इत्यष्टौ स्वस्त्रीप्रभृतीनामवस्थाः। नायिकाप्रभृतीनामप्यवस्थारूपत्वे सत्यवस्थान्तराभिधानं पूर्वासां धर्मित्वप्रतिपादनाय। अष्टाविति न्यूनाधिकव्यवच्छेदः। न च वासकसज्जादेः स्वाधीनपतिकादावन्तर्भावः। अनासन्नप्रियत्वात्। वासकसज्जाया न स्वाधीनपतिकात्वम्। यदि चैष्यत्प्रियापि स्वाधीनपतिका प्रोषितप्रियापि स्वाधीनपतिका तदा प्रोषितप्रियापि न पृथग्वाच्या। न चेयता व्यवधानेनासत्तिरियता त्वनासत्तिरिति नियन्तुं शक्यम्। न चाविदितप्रियव्यलीकायाः खण्डितात्वं, नापि प्रवृत्तरतिभोगेच्छायाः प्रोषितप्रियात्वं, स्वयमगमनान्नायकं प्रत्यप्रयोजकत्वान्नाभिसारिकात्वम्। एवमुत्कण्ठिताप्यन्यैव पूर्वाभ्यः। औचित्यप्राप्तप्रियागमनसमयातिवृत्तिविधुरा न वासकसज्जा। तथा विप्रलब्धापि वासकसज्जावदन्यैव पूर्वाभ्यः। उक्त्वा नायात इति प्रतारणाधिक्याच्च वासकसज्जोत्कण्ठितयोः पृथक्। कलहान्तरिता तु यद्यपि विदितव्यलीका तथाप्यगृहीतप्रियानुनया पश्चात्तापप्रकाशितप्रसादा पृथगेव खण्डितायाः। तत् स्थितमेतदष्टाववस्था इति। § 1058

आसामिति स्वस्त्रीप्रभृतीनां संग्रह इति दर्शयति स्वस्त्रीप्रभृतीनामवस्था इति। ननु नायकनायिकाप्रभृतिशब्दानामपि गुणापादितावस्थावचनत्वादासां भेद एव वक्तव्यः। पुनः किमवस्थाग्रहणेन। तत्राह नायिकाप्रभृतीनामपीति। शब्दाधिक्यमर्थाधिक्यफलमिति न्यायात् नायिकाप्रभृतीनां धर्मिणीनां स्वाधीनपतिकात्वादयः कथं धर्मा भवेयुरिति पुनस्तद्ग्रहणम्। अन्यथा हि यस्या नायिकात्वमवस्था, तस्या एव स्वाधीनपतिकात्वमिति अवस्थावन्त एव

---

८ तिका] N.S.P. omits *proṣitapriyāpi svādhīnapatikā tadā*.
९ ता] N.S.P. *vyavadhānenāsattir iti niyantum*, etc.

२३ मिति] It is not clear. T.MS., Gr.MS. and M.G.T. read *avasthāvata eva*. Tri.MS. gives as *avasthā. ata eva ete*, etc.

एते भेदा अपि धर्मा भवेयुः, न पुनर्नायिकानामिति। ननु स्वरूपालोचनेनैव एषामष्टत्वे सिद्धे पुनः किमष्टत्वग्रहणेन। तत्राह अष्टाविति Only Gr.MS. gives this pratīka. In T.MS. it is missing.न्यूनाधिकव्यवच्छेद इति। न्यूनत्वमेवाशङ्क्य समादधाति न चेत्यादिना। ननु विशेषे गोत्वादौ चतुष्पात्त्वस्यानन्तर्भावेऽपि विशेषान्तर्भावो दृष्ट इति मन्वानो वासक- 105 सज्ञायाः स्वाधीनपतिकायां नान्तर्भाव इत्याह वासकसज्ञाया न स्वाधीनपतिकात्वमिति। अनासन्नप्रियत्वादित्येव हेतुः। तमिमं विपक्षे बाधकोपन्यासेन द्रढयति यदि चेति। आसत्तिविशेषात् तयोरस्तु नियम इति चेत् तत्राह न चेति। तर्हि खण्डितायामन्तर्भावो भविष्यति। तत्राह न चाविदितेति। सा हि विदितप्रियव्यलीका। इयं तु नैवमित्यर्थः। तर्हि अनासन्नप्रियत्वादेव प्रोषितप्रियायामन्तर्भावो भविष्यति। तत्राह नापीति। इयं तु प्रवृत्तरतिभोगेच्छा। तस्यास्तु प्रियः प्रोषित इति ज्ञानात् सा न प्रवृत्तरतीच्छा। तर्हि अभिसारिकायामन्तर्भावो भविष्यति। तत्राह स्वयमिति। अभिसरन्ती अभिसारयन्ती वा हि अभिसारिका। वासकसज्ञायास्तु अभिसरणे कर्तृत्वं प्रयोजकत्वं च नास्तीत्यर्थः। वासकसज्ञां परिसमाप्य उत्कण्ठिताया भेदमाह एवमिति। वासकसज्ञान्यायेनेत्यर्थः। तर्हि तस्या वासकसज्ञायामन्तर्भावो भविष्यति। तत्राह औचित्येति। उत्कण्ठिता हि औचित्यप्राप्तया प्रियागमसमयातिवृत्त्या खिद्यते। वासकसज्ञा तु न तथेति। एवमुत्कण्ठितामपि परिसमाप्य विप्रलब्धाया भेदमतिदिशति तथेति। तर्हि वासकसज्ञोत्कण्ठितयोरेवान्तर्भावो विप्रलब्धाया भविष्यति।* तत्राह उक्त्वेति। आगमिष्यामीत्युक्त्वापि अनागतः प्रियो यस्याः सा विप्रलब्धा न वासकसज्ञा। उत्कण्ठिता तु यद्यपि विदितप्रियव्यलीका, तथापि ततो विप्रलब्धायां प्रियप्रतारणमधिकम्। ततो वासकसज्ञोत्कण्ठितयोः पृथक् विप्रलब्धेत्यर्थः। ननु कलहान्तरिताया विदितप्रियव्यलीकत्वात् खण्डितायामन्तर्भावो भविष्यति। तत्राह कलहान्तरितेति। प्रियव्यलीकवेदने समानेऽपि खण्डिताकलहान्तरितयोः, सा खण्डिता गृहीतप्रियानुनया। इयं कलहान्तरिता तु अगृहीतप्रियानुनया सती गते प्रिये पश्चात्तापेन प्रकाशितप्रसादा भवति। अतः खण्डितायाः कलहान्तरिता पृथगेवेत्यर्थः। तेन न्यूनताभावद् अष्टसंख्यावत्त्वमस्त्येवेत्याह तदिति। § 1059

तत्र— § 1060

...24ab आसन्नायत्तरमणा हृष्टा स्वाधीनभर्तृका। § 1061

२० *] The portion from *tarhi* to *tato* is missing in T.MS. and Gr.MS.
२३ तो] The portion from *tarhi* to *tato* is missing in T.MS. and Gr.MS.

106 यथा—

मा गर्वमुद्वह कपोलतले चकास्ति कान्तस्वहस्तलिखिता
मम मञ्जरीति।
अन्यापि किं न सखि भाजनमीदृशानां वैरी न चेद् भवति
वेपथुरन्तरायः॥ § 1064

§ 1065

एवमवस्थितभेदानां स्वाधीनपतिकाप्रभृतीनां सोदाहरणं लक्षण कथयति तत्रेत्यादिना। § 1066

अथ *वासकसज्जा*— § 1067

...24cd मुदा वासकसज्जा स्वं मण्डयत्येष्यति प्रिये॥ २४॥
§ 1068

स्वमात्मानं वेश्म च हर्षेण भूषयत्येष्यति प्रिये वासकसज्जा। यथा—

निजपाणिपल्लवतलस्खलनादभिनासिकाविवरमुत्पतितैः।
अपरा परीक्ष्य शनकैर्मुमुदे मुखवासमास्यकमलश्वसनैः॥*
§ 1071

§ 1072

स्वशब्दस्य आत्मवाचित्वमात्मीयवाचित्वं चाङ्गीकृत्याह स्वमात्मानं वेश्म चेति। § 1073

अथ *विरहोत्कण्ठिता*— § 1074

...25ab चिरयत्यव्यलीके तु विरहोत्कण्ठितोन्मनाः। § 1075
यथा—

सखि स विजितो वीणावाद्यैः कयाप्यपरस्त्रिया
पणितमभवत् ताभ्यां तत्र क्षपाललितं ध्रुवम्।
107 कथमितरथा शेफालीषु स्खलत्कुसुमास्वपि प्रसरति
नभोमध्येऽपीन्दौ प्रियेण विलम्ब्यते॥ § 1078

§ 1079

---

५ *] शिशु° ९। ५२
२ तु] 'विरहोत्कण्ठिता मता' इति पाठः.
४ विजितो] A.T.A. *vīṇādyūte kayā*, etc.

अथ *खण्डिता*— § 1080

...25cd ज्ञातेऽन्यासङ्गविकृते खण्डितेर्ष्याकषायिता॥ २५॥
§ 1081

यथा—

नवनखपदमङ्गं गोपयस्यंशुकेन स्थगयसि पुनरोष्ठं पाणिना दन्तदष्टम्।
प्रतिदिशमपरस्त्रीसङ्गशंसी विसर्पन् नवपरिमलगन्धः केन शक्यो वरीतुम्॥* § 1084

§ 1085

अथ *कलहान्तरिता*— § 1086

...26ab कलहान्तरितामर्षाद् विधूतेऽनुशयार्तियुक्। § 1087
यथा—

निःश्वासा वदनं दहन्ति हृदयं निर्मूलमुन्मथ्यते निद्रा नैति न दृश्यते प्रियमुखं नक्तंदिवं रुद्यते।
अङ्गं शोषमुपैति पादपतितः प्रेयांस्तथोपेक्षितः सख्यः कं गुणमाकलय्य दयिते मानं वयं कारिताः॥* § 1090

§ 1091

अथ *विप्रलब्धा*— § 1092

...26cd विप्रलब्धोक्तसमयमप्राप्तेऽतिविमानिता॥ २६॥
§ 1093

यथा— 108

उत्तिष्ठ दूति यामो यामो यातस्तथापि नायातः।
यातः परमपि जीवेज्जीवितनाथो भवेत् तस्याः॥ § 1096

---

५ *] शिशु॰ ११। ३४
२ र्षाद्] 'विधुते' इति पाठः.

५ *] अमरु॰ श्लो॰ ९२

§ 1097

अथ *प्रोषितप्रिया*— § 1098

...27ab **दूरदेशान्तरस्थे तु कार्यतः प्रोषितप्रिया।** § 1099

यथामरुशतके—

आ दृष्टिप्रसरात् प्रियस्य पदवीमुद्वीक्ष्य निर्विण्णया विश्रान्तेषु
पथिष्वहःपरिणतौ ध्वान्ते समुत्सर्पति।
दत्त्वैकं सशुचा गृहं प्रति पदं पान्थस्त्रियास्मिन् क्षणे मा
भूदागत इत्यमन्दवलितग्रीवं पुनर्वीक्षितम्॥* § 1102

§ 1103

अथा*भिसारिका*— § 1104

...27cd **कामार्ताभिसरेत् कान्तं सारयेद्वाभिसारिका॥ २७॥**
§ 1105

यथामरुशतके—

उरसि निहितस्तारो हारः कृता जघने घने कलकलवती
काञ्ची पादौ रणन्मणिनूपुरौ।
प्रियमभिसरस्येवं मुग्धे त्वमाहतडिण्डिमा यदि
किमधिकत्रासोत्कम्पं दिशः समुदीक्षसे॥* § 1108

§ 1109

यथा च—

न च मेऽवगच्छति यथा लघुतां करुणां यथा च कुरुते स
मयि।
निपुणं तथैनमुपगम्य वदेरभिदूति काचिदिति संदिदिशे॥*
§ 1112

§ 1113

109 तत्र— § 1114

५ *] श्लो° ७६
५ *] श्लो° ३१
१ *] शिशु° ९। ५६

...28 चिन्तानिःश्वासखेदाश्रुवैवर्ण्यग्लान्यभूषणैः।
युक्ताः षडन्त्या द्वे चाद्ये क्रीडौज्ज्वल्यप्रहर्षितैः॥
२८॥ § 1116

परस्त्रियौ तु कन्यकोढे। संकेतात् पूर्वं विरहोत्कण्ठिते, पश्चाद् विदूषकादिना सहाभिसरन्त्यावभिसारिके, कुतोऽपि संकेतस्थानमप्राप्ते नायके विप्रलब्धे इति व्यवस्थतैवानयोरिति। अस्वाधीनप्रिययोरवस्थान्तरायोगात्। यत्तु मालविकाग्निमित्रादौ योऽप्येवं धीरः सोऽपि दृष्टो देव्याः पुरतः इति मालविकावचनानन्तरम्—

दाक्षिण्यं नाम बिम्बोष्ठि नायकानां कुलव्रतम्। तन्मे दीर्घाक्षि ये प्राणास्ते त्वदाशानिबन्धनाः॥* § 1118 &

इत्यादि, तन्न खण्डितानुनयाभिप्रायेण। अपि तु सर्वथा मम देव्यधीनत्वमाशङ्क्य निराशा मा भूदिति कन्याविश्रम्भणायेति। तथानुपसंजातनायकसमागमाया देशान्तरव्यवधानेऽप्युत्कण्ठितात्वमेवेति न प्रोषितप्रियात्वमनायत्तप्रियत्वादेवेति। § 1119

त्रेधा हि नायिका—स्वस्त्री अन्यस्त्री साधारणस्त्री चेति। तत्रान्यस्त्रियं प्रत्यपि स्वाधीनपतिकाद्यवस्थासु विशेषमाह परस्त्रियौ त्विति। अनयोरवस्थान्तराभावे हेतुमाह अस्वाधीनेति। नन्वनयोः खण्डितात्वमपि क्वचिद् दृष्टमिति चेत् तदनुभाष्य निराकरोति तन्नेति। व्यवस्थितनायिकायाः प्रोषितप्रियात्वमेव कुतो न भवति। तत्राह अनुपसंजातेति। तत्र हेतुमाह अनायत्तप्रियत्वादिति। स्वायत्तत्वे सति नायकस्य कार्यादिना प्रवासे सति हि प्रोषितप्रियात्वमिति। § 1120

अथासां *सहायिन्यः*— § 1121 110

...29 दूत्यो दासी सखी कारूर्धात्रेयी प्रतिवेशिका।
लिङ्गिनी शिल्पिनी स्वं च नेतृमित्रगुणान्विताः॥ २९॥
§ 1123

दासी = परिचारिका। सखी = स्नेहनिबद्धा। कारूः = रजकीप्रभृतिः। धात्रेयी = उपमातृसुता। प्रतिवेशिका = प्रतिगृहिणी। लिङ्गिनी = भिक्षुक्यादिका। शिल्पिनी = चित्रकारादिस्त्री। स्वं चेति दूतीविशेषा।

**जीमूतवाहनः** ५ इति] N.S.P. *vyavasthitaiva.*

६ विकाग्निमित्रादौ] पृ° ७८
९ *] मालविका° ४। १४

*नायकमित्राणां पीठमर्दादीनां निसृष्टार्थत्वादिना गुणेन युक्ताः। तथा च मालतीमाधवे कामन्दकीं प्रति—

शास्त्रेषु निष्ठा सहजश्च बोधः प्रागल्भ्यमभ्यस्तगुणा च वाणी।
कालानुरोधः प्रतिभानवत्त्वमेते गुणाः कामदुघाः क्रियासु॥*
§ 1126

§ 1127

नेतृमित्रगुणान्विता इति। नायकमित्रस्य ये गुणाः नायिकासहायिन्योऽपि तद्गुणा भवेयुरित्यर्थः। § 1128

तत्र *सखी*। यथा—

मृगशिशुदृशस्तस्यास्तापं कथं कथयामि ते दहनपतिता दृष्टा मूर्तिर्मया न हि चैन्दवी।
इति तु विदितं नारीरूपः स लोकदृशां सुधा तव शठतया शिल्पोत्कर्षो विधेर्विघटिष्यते॥ § 1131

§ 1132

यथा च—*

सच्चं जाणइ दट्ठुं सरिसम्मि जणम्मि जुज्जए राओ।
मरउ ण तुमं भणिस्सं मरणं पि सलाहणिज्जं से॥* § 1135

§ 1136

111 स्वयं *दूती*। यथा—

*महुएहिं किं व पंथिअ जइ हरसि नियंसणं नियंबाओ।
साहेमि कस्स रन्ने गामो दूरे अहं एक्का॥* § 1139

१ *] The portion within brackets is missing in A.T.A.
४ *] ३। ११
५ *] 'सत्यं जानाति द्रष्टुं सदृशे जने युज्यते रागः। म्रियतां न त्वां भणिष्यामि मरणमपि श्लाघनीयमस्याः॥' इति च्छाया.
७ *] गाथा° १। १२
२ *] मधूकैः किं वा पथिक यदि हरसि निवसनं नितम्बात्। कथयामि कस्यारण्ये ग्रामो दूरे अहमेका॥ इति च्छाया.
३ *] This verse and its *chāyā* as available in the previous editions of the *Avaloka,* have not been very clear. The A.T.A. too is not very helpful. I have taken the above portion from *H.K.A.* The source of the verse as given by the editors of *H.K.A.* on page ५११, is *Saptaśataka* ८७७, and *Vajjālagga* ४११. The A.T.A. however reads the

इत्याद्यूह्यम्। § 1140

अथ *योषिदलंकाराः*— § 1141

...30ab यौवने सत्त्वजाः स्त्रीणामलंकारास्तु विंशतिः। § 1142

यौवने सत्त्वोद्भूता विंशतिरलंकाराः स्त्रीणां भवन्ति। § 1143
तत्र— § 1144

...30cd भावो हावश्च हेला च त्रयस्तत्र शरीरजाः॥ ३०॥
§ 1145

...31 शोभा कान्तिश्च दीप्तिश्च माधुर्यं च प्रगल्भता।
औदार्यं धैर्यमित्येते सप्त भावा अयत्नजाः॥ ३१॥
§ 1147

तत्र भावहावहेलास्त्रयोऽङ्गजाः। *शोभा कान्तिर्दीप्तिर्माधुर्यं प्रागल्भ्यमौदार्यं धैर्यमित्ययत्नजाः सप्त। § 1148

...32 लीला विलासो विच्छित्तिर्विभ्रमः किलकिञ्चितम्।
मोट्टायितं कुट्टमितं बिब्बोको ललितं तथा॥ ३२॥
§ 1150

...33ab विहृतं चेति विज्ञेया दश भावाः स्वभावजाः § 1151

तानेव निर्दिशति— § 1152 112

foot clearly as *sāhemi kaṃ saraṇṇaṃ*, which would perhaps mean *kathayāmi kaṃ śaraṇyam*. For the present I have no means here of verifying the point further.

८ *] This line of the *Avaloka* is missing in A.T.A.

...33cd निर्विकारात्मकात् सत्त्वाद् भावस्तत्राद्यविक्रिया॥ ३३॥ § 1153

तत्र विकारहेतौ सत्यप्यविकारात्मकं सत्त्वम्। यथा कुमारसंभवे —

श्रुताप्सरोगीतिरपि क्षणेऽस्मिन् हरः प्रसंख्यानपरो बभूव।
आत्मेश्वराणां न हि जातु विघ्नाः समाधिभेदप्रभवो भवन्ति॥
§ 1156

तस्मादविकाररूपात् सत्त्वात् यः प्रथमो विकोऽन्तर्विपरिवर्तिबीजस्योच्छूनतेव स *भावः*। यथा—

दृष्टिः सालसतां बिभर्ति न शिशुक्रीडासु बद्धादरा श्रोत्रे
प्रेषयति प्रवर्तितसखीसंभोगवार्तास्वपि।
पुंसामङ्कमपेतशङ्कमधुना नारोहति प्राग् यथा बाला
नूतनयौवनव्यतिकरावष्टभ्यमाना शनैः॥ § 1159

§ 1160

यथा वा कुमारसंभवे—

हरस्तु किंचित्परिलुप्तधैर्यश्चन्द्रोदयारम्भ इवाम्बुराशिः।
उमामुखे बिम्बफलाधरोष्ठे व्यापारयामास विलोचनानि॥*
§ 1163

§ 1164

यथा वा ममैव—

तं चिअ वअणं ते चेअ लोअणे जोव्वणं पि तं चेअ।
अण्णा अणंगलच्छी अण्णं चिअ किं पि साहेइ॥ § 1167

§ 1168

तासत्त्वज्ञाने हि सात्त्विकज्ञानम्। तेनाह निर्विकारात्मकात् सत्त्वादिति। रागद्वेषाभ्यामनुपहतं हि मनः सत्त्वम्। तथैव व्याचष्टे विकारहेतौ सत्यपीति। अन्तर्विपरिवर्तीति। आत्मनि विपरिवर्तिनो बीजस्य यःप्रथमो विकारः उच्छूनतासंज्ञकः तत्सदृशः सत्त्वस्य प्रथमो विकारो भाव इति। तं चिअ।

113 तदेव वचनं ते एव लोचने यौवनं च तदेव।
अन्यानङ्गलक्ष्मीरन्यदेव किमपि शंसति॥ § 1171

---

२ म] N.S.P. *avikārakaṃ sattvam.*
२ वे] ३।४०
१२ *] ३।६७
२३ ति] The previous printed text of *DR* gives as *yauvanam api,* instead of *yauvanaṃ ca,* and *sādhayati* instead of *śaṃsati.*

§ 1172

अथ *हावः*— § 1173

...34ab *भावतस्तु स शृङ्गारो हावोऽक्षिभ्रूविकारकृत्। § 1174

प्रतिनियताङ्गविकारकारी शृङ्गारः स्वभावविशेषो हावः। यथा ममैव—*

जं किं पि पेच्छमाणं भणमाणं रे जहा तह चेअ।
णिअसुआणेहमुद्ध वअस्स मुद्धं णिअच्छेहि॥ § 1177

§ 1178

प्रतिनियताङ्गविकारकारीत्यनेन अक्षिभ्रुवस्यैव स विकार इति व्याचष्टे। जं किं पि।

यत्किमपि प्रेक्षमाणां भणन्तीं रे यथा तथैव।
निजसुतास्नेहमुग्ध वयस्य मुग्धां नियच्छ॥ § 1181

§ 1182

अथ *हेला*— § 1183

...34cd स एव हेला सुव्यक्तशृङ्गाररससूचिका॥ ३४॥ § 1184

हाव एव स्पष्टभूयोविकारत्वात् सूव्यक्तशृङ्गाररससूचको हेला। यथा ममैव—

---

२ *] This is the reading in A.T.A. N.S.P. gives it as *hevākasas tu śṛṅgāraḥ*, and Bahurūpamiśra reads it as *helākṛtaḥ sa śṛṅgāraḥ*.
३ *] A.T.A. gives here the verse from *Kumārasaṃbhava: vivṛṇvatī śailasutāpi bhāvam*, etc. But Bhaṭṭanṛsiṃha's *pratīka* confirms the Prakrit verse *jaṃ kiṃ pi*, etc. as the *chāyā* thereof is supplied by him. The Prakrit verse given above is on the basis of the *chāyā* supplied by Bh.Nṛ. N.S.P. reads in the second line *ṇijjhāa ṇehamuddhaṃ* (*nirdhyāya snehamugdhāṃ*), and *paśya* instead of *niyaccha*.
१० च्छ] In the previous printed text of *DR* the second line reads as *nirdhyāya snehamugdhāṃ vayasya mugdhāṃ paśya*.

तह झत्ति से पअत्ता सव्वंगं विब्भमा थणुब्भेए।
संसइअबालभावा होइ चिरं जह सहीणं पि॥ § 1187

§ 1188

तह झत्ति।

तथा झटित्यस्याः प्रवृत्ताः सर्वाङ्गे विभ्रमाः स्तनोद्भेदे।
*संशयितकुमारीभावा भवति चिरं यथा सखीनामपि॥ § 1191

§ 1192

114 अथायत्नजाः सप्त। तत्र *शोभा*— § 1193

...35ab **रूपोपभोगतारुण्यैः शोभाङ्गानां विभूषणम्।** § 1194

यथा कुमारसंभवे—

तां प्राङ्मुखीं तत्र निवेश्य बालां क्षणं व्यलम्बन्त पुरो निषण्णाः।
भूतार्थशोभाह्रियमाणनेत्राः प्रसाधने संनिहितेऽपि नार्यः॥*
§ 1197

इत्यादि। यथा च शाकुन्तले— *

अनाघ्रातं पुष्पं किसलयमलूनं कररुहै- रनाविद्धं रत्नं मधु नवमनास्वादितरसम्।
अखण्डं पुण्यानां फलमिव च तद्रूपमनघं न जाने भोक्तारं कमिह समुपस्थास्यति विधिः॥* § 1200

§ 1201

अथ *कान्तिः*— § 1202

...35cd ***मन्मथाप्यायितच्छाया सैव कान्तिरिति स्मृता॥ ३५॥** § 1203

६ *] Previous edition of *DR* gives *saṃśayitabālabhāvā.*
५ *] ७।९३
६ *] This verse is cited in A.T.A. as an example of *kānti,* the next item.
८ *] २।१०
२ *] A.T.A. and Bahurūpamiśra both give the above reading. N.S.P. reads *manmathāmāpitacchāyā.*

शोभैव रागावतारघनीकृता कान्तिः। यथा—

उन्मीलद्वदनेन्दुदीप्तिविसरैर्दूरे समुत्सारितं भिन्नं
पीनकुचस्थलस्य च रुचा हस्तप्रभाभिर्हतम्।
एतस्याः कलविङ्कण्ठकदलीकल्पं मिलत्कौतुका-
दप्राप्ताङ्गसुखं रुषेव सहसा केशेषु लग्नं तमः॥ § 1206

§ 1207

यथा हि महाश्वेतावर्णनावसरे भट्टबाणस्य। § 1208
मिलत्कौतुकादिति। अङ्गसुखप्राप्तिकौतुकात् मिलदित्यर्थः।* § 1209

अथ *माधुर्यम्*— § 1210 115

...35a **अनुल्बणत्वं माधूर्यं** § 1211

यथा शाकुन्तले—

सरसिजमनुविद्धं शैवलेनापि रम्यं मलिनमपि
हिमांशोर्लक्ष्म लक्ष्मीं तनोति।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी किमिव हि मधुराणां
मण्डनं नाकृतीनाम्॥* § 1214

§ 1215

अथ *दीप्तिः*— § 1216

...36b **दीप्तिः कान्तेस्तु विस्तरः।** § 1217

यथा—

दे आ पसिअ णिअंतसु मुहससिजोण्हाविलुत्ततमणिवहे।

---

६ *] Except T.MS. all others read *aṅgasukhaprāptikautukād ity arthaḥ.*
५ *] १।१७
४ दे] N.S.P. gives the *chāyā* of the first line as *daivād dṛṣṭvā nitāntasumukha-*, etc. and the last word of the verse as *vihatāśe*. Abhinavagupta gives the *chāyā* as above in his *Locana*, and Hemacandra too explains it thus in his *Kāvyānuśāsana* (*H.K.A.* p. ५५): *de iti nipātaḥ prārthanāyām. ā iti tāvacchabdārthe. prārthaye prasīda tāvat nivartasva*, etc.

अहिसारिआण विग्धं करेसि अण्णाण वि हआसे॥ § 1220

§ 1221

दे आ*

प्रार्थये तावत् प्रसीद निवर्तस्व
मुखशशिज्योत्स्नाविलुप्ततमोनिवहे।*
अभिसारिकाणां विघ्नं करोष्यन्यासामपि हताशे॥ § 1224

§ 1225

अथ *प्रागल्भ्यम्*— § 1226

...36c **निःसाध्वसत्वं प्रागल्भ्यं** § 1227

मनःक्षोभपूर्वकोऽङ्गसादः=साध्वसम्, तदभावः प्रागल्भ्यम्। यथा ममैव—

तथा व्रीडाविधेयापि तथा मुग्धापि सुन्दरी।
कलाप्रयोगचातुर्ये सभास्वाचार्यकं गता॥ § 1230

§ 1231

116 निःसाध्वसत्वं नाम साध्वसाभावः। अभावश्च प्रतियोगिनिरूपणाधीननिरूपण इति साध्वसस्वरूपं कथयति मनःक्षोभपूर्वक इति। § 1232

अथौ*दार्यम्*— § 1233

...36d **औदार्यं प्रश्रयः सदा॥ ३६॥** § 1234

यथा—*

३ *] See Note १८५ to *Daśarūpāvaloka*.
४ *] N.S.P. gives the *chāyā* as *daivād dṛṣṭvā nitāntasumukha-*, etc.
३ *] N.S.P. reads *diahaṃ khu dukkhiāe* (*divasaṃ khalu duḥkhitāyāḥ*) and at the end *bharimo pāantasuttassa* (*bharimā pādānte suptasya*). The reading given here based on A.T.A. is confirmed by Bh. Nṛ. See *Laghuṭikā*. --- Gaṅgādharabhaṭṭa, the commentator on the *Gāthāsaptaśati* (N.S.P. ed., Kāvyamālā २१) reads *diahaṃ khuḍakkiāe*, and *pādānta-suptasya* at the end, and explains the verse thus: *khuḍakkiā= roṣamūkā. guruke manyuduḥkhe*

दिअहं अड्डुडूंकिआए सअलं काऊण गेहवावारं।
गरुए वि मण्णुदुक्खे मरिमो पाअंतसुत्ताए॥* § 1237

§ 1238

यथा वा—भ्रूभङ्गे सहसोद्गते* इत्यादि। § 1239
Avaloka:2.36d।

दिवसमड्डुडूत्कृतया सकलं कृत्वा गेहव्यापारम्।
गुरावपि मन्तुदुःखे स्मरामः पादान्तसुप्तायाः॥ § 1242

डुडूत्कारो रणरणिका। मन्तुः कोपविशेषः। § 1243

अथ *धैर्यम्*— § 1244

...37ab चापलाविहता धैर्यं चिद्वृत्तिरविकत्थना। § 1245

चापलानुपहता मनोवृत्तिरात्मगुणानामनाख्यायिका धैर्यमिति। यथा मालतीमाधवे—

ज्वलतु गगने रात्रौ रात्रावखण्डकलः शशी दहतु मदनः किं वा मृत्योः परेण विधास्यति।
मम तु दयितः श्लाघ्यस्तातो जनन्यमलान्वया कुलममलिनं न त्वेवायं जनो न च जीवितम्॥* § 1248

§ 1249

---

*divasaṃ vyāpya gehavyāpāraṃ kṛtvā roṣamūkāyās tasyāḥ pādāntaśayanaṃ smarāmaḥ iti saṃbandhaḥ*. (page ७५). --- Bhaṭṭanṛsiṃha's *aḍuḍūtkṛtayā* and *pādāntasuptāyāḥ* seem to me to be more suitable and to yield a better interpretation. I do not, however, find *ḍuḍutkāra* in the sense of *raṇaraṇikā* in the Prakrit dictionaries available to me. I feel Bh. Nṛ. must have had access to genuine sources for the reading and the interpretation.

२ *] गाथा° ३।२६

४ *] रत्ना° २।२०

६ या] *tayā* is found in T.MS. and it seems to be also in Gr.MS., M.G.T. and Tri.MS. do not read *tayā*. Tri.MS. gives *sakalaṃ* which is also seen in N.S.P. --- *aḍuḍūtkṛtayā* is clear in T.MS. and Gr.MS. Tri.MS. reads *dutkṛtayā*, and in M.G.T. this portion is corrupt. See Note १८६ to *Daśarūpāvaloka*.

६ *] २।२

117 अथ स्वाभाविका दश। तत्र— § 1250

...37cd **प्रियानुकरणं लीला मधुराङ्गविचेष्टितैः॥ ३७॥** § 1251

प्रियकृतानां वाग्वेषचेष्टानामनङ्गश्रृङ्गारिणीनामङ्गनाभिरनुकरणं = *लीला*। यथा ममैव—

तह दिट्ठं तह भणिअं ताए णिउदं तहा तहा सीणं।
अवलोहअं सइण्हं सविब्भमं जह सवत्तीहिं॥ § 1254

यथा वा—तेनोहितं वदति याति तथा यथासौ इत्यादि। § 1255

अङ्गविचेष्टितस्य माधुर्यमिदमित्याह अनङ्गश्रृङ्गारिणीनामिति। तह दिट्ठमिति।

तथा दृष्टं तथा भणितं तथा निवृत्तं तथा तथासीनम।*
अवलोकितं सतृष्णं सविभ्रमं यथा सपत्नीभिः॥ § 1258

§ 1259

अथ *विलासः*— § 1260

...38ab **तात्कालिको विशेषस्तु विलासोऽङ्गक्रियादिषु।** § 1261

दयितावलोकनादिकालेऽङ्गे क्रियायां वचने च सातिशयविशेषोत्पत्तिः=विलासः। यथा मालतीमाधवे—

अत्रान्तरे किमपि
वाग्विभवातिवृत्तवैचित्र्यमुल्लसितविभ्रममायताक्ष्याः।
तद्भूरिसात्त्विकविकारविशेषरम्यमाचार्यकं विजयि
मान्मथमाविरासीत॥* § 1264

§ 1265

अथ *विच्छित्तिः*— § 1266

---

३ कृतानां] N.S.P. *vāgveṣaceṣṭānāṃ śṛṅgāriṇīnām.*
५ णिउदं] N.S.P. *ṇiadaṃ* (*niyatam*), *sīṇam* (*śirṇam*).
८ मित्याह] In N.S.P. the reading is *śṛṅgāriṇīnām.*
१० *] See Note १८८ to *Daśarūpāvaloka.*
६ *] १।२९

...38cd आकल्परचनाल्पापि विच्छित्तिः कान्तिपोषकृत्॥ ३८॥ § 1267

स्तोकोऽपि वेषो बहुतरकमनीयताकारी=विच्छित्तिः। यथा कुमारसंभ- 118
वे—

कर्णार्पितो लोध्रकषायरूक्षे गोरोचनाभेदनितान्तगौरे।
तस्याः कपोले परभागलाभाद् बबन्ध चक्षूंषि यवप्ररोहः॥*
§ 1270

§ 1271

अथ *विभ्रमः*— § 1272

...39ab विभ्रमस्त्वरया काले भूषास्थानविपर्ययः। § 1273

यथा—

अभ्युद्गते शशिनि
पेशलकान्तदूतीसंलापसंवलितलोचनमानसाभिः।
अग्राहि
मण्डनविधिर्विपरितभूषाविन्यासहासितसखीजनमङ्गनाभिः॥
§ 1276

§ 1277

यथा वा ममैव—

श्रुत्वायातं बहिः कान्तमसमाप्तविभूषया।
भालेऽञ्जनं दृशोर्लाक्षा कपोले तिलकः कृतः॥ § 1280

§ 1281

अथ *किलकिञ्चितम्*— § 1282

...39cd क्रोधाश्रुहर्षभीत्यादेः संकरः किलकिञ्चितम्॥ ३९॥
§ 1283

यथा ममैव—

५ *] ७।१७

रतिक्रीडाद्यूते कथमपि समासाद्य समयं मया लब्धे
तस्याः क्वणितकलकण्ठार्धमधरे।
कृतभ्रूभङ्गासौ प्रकटितविलक्षार्धरुदित- स्मितक्रोधोद्भ्रान्तं
पुनरपि विदध्यान्मयि मुखम्॥ § 1286

§ 1287

119 अथ *मोट्टायितम्*— § 1288

...40ab **मोट्टायितं तु तद्भावभावनेष्टकथादिषु।** § 1289

इष्टकथादिषु प्रियतमकथानुकरणादिषु प्रियानुरागेण भावितान्तःकरणत्वं=मोट्टायितम्। यथा पद्मगुप्तस्य—

चित्रवर्तिन्यपि नृपे तत्त्वावेशेन चेतसि।
व्रीडार्धवलितं चक्रे मुखेन्दुमवशैव सा॥ § 1292

नवसाहसाङ्कचरितम् ६।४२ § 1293

यथा वा—

मातः कं हृदये निधाय सुचिरं रोमाञ्चिताङ्गी मुहु-
र्जृम्भामन्थरतारकां सुललितापाङ्गां दधाना दृशम्।
सुप्तेवालिखितेव शून्यहृदया लेखावशेषीभव- स्यात्मद्रोहिणि
किं ह्रिया कथय मे गूढो निहन्ति स्मरः॥ § 1296

§ 1297

यथा वा ममैव—

स्मरदवथुनिमितं गूढमुन्नेतुमस्याः सुभग तव कथायां
प्रस्तुतायां सखीभिः।
भवति विततपृष्ठोदस्तपीनस्तनाग्रा ततवलयितबाहुर्जृम्भितैः
साङ्गभङ्गैः॥ § 1300

§ 1301

अथ *कुट्टमितम्*— § 1302

४ स्य] A.T.A. looks like *dattaguptasya*.

...40cd **सानन्दान्तः कुट्टमितं कुप्येत् केशाधरग्रहे॥ ४०॥**
§ 1303

यथा—

नान्दीपदानि रतिनाटकविघ्नशान्ता- वाज्ञाक्षराणि मधुराणि
मनोभवस्य
दष्टेऽधरे प्रणयिना विधुताग्रपाणेः सीत्कारशुष्करुदितानि 120
जयन्ति नार्याः॥ § 1306

§ 1307

अथ *बिब्बोकः*— § 1308

...41ab **गर्वाभिमानादिष्टेऽपि बिब्बोकोऽनादरक्रिया।** § 1309

यथा ममैव—

सव्याजं तिलकालकान् विरलयँल्लोलाङ्गुलिः संस्पृशन्
वारंवारमुदञ्चयन् कुचयुगप्रोदञ्चिनीलाञ्चलम्।
यद्भ्रूभङ्गतरङ्गिताञ्चितदृशा सावज्ञमालोकित-
स्तद्गर्वादवधीरितोऽस्मि न पुनः कान्ते कृतार्थीकृतः॥ § 1312

§ 1313

अथ *ललितम्*— § 1314

...41cd **सुकुमाराङ्गविन्यासो मसृणो ललितं भवेत्॥ ४१॥**
§ 1315

यथा ममैव—

सभ्रूभङ्गं करकिसलयावर्तनैरालपन्ती सा पश्यन्ती
ललितललितं लोचनस्याञ्चलेन।

---

३ स्य] N.S.P. *vibhramāṇām ājñākṣarāṇi paramāṇy athavā smarasya. Sarasvatīkaṇṭhābharaṇa* of Bhoja (Kāvyamālā ९४, १९२५, p. २६०) has *ratanāṭakavighnaśāntāv ājñākṣarāṇi paramāṇy athavā smarasya … vidhutāgrapāṇi sītkāra-*, etc. ४ न] A.T.A. reads … *-tilakān akālaviratam lolāṅgulībhiḥ spṛśan, … prodañcicīnāṃśukam.*

विन्यस्यन्ती चरणकमले लीलया स्वैरयातै- निःसंगीतं
प्रथमवयसा नर्तिता पङ्कजाक्षी॥ § 1318

§ 1319

अथ *विहृतम्*— § 1320

...42ab प्राप्तकालं न यद् ब्रूयाद् व्रीडया विहृतं हि तत्।
§ 1321

प्राप्तावसरस्यापि वाक्यस्य लज्जया यदवचनं तद् विहृतम्। यथा—

पादाङ्गुष्ठेन भूमिं किसलयरुचिना सापदेशं लिखन्ती भूयो
भूयः क्षिपन्ती मयि सितशबले लोचने लोलतारे।
121 वक्त्रं ह्रीनम्रमीषत्स्फुरदधरपुटं वाक्यगर्भं दधाना यन्मां
नोवाच किंचित् स्मृतमपि हृदये मानसं तद् दुनोति॥
§ 1324

अमरु° श्लो° १३६ § 1325

अथ *नेतुः कार्यान्तरसहाया*नाह— § 1326

...42cd मन्त्री स्वं वोभयं वापि सखा तस्यार्थचिन्तने॥ ४२॥
§ 1327

तस्य नेतुरर्थचिन्तायां तन्त्रावापादिलक्षणायां मन्त्री वात्मा वोभयं वा सहायः। § 1328

तन्त्रावापादिलक्षणायामिति। तन्त्रं स्वराष्ट्रचिन्ता। आवापः परराष्ट्रचिन्ता।
§ 1329

तत्र विभागमाह— § 1330

...43ab मन्त्रिणा ललितः शेषा मन्त्रिस्वायत्तसिद्धयः। § 1331

उक्तलक्षणो ललितो नेता मन्त्र्यायत्तसिद्धिः। शेषाः=धीरोदात्तादयः। अनियमेन मन्त्रिणा स्वेन वोभयेन वाङ्गीकृतसिद्धय इति। § 1332

---

५ पि] N.S.P. *sthitam api.*

५ चिन्ता] *tantraṃ svarāṣṭracintāyām āvāpas tv aricintane* is *>Vaijayantīkośa*. See Mallinātha also on *Śiśupāvadha* II. २८.

*धर्मसहायास्तु*— § 1333

...43cd ऋत्विक्पुरोहितौ धर्मे तपस्विब्रह्मवादिनः॥ ४३॥
§ 1334

ब्रह्म=वेदः, तं वदन्ति व्याचक्षते वा तच्छीला ब्रह्मवादिनः, आत्मज्ञानिनो वा। शेषाः प्रतीताः। § 1335

दुष्टदमनं=दण्डः, त*त्सहायास्तु*— § 1336

सुहृत्कुमाराटविका दण्डे सामन्तसैनिकाः। § 1337

स्पष्टम्। एवं तत्तत्कार्यान्तरेषु सहायान्तराणि योज्यानि। यदाह— § 1338 122

...44cd अन्तःपुरे वर्षवराः किराता मूकवामनाः॥ ४४॥
§ 1339

...45ab म्लेच्छाभीरशकाराद्याः स्वस्वकार्योपयोगिनः। § 1340

शकारः=राज्ञः श्यालो हीनजातिः। § 1341

विशेषान्तरमाह— § 1342

...45cd ज्येष्ठमध्याधमत्वेन सर्वेषां च त्रिरूपता॥ ४५॥
§ 1343

...46ab तारतम्याद् यथोक्तानां गुणानां चोत्तमादिता। § 1344

एवं प्रागुक्तानां नायकनायिकादूतदूतीमन्त्रिपुरोहितादीनामुत्तममध्यमाधमभावेन त्रिरूपता। उत्तमादिभावश्च न गुणसंख्योपचयापचयेन किं तर्हि गुणातिशयतारतम्येन। § 1345

उत्तमादिभावश्चेति। यदि हि गुणसंख्योपचयापचयभावेन उत्तमादिभावो भवेत् तर्हि सर्वेषां नायकानां न भवेत्। अनुनायकादिभावो हि गुणसंख्यापचयेनैव। ततो गुणाद्यतिशयतारतम्येनैव उत्तमादिभाव इत्यर्थः। § 1346

...46cd एवं नाट्ये विधातव्यो नायकः सपरिच्छदः॥ ४६॥
§ 1347

उक्तो नायकः, तद्व्यापारस्तूच्यते— § 1348

...47 तद्व्यापारात्मिका वृत्तिश्चतुर्धा तत्र कैशिकी।
गीतनृत्यविलासाद्यैर्मृदुः शृङ्गारचेष्टितैः॥ ४७॥ § 1350

123 प्रवृत्तिरूपो नेतृव्यापारस्वभावः=वृत्तिः। सा च कैशिकीसात्त्वत्यारभटीभारतीभेदाच्चतुर्विधा। तासां गीतनृत्यविलासकामोपभोगाद्युपलक्ष्यमाणो मृदुः शृङ्गारी कामफलावच्छिन्नो व्यापारः *कैशिकी*। § 1351

कामफलावच्छिन्न इति। कामरूपस्य व्यापारस्य फलावच्छेदेन हि निरूपणम्। तेनाह कामफलावच्छिन्न इति। § 1352

सा तु— § 1353

...48ab *नर्मतत्स्फिञ्जतत्स्फोटतद्गर्भैश्चतुरङ्गिका। § 1354

तदित्यनेन सर्वत्र नर्म परामृश्यते। § 1355

तत्र— § 1356

...48cd वैदग्ध्यक्रीडितं नर्म प्रियोपच्छन्दनात्मकम्॥ ४८॥
§ 1357

...49 हास्येनैव सशृङ्गारभयेन विहितं त्रिधा।
आत्मोपक्षेपसंभोगमानैः शृङ्गार्यपि त्रिधा॥ ४९॥
§ 1359

...50 शुद्धमङ्गं भयं द्वेधा त्रेधा वाग्वेषचेष्टितैः।

१ कः ] 'सपरिग्रहः' इति पाठः.
३ विलासाद्यैर्मृदुः ] The portion from *mṛduḥ śṛṅgāraceṣṭitaiḥ* up to *kāmaphalāvacchinno vyāpāraḥ* is missing in A.T.A.
२ * ] 'नर्मतत्स्फञ्ज' इति पाठः.
४ मानैः ] A.T.A. *saṅgecchā-* in place of *saṃbhoga-*.

सर्वं सहास्यमित्येवं नर्माष्टादशधोदितम्॥ ५०॥
§ 1361

अग्राम्य इष्टजनार्जनरूपः परिहासः=मर्म। तच्च शुद्धहास्येन सशृङ्गारहास्येन सभयहास्येन च रचितं त्रिविधम्। शृङ्गारवदपि स्वानुरागनिवेदनसंभोगेच्छाप्रकाशन-सापराधप्रियप्रतिभेदनैस्त्रिविधमेव। भयनर्मापि शुद्धरसान्तराङ्गभावाद् द्विविधम्। एवं षड्विधस्य प्रत्येकं वाग्वेषचेष्टाव्यतिकरेणाष्टादशविधत्वम् § 1362

शुद्धहास्यं भयहास्यं शृङ्गारहास्यं चेति त्रिविधं हास्यम्। शृङ्गारहास्यमपि आत्मोपक्षेपादिभिः त्रिविधम्। भयहास्यं द्विविधम्। अत एकरूपेण शुद्ध- 124
हास्येन, त्रिविधेन शृङ्गारहास्येन, द्विविधेन भयहास्येन, षड्विधस्य हास्यस्य वाग्वेषचेष्टादिभिः प्रत्येकं त्रैविध्यम्। अतो नर्म अष्टादशविधमिति। तथा व्याचष्टे अग्राम्येत्यादिना। प्रतिभेदनं=तर्जनम्। § 1363

तत्र *वचोहास्यनर्म* यथा—

पत्युः शिरश्चन्द्रकलामनेन स्पृशेति सख्या परिहासपूर्वम्।
सा रञ्जयित्वा चरणौ कृताशीर्माल्येन तां निर्वचनं जघान॥*
§ 1366

§ 1367

*वेषनर्म* यथा नागानन्दे विदूषकशेखरकव्यतिकरे। *क्रियानर्म* यथा मालविकाग्निमित्रे उत्स्वप्रायमानस्य विदूषकस्योपरि निपुणिका सर्पभ्रमकारणं दण्डकाष्ठं पातयति। एवं वक्ष्यमाणेष्वपि वाग्वेषचेष्टापरत्वमुदाहार्यम्।
§ 1368

शृङ्गारवदा*त्मोपक्षेपनर्म* यथा—

मध्याह्नं गमय त्यज श्रमजलं स्थित्वा पयः पीयतां मा
शून्येति विमुह्य सार्थविमुखःशीतः प्रपामण्डपः।
तामेव स्मर घस्मरस्मरशरत्रस्तां निजप्रेयसीं त्वच्चित्तं तु न
रञ्जयन्ति पथिक प्रायः प्रपापालिकाः॥ § 1371

§ 1372

विमुह्येति। क्रियापदमिदम्। § 1373

*संभोगनर्म* यथा—

सालोएं चिअ सूरे घरिणी घरसामिअस्स घेत्तूण।

---

३ *] कुमार° ७।१९
१० विमुखः] N.S.P. *vimuñca pāntha vivaśaḥ* in place of *vimuhya sārtha- vimukhaḥ.*

णेच्छंतस्स वि पाए धुवइ हसंती हसंतस्स॥* § 1376

§ 1377

सालोएं चिअ*।

सालोक एव सूर्ये गृहिणी गृहस्वामिनो गृहीत्वा।
नेच्छतोऽपि पादौ धावति हसन्ती हसतः॥ § 1380

§ 1381

125 *माननर्म* यथा—

तदवितथमवादीर्यन्मम त्वं प्रियेति प्रियजनपरिभुक्तं यद्दुकूलं दधानः।
मदधिवसतिमागाः कामिनां मण्डनश्री- र्व्रजति हि सफलत्वं वल्लभालोकनेन॥* § 1384

§ 1385

*भयनर्म* शुद्धं यथा रत्नावल्यामालेख्यदर्शनावसरे—

**सुसंगता** *जाणिदो मए एसो सव्वो वुत्तंतो समं चित्तफलएण। ता देवीए णिवेदइस्सं।

इत्यादि। § 1386

*शृङ्गाराङ्गं भयनर्म*। यथा ममैव—

अभिव्यक्तालीकः सकलविफलोपायविभव- श्चिरं ध्यात्वा सद्यः कृतकृतकसंरम्भनिपुणम्।
इतः पृष्ठे पृष्ठे किमिदमिति संत्रास्य सहसा कृताश्लेषं धूर्तः स्मितमधुरमालिङ्गति वधूम्॥ § 1389

§ 1390

अथ *नर्मस्फिञ्जः*— § 1391

...51ab **नर्मस्फिञ्जः सुखारम्भो भयान्तो नवसंगमे।** § 1392

१ धुवइ] N.S.P. *dhuai* and *chāyā* as *dhunoti.*
१ *] गाथा° २।३०
३ *] See Note ११५ to *Daśarūpāvaloka.*
५ ति] N.S.P. has the *chāyā* here as *anicchato 'pi pādau dhunoti.*
३ *] शिशु° ११।३३
५ शुद्धं] N.S.P. omits *śuddham.*
५ *] 'ज्ञातो मयैष सर्वो वृत्तान्तः सह चित्रफलकेन। तद्देव्यै निवेदयिष्यामि।' इति च्छाया.

यथा मालविकाग्निमित्रे संकेते नायकमभिसृतायां नायिकायां नायकः—

विसृज सुन्दरि संगमसाध्वसं ननु चिरात् प्रभृति प्रणयोन्मुखे।
परिगृहाण गते सहकारतां त्वमतिमुक्तलताचरितं मयि॥*
§ 1395

**मालविका** *भट्टा, देवीए भयेण अत्तणो वि पिअं काउं ण पारेमि 126
इत्यादि। § 1396

अथ *नर्मस्फोटः*— § 1397

...51cd नर्मस्फोटस्तु भावानां सूचितोऽल्परसो लवैः॥ ५१॥
§ 1398

यथा मालतीमाधवे—

गमनमलसं शून्या दृष्टिः शरीरमसौष्ठवं श्वसितमधिकं किं न्वेतत् स्यात् किमन्यदतोऽथ वा। भ्रमति भुवने कंदर्पाज्ञा विकारि च यौवनं ललितमधुरास्ते ते भावाः क्षिपन्ति च धीरताम्॥* § 1400 &

इत्यत्र गमनादिभिर्भावलेशैर्माधवस्य मालत्यामनुरागः स्तोकः प्रकाश्यते।
§ 1401

अथ *नर्मगर्भः*— § 1402

...52 छन्ननेत्रप्रतीचारो नर्मगर्भोऽर्थहेतवे।
अङ्गैः सहास्यनिर्हास्यैरेभिरेषात्र कैशिकी॥ ५२॥
§ 1404

यथामरुशतके—

दृष्ट्वैकासनसंस्थिते प्रियतमे पश्चादुपेत्यादरा- देकस्या नयने निमील्य विहितक्रीडानुबन्धच्छलः।

४ *] ४।१३
५ *] 'भर्तः, देव्या भयेनात्मनोऽपि प्रियं कर्तुं न पारयामि।' इति च्छाया.
५ *] १।२०

ईषद्वक्रितकंधरः सपुलकः प्रेमोल्लसन्मानसा-
मन्तर्हासलसत्कपोलफलकां धूर्तोऽपरां चुम्बति॥* § 1407

§ 1408

यथा प्रियदर्शिकायां गर्भाङ्के वत्सराजवेषमनोरमास्थाने साक्षाद् वत्सराजप्रवेशः। § 1409

127 अथ *सात्त्वती*— § 1410

...53 विशोका सात्त्वती सत्त्वशौर्यत्यागदयार्जवैः।
संलापोत्थापकावस्यां संघात्यः परिवर्तकः॥ ५३॥
§ 1412

शोकहीनः सत्त्वशौर्यत्यागदयाहर्षादिभावोत्तरो नायकव्यापारः=सात्त्वती। तदङ्गानि च संलापोत्थापकसंघात्यपरिवर्तकाख्यानि। § 1413

तत्र— § 1414

...54ab संलापको गभीरोक्तिर्नानाभावरसा मिथः। § 1415

यथा वीरचरिते—

**मकरन्दः** अयं स यः किल सपरिवारकार्तिकेयविजयावर्जितेन भगवता नीललोहितेन परिवत्सरसहस्रान्तेवासिने तुभ्यं प्रसादीकृतः परशुः।*

**परशुरामः** आम्, दाशरथे, स एवायमाचार्यपादानां प्रियः परशुः,—

शस्त्रप्रयोगखुरलीकलहे गणानां सैन्यैर्वृतो विजित एव मया कुमारः।
एतावतापि परिरभ्य कृतप्रसादः प्रादादिमं प्रियगुणो भगवान् गुरुर्मे॥* § 1417 &

इत्यादिनानाप्रकारभावरसेन रामपरशुरामयोरन्योन्यगभीरवचसा संलाप इति। § 1418

शस्त्रप्रयोगखुरलीकलहे=शस्त्राभ्यासदशाभाविनि कलहे। § 1419

१ *] श्लो॰ ११
३ मास्थाने] MSS. read Susaṃgatā for Manoramā. As was pointed out by G.C.O. Haas (१९६२, p. ७०) this must be an error. A scribe being familiar with *Ratnā :alī* and *Priyadarśikā* must have confused the names of the characters, and so must have written one for the other.
४ *] पृ॰ ६८-६९
७ *] वी॰ च॰ २।३४

अथो*त्थापकः*— § 1420

...54cd उत्थापकस्तु यत्रादौ युद्धायोत्थापयेत् परम्॥ ५४॥
§ 1421

यथा वीरचरिते— 128

आनन्दाय च विस्मयाय च मया दृष्टोऽसि दुःखाय वा
वैतृष्ण्यं नु कुतोऽद्य संप्रति मम त्वद्दर्शने चक्षुषः।
त्वत्सांगत्यसुखस्य नास्मि विषयः किं वा बहुव्याहृते-
रस्मिन् विश्रुतजामदग्न्यविजये बाहौ धनुर्जृम्भताम्॥*
§ 1424

§ 1425

अथ *संघात्यः*— § 1426

...55ab मन्त्रार्थदैवशक्त्यादेः संघात्यः संघभेदनम्। § 1427

मन्त्रशक्त्या, यथा मुद्राराक्षसे राक्षससहायादीनां चाणक्येन स्वबुद्ध्या भेदनम्। अर्थशक्त्या तत्रैव, यथा पर्वतकाभरणस्य राक्षसहस्तगमनेन मलयकेतुसहोत्थायिभेदनम्। दैवशक्त्या तु, यथा रामायणे रामस्य दैवशक्त्या रावणाद्विभीषणस्य भेद इत्यादि। § 1428

अथ *परिवर्तकः*— § 1429

...55cd प्रारब्धोत्थानकार्यान्यकरणात् परिवर्तकः॥ ५५॥
§ 1430

प्रस्तुतस्योद्योगकार्यस्य परित्यागेन कार्यान्तरकरणं=परिवर्तकः। § 1431
यथा वीरचरिते—

हेरम्बदन्तमुसलोल्लिखितैकभित्ति वक्षो
विशाखविशिखव्रणलाञ्छनं मे।
रोमाञ्चकञ्चुकितमद्भुतवीरलाभाद् यत् सत्यमद्य
परिरब्धुमिवेच्छति त्वाम्॥* § 1434

५ *] ५।४१
६ *] २।३८

रामः भगवन्, परिरम्भणमिति प्रस्तुतप्रतीपमेतत्।
इत्यादि। § 1435

129 सात्वतीमुपसंहरन्न*आरभटी*लक्षणमाह— § 1436

...56 **एभिरङ्गैश्चतुर्धेयं सात्वत्यारभटी पुनः।**
**मायेन्द्रजालसंग्रामक्रोधोद्भ्रान्तादिचेष्टितैः॥ ५६॥**
§ 1438

...57ab **संक्षिप्तिका स्यात् संफेटो वस्तूत्थानावपातने।** § 1439

माया मन्त्रबलेनाविद्यमानवस्तुप्रकाशनम्। तन्त्रबलादिन्द्रजालम्। § 1440 मायेन्द्रजालयोर्वैषम्यमाह मायेति। § 1441

तत्र— § 1442

...57cd **संक्षिप्तवस्तुरचना संक्षिप्तिः शिल्पयोगतः॥ ५७॥**
§ 1443

...58ab **पूर्वनेतृनिवृत्त्यान्ये नेत्रन्तरपरिग्रहम्।** § 1444

मृद्वंशदलचर्मादिद्रव्ययोगेन वस्तूत्थापनं संक्षिप्तिः। यथोदयनचरिते किलिञ्जहस्तिप्रयोगः। पूर्वनायकावस्थानिवृत्त्यावस्थान्तरपरिग्रहमन्ये संक्षिप्तिकां मन्यन्ते। यथा वालिनिवृत्त्या सुग्रीवः। यथा च परशुरामस्यौद्धत्यनिवृत्त्या शान्तत्वापादनं पुण्या ब्राह्मणजातिः— इत्यादिना। § 1445

पूर्वनायकेति। धर्मिभेदोऽङ्गीकृतः पूर्वत्र। अपरत्र एकस्मिन्नपि धर्मिणि धर्मभेदोऽङ्गीकृत इति व्याख्याविकल्पः। § 1446

अथ *संफेटः*— § 1447

...58cd **संफेटस्तु समाघातः क्रुद्धसंरब्धयोर्द्वयोः॥ ५८॥**
§ 1448

७ नं] वी° च° ४।२२
८ त्र] The portion from *ekasmin* up to *kirātaśabdārthaḥ* is missing in Tri.MS. and M.G.T.

यथा माधवाघोरघण्टयोर्मालतीमाधवे। इन्द्रजिल्लक्ष्मणयोश्च रामायणप्रतिबद्धवस्तुषु। § 1449

क्रुद्धसंरब्धयोर्द्वयोरिति। क्रुद्धयोः तत एव संरब्धयोर्द्वयोरित्यर्थः। § 1450 130

अथ *वस्तूत्थापनम्*— § 1451

...59ab **मायाद्युत्थापितं वस्तु वस्तूत्थापनमिष्यते।** § 1452

यथोदात्तराघवे—

जीयन्ते जयिनोऽपि सान्द्रतिमिरव्रातैर्वियद्व्यापिभि- र्भास्वन्तः
सकला रवेरपि कराः कस्मादकस्मादमी।
एतैश्चोग्रकबन्धरन्ध्ररुधिरैराध्मायमानोदरा
मुञ्चन्त्याननकन्दरानलमुचस्तीव्रारवाः फेरवाः॥ § 1455

इत्यादि। § 1456

अथा*वपातः*— § 1457

...59cd **अवपातस्तु निष्क्रामः प्रवेशत्रासविद्रवैः॥ ५९॥**
§ 1458

यथा रत्नावल्याम्—

कण्ठे कृत्तावशेषं कनकमयमधः शृङ्खलादाम कर्षन् क्रान्त्वा
द्वाराणि हेलाचलचरणरणत्किङ्किणीचक्रवालः।
दत्तातङ्को गजानामनुसृतसरणिः संभ्रमादश्वपालैः प्रभ्रष्टोऽयं
प्लवङ्गः प्रविशति नृपतेर्मन्दिरं मन्दुरातः॥* § 1461

नष्टं वर्षवरैर्मनुष्यगणनाभावादकृत्वा त्रपा- मन्तः
कञ्चुकिकञ्चुकस्य विशति त्रासादयं वामनः।
पर्यन्ताश्रयिभिर्निजस्य सदृशं नाम्नः किरातैः कृतं कुब्जा
नीचतयैव यन्ति शनकैरात्मेक्षणाशङ्किनः॥* § 1464

§ 1465

यथा च प्रियदर्शिकायां प्रथमेऽङ्के विन्ध्यकेतुवस्कन्दे। § 1466 131

४ पि] N.S.P. *rucaḥ* instead of *karāḥ*.
५ *] २।२
८ *] रत्ना॰ २।३

निजस्य सदृशं नाम्नः किरातैः कृतमिति। कीर्यन्त इति किराताः इति हि किरातशब्दार्थः। § 1467

उपसंहरति— § 1468

...60 एभिरङ्गैश्चतुर्धेयं नार्थवृत्तिरतः परा।
चतुर्थी भारती सापि वाच्या नाटकलक्षणे॥ ६०॥
§ 1470

...61 भारतीं सात्त्वतीं चार्थवृत्तिमारभटीमिति।
पठन्तः पञ्चमीं वृत्तिमौद्भटाः प्रतिजानते॥ ६१॥
§ 1472

सा तु न लक्ष्येषु क्वचिदपि दृश्यते। न चोपयुज्यते। रसेषु हास्यादीनाम् अभारत्यात्मकत्वात् (?) नीरसस्य च काव्यार्थस्याभावात् तिस्र एवैता अर्थवृत्तयः। भारती तु शब्दवृत्तिरामुखसङ्ग[त]त्वात् [आमुखाङ्गत्वात्] तत्रैव वाच्या। § 1473

कैर्वा वृत्त्यन्तरमुच्यते। कीदृशी च तस्याः संज्ञेत्यत्राह भारतीं सात्त्वतीमिति। *औद्भटैर्वृत्त्यन्तरमुच्यते। अर्थवृत्तिरिति च तस्याः संज्ञेति। निराक-

१ किराताः] The sentence should be *kīryanta iti kirātāḥ*. This is found only in Gr.MS. In others it is missing.
४ तीं] This is the reading in A.T.A. and in Bahurūpamiśra’s. But N.S.P. gives *kaiśikīm* in the place of *bhāratīm*.
७ हास्यादीनाम्] See Notes ११६ and ११८ to *Laghuṭīkā*.
१० त्राह] N.S.P. reads *kaiśikīṃ sāttvatīm*, etc. Bh.Nṛ’s *pratīka* shows it as *bhāratīṃ sāttvatīm*, etc. which is also the reading in B.M.’s and in all MSS. of the *Laghuṭīkā*.
११ *] T.MS. clearly reads *auttarair vṛttyantaram ucyate* instead of *audbhaṭair*, etc. And there is no mention in T.MS. of Udbhaṭa or *audbhaṭa* here. Tri.MS. however gives it as *audbhaṭair vā*, and in M.G.T. the portion is missing. In Gr.MS. only *-dbha-* is visible, and other syllables are missing. So, it is not clear as to what should be the correct reading here. The *kārikā* II.६१ of the *DR* has created considerable difficulty in offering a correct interpretation. See Prof. V. Raghavan’s paper on *vṛtti*s in *The Journal of Oriental Research*, Madras, vols. ६

and ७. --- Prof. Raghavan says that *arthavṛtti* in the *kārikā* stands for *phalavṛtti* of Udbhaṭa, and that his view is being criticized by Dhanaṃjaya, but Dhanaṃjaya's reference is an incorrect one. As Udbhaṭa accepted only three *vṛtti*s and not five, the references to his *phalavṛtti* as *pañcamī* by Dhanaṃjaya and later by Śāradātanaya are all wrong. Therefore, he says, the reference to *phalavṛtti* of Udbhaṭa by Dhanaṃjaya and Śāradātanaya shows only their misunderstanding of the position of Udbhaṭa. Now there are many points which arise from these remarks of Prof. Raghavan. --- (१) If it was a reference to Udbhaṭa's *phalavṛtti* why should Dhanaṃjaya have used the words *arthavṛtti* instead of *phalavṛtti* and *audbhaṭa* instead of Udbhaṭa ? He could have given the *kārikā* in a different way. For instance, kaiśikīṃ (bhāratīṃ) sāttvatīṃ caivaṃ phalavṛttir itīritām | pañcamīm aparāṃ vṛttim udbhaṭaḥ pratyapadyata || could have been the *kārikā*, if is was his clear intention. To write a suitable *kārikā* should not have been a problem for one who wrote so many *kārikā*s. --- The *two words* in the existing *kārikā*, *iti paṭhantaḥ*, seem to me to indicate that the previous line is a quotation from some writer, and this line does not seem to be the same as cited in the *Abhinavabhāratī*, which is also one of the sentences taken into account by Dr. V. Raghavan. Therefore I feel that it is perhaps a reference to some other writers who were followers of the school of Udbhaṭa, whose text is of course not available now. --- (२) Further Bahurūpamiśra explains this *kārikā* thus: *udbhaṭamatānusāriṇāṃ bhāratīm apy arthavṛttim ācakṣāṇānāṃ punaḥ śabdavṛttyaṅgīkāreṇa vṛttīpañcakapratijñānaṃ bhaved ity āha bhāratīṃ sāttvatīm*, etc. *etac ca pratijñāmātram eva nopapattiyuktam. bhāratyāḥ śabdavṛttitvena arthavṛttivābhāvād ity uktaṃ pratijānate iti*. (Tri.MS. of B.M., pp. १०९–१०.) --- Thus B.M.'s explanation is against the interpretations given by Prof. Raghavan (of course Prof. Raghavan later on stated that B.M. was wrong here) as B.M. does not take it as a reference to *phalavṛtti* of Udbhaṭa at all. *Udbhaṭamatānusāriṇām* thus seems to indicate that it is a reference to some followers of Udbhaṭa's. Till we get some more reliable evidence, I do not feel like taking it as a reference to *phalavṛtti* of Udbhaṭa. --- (३) Bh.Nṛ's explanation seems to be different even from that of Bahurūpamiśra. Bh.Nṛ. says *arthavrttir iti ca tasyāḥ saṃjñeti*, and therefore there was perhaps

रोति न लक्ष्येष्विति। अदृष्टाप्युपयुज्यते चेत् सा वक्तव्या। नेत्याह न चेति। N.S.P. and A.T.A. give bhāratyātmakatvāt. But T.MS., M.G.T., and Tri.MS. show the pratīka clearly as abhāratyātmakatvāt. The significance of the Avaloka and L.Ṭ. is not very clear, because of confusing readings. Abhāratyātmakatvāt is preferable, and it seems to be in the sense of bhāratībhinnavṛttyanyatamātmakatvāt in the light of the pratīka and explanation by Bh.Nṛ. as abhāratyātmikābhir etābhir ananuviddhaḥ kāvyārtho nāsti.अभारत्यात्मकत्वादिति। अभारत्यात्मिकाभिरेताभिरननुविद्धः काव्यार्थो नास्ति। भारती तु शब्दवृत्तिः। अत एव ताभ्यस्तिसृभ्यो व्यतिरिक्ता काचिदर्थवृत्तिर्न संभवतीत्यर्थः। § 1474

*वृत्तिनियम*माह— § 1475

...62 श‍ृङ्गारे कैशिकी वीरे सात्त्वत्यारभटी पुनः।

some text or commentary (on *NS.*) (written by some person who was among the followers of Udbhaṭa's), discussing this *vṛttyantara*, which is being criticized by Dhanaṃjaya. Whether it was *bhāratī* as *arthavṛtti* and different from the *bhāratī*, the *śabdavṛtti* (noted by B.M.) or some other *vṛtti* called *arthavṛtti*, is not clear from available data. Unlike B.M. Bh. Nṛ. seems to mean it as a different *arthavṛtti* (not *bhāratī* itself as *arthavṛtti*). Bh.Nṛ. is unfortunately not as elaborate as to give us a clear and a fuller information on this. His sentences seem to mean that even in the case of any of the *rasa*s, i.e. *hāsya*, etc. there is no dramatic action which does not involve one or the other of the three *vṛtti-s—kaiśikī, sāttvatī* and *ārabhaṭī. Bhāratī* being a *śabdavṛtti* is a common one for all. Therefore (there is no need and ?) there is no other *arthavṛtti* over and above the three, *kaiśikī, sāttvatī*, and *ārabhaṭī*.

१ रोति] This is the reading in all the MSS. N.S.P. gives a different reading.

११ नुविद्धः] Only T.MS. gives it as *anuviddhaḥ*. This is perhaps a mistake of the scribe, for all other MSS.—Gr. MS., M.G.T. and Tri.MS.—read clearly *ananuviddhaḥ*.

२ कैशिकी] While mentioning here the four *rasa-s, śṛṅgāra, vīra, raudra* and

रसे रौद्रे च बीभत्से वृत्तिः सर्वत्र भारती॥ ६२॥
§ 1477

रसेष्वेता वृत्तोर्नियच्छति शृङ्गारे कैशिकीति। § 1478 132

देशभेदभिन्नवेषादेस्तु नायकादिव्यापारः प्रवृत्तिरित्याह— § 1479

...63 देशभाषाक्रियावेषलक्षणाः स्युः प्रवृत्तयः।
लोकादेवावगम्यैता यथौचित्यं प्रयोजयेत्॥ ६३॥
§ 1481

देशभाषात्मिकायाः प्रवृत्तेर्लक्षणाकरणे हेतुमाह लोकादेवेति। शेषं सुगमम्। § 1482

तत्र *पाठ्यं* प्रति विशेषः— § 1483

...64 पाठ्यं तु संस्कृतं नृणामनीचानां कृतात्मनाम्।
लिङ्गिनीनां महादेव्या मन्त्रिजावेश्ययोः क्वचित्॥
६४॥ § 1485

क्वचिदिति देवीप्रभृतीनां संबन्धः। § 1486

---

*bībhatsa*, Dhanaṃjaya seems to have in mind what is given in his own *kārikā-s* IV. ४३, ४४, etc. The gist of his intention seems to be that *kaiśikī* is connected with *śṛṅgāra* and *hāsya, sāttvatī* with *vīra* and *adbhuta*, and *ārabhaṭī* with the other four, i.e. *raudra, bībhatsa, karuṇa* and *bhayānaka*. See also *Nāṭyaśāstra* of G.O.S. edition (XX. ७३ and ७४) which shows some readings in the text and gives different readings in the Footnotes. The Footnote readings in G.O.S. notes as: १. *bhayānake ca bibhatse raudre cārabhaṭī bhavet;* and २. *sarveṣu rasabhāveṣu bhāratī saṃprakīrtitā* seem, in the light of Dhanaṃjaya's *kārikā-s*, to be correct. See also Śiṅgabhūpāla's *Rasārṇavasudhākara* (T.S.S.) from *etac ca śṛṅgāragrahaṇaṃ* on page ८६ to *bhāratyāḥ sarvarasasādhāraṇyam upapannam eva*, and *kārikā* २९० and २९१ (A) on page ८७.

३ म्यैता] 'अधिगम्य', 'उपगम्य', 'अनुगम्य' इति पाठाः

...65ab स्त्रीणां तु प्राकृतं प्रायः शौरसेन्यधमेषु च। § 1487

प्रकृतेरागतं प्राकृतम्। प्रकृतिः संस्कृतम्। तद्भवं तत्समं देशीत्यनेकप्रकारं प्राकृतम्। *शौरसेनी मागधी च स्वशास्त्रनियते। § 1488

...65cd पिशाचात्यन्तनीचादौ पैशाचं मागधं तथा॥ ६५॥
§ 1489

...66 यद्देशं नीचपात्रं यत् तद्देशं तस्य भाषितम्।
कार्यतश्चोत्तमादीनां कार्यो भाषाव्यतिक्रमः॥ ६६॥
§ 1491

स्पष्टार्थमेतत्। § 1492

133 आमन्त्र्यामन्त्रकौचित्येना*मन्त्रण*माह— § 1493

...67 भगवन्तोऽधरैर्वाच्या विद्वद्देवर्षिलिङ्गिनः।
विप्रामात्याग्रजाश्चार्या नटीसूत्रभृतौ मिथः॥ ६७॥
§ 1495

आर्याविति संबन्धः। § 1496

...68 रथी सूतेन चायुष्मान् पूज्यैः शिष्यात्मजानुजाः।
वत्सेति तातः पूज्योऽपि सुगृहीताभिधस्तु तैः॥
६८॥ § 1498

अपिशब्दात् पूज्येन शिष्यात्मजानुजास्तातेति वाच्याः। सोऽपि तैस्तातेति सुगृहीतनामा चेति। § 1499

...69ab भावोऽनुगेन सूत्री च मार्षेत्येतेन सोऽपि च। § 1500

---

५ प्रायः ] ‘शूरसेनी’, ‘सौरसेनी’ इति पाठौ.
२ *] A.T.A. reads *saṃskṛtaṃ śāstraniyatam.*
२ रैर्वाच्या ] This is the reading in A.T.A. and in B.M.’s. N.S.P. gives *bhagavanto ’varaih.*

सूत्रधारः पारिपार्श्वकेन भाव इति वक्तव्यः। स च सूत्रिणा मार्ष इति।
§ 1501

...69cd देवः स्वामीति नृपतिर्भृत्यैर्भट्टेति चाधमैः॥ ६९॥
§ 1502

...70ab आमन्त्रणीयाः पतिवज्ज्येष्ठमध्याधमैः स्त्रियः। § 1503

विद्वद्देवादिस्त्रियो भर्तृरिव वाचकैः आमन्त्रणीयाः। § 1504

तत्र स्त्रियं प्रति विशेषः— § 1505

...70cd समा हलेति प्रेष्या च हञ्जे वेश्याज्जुका तथा॥
७०॥ § 1506

...71 *कुट्टिन्यत्तेत्यनुगतैः पूज्याम्बा जरती जनैः।
विदूषकेण भवती राज्ञा चेटीति शब्द्यते॥ ७१॥
§ 1508

पूज्या जरती अम्बेति। स्पष्टमन्यत्। § 1509

...72 चेष्टागुणोदाहृतसत्त्वभावान् विशेषतो 134
नेतृदशाविभिन्नान्।
को वक्तुमीशो भरतो न यो वा यो वा न देवः
शशिखण्डमौलिः॥ ७२॥ § 1511

इति धनंजयविरचिते दशरूपके द्वितीयः प्रकाशः

दिङ्मात्रं दर्शितमित्यर्थः। चेष्टाः=लीलाद्याः, गुणाः=विनयाद्याः, सत्त्वं=निर्विकारात्मकं मनः, भावः=सत्त्वस्य प्रथमो विकारः, तेन हावादयो ह्युपलक्षिताः। § 1513

३ कैः ] N.S.P. *bhartṛvad eva devarādibhir vācyāḥ.*
३ * ] N.S.P. *kuṭṭiny ambety anugataiḥ pūjyā vā jaratījanaiḥ.*

इति श्रीविष्णुसूनोर्धनिकस्य कृतौ दशरूपावलोके नेतृप्रकाशो नाम द्वितीयः प्रकाशः समाप्तः

चेष्टागुणेति। चेष्टया गुणैश्च उदाहृतम् उन्नीतम् सत्त्वं भावश्च येषां तान् विशेषतो नायकदशायां धीरप्रशान्तादिभेदेन भिन्नान् नायकान् न केवलमहमेव अन्योऽपि को वक्तुमीशः यो भरतो न भवति। यो वा देवः शशिखण्डमौलिर्न भवतीत्यर्थः। तर्हि कथं त्वयोच्यते। तत्राह दिङ्मात्रमिति।
§ 1515

इति धनिककृतस्य दशरूपावलोकस्य भट्टनृसिंहकृतायां टीकायां द्वितीयः परिच्छेदः[१]

# ३ तृतीयः प्रकाशः

बहुवक्तव्यतया रसविचारातिलङ्घनेन वस्तुनेतृरसानां विभज्य नाटकादिषूपयोगः प्रतिपाद्यते— § 1517

...1 प्रकृतित्वादथान्येषां भूयोरसपरिग्रहात्।
संपूर्णलक्षणत्वाच्च पूर्वं नाटकमुच्यते॥ १॥ § 1519

उद्दिष्टधर्मकं हि नाटकमनुद्दिष्टधर्माणां प्रकरणादीनां प्रकृतिः। शेषं प्रतीतम्। § 1520

### तृतीयः परिच्छेदः[२]

बहुवक्तव्यतयेति। वस्तुनेतृविचारानन्तरं रसे प्रतिपादनीयेऽपि तत्र बहुविधं वक्तव्यमस्तीति पश्चाद् वक्तुमिदानीं रसविचारं सिद्धं कृत्वा तमतिलङ्घ्य वस्तुनेतृरसानां नाटकादिषु तावदुपयोगः प्रतिपाद्यत इत्यर्थः। तत्र प्रथमं नाटकलक्षणवचने हेतुरुक्तः प्रकृतित्वादिति। अन्येषां प्रकरणादीनां विकृतिभूतानामस्य प्रकृतित्वात्, भूयसां रसानामङ्गत्वेनाङ्गित्वेन चात्र परिग्रहात्, अस्य संपूर्णलक्षणत्वाच्च प्रकरणादिभ्यः पूर्वं नाटकमुच्यत इति। किमिदमस्य प्रकृतित्वं नाम इत्यपेक्षायामाह उद्दिष्टधर्मकमिति। § 1521

१. Only Gr.MS. reads *prakāśaḥ*.
२. T.MS. gives clearly *tṛtīyaḥ paricchedaḥ*.

२ म्] N.S.P. gives *udāhṛti* in the *kārikā*, and in the *Avaloka* as *udāhṛtayaḥ saṃskṛtaprākṛtādyā uktayaḥ*.

३ तान्] All MSS. read *viśeṣato*. N.S.P. reads *aśeṣato*.

तत्र— § 1522

...2 पूर्वरङ्गं विधायादौ सूत्रधारे विनिर्गते।
प्रविश्य तद्वदपरः काव्यार्थं स्थापयेन्नटः॥ २॥ § 1524

पूर्वं रज्यतेऽस्मिन्निति पूर्वरङ्गः उत्थापनादिप्रयोगः। नाट्यशालायां ता- 136
त्स्थ्यात्। प्रथमं प्रयोगे तद् उत्थापनादौ पूर्वरङ्गत्वम्। तं विधाय विनिर्गते प्रथमं सूत्रधारे तद्वदेव वैष्णवस्थानकादिना प्रविश्यान्यो नटः काव्यार्थं स्थापयेत्। स च काव्यार्थस्थापनात् सूचनात् स्थापकः। § 1525

पूर्वरङ्गशब्दार्थमाह पूर्वं रज्यतेऽस्मिन्निति। अभिनयात् पूर्वं सामाजिकैरुत्थापनादिप्रयोगे हि रज्यत इति। तर्हि नाट्यशालायां कथं पूर्वरङ्गशब्दप्रयोगः। तत्राह तात्स्थ्यादिति। तत्स्थः खलूत्थापनादिप्रयोगः। तेनेदं तात्स्थ्यमादाय नाट्यशालापि तथोच्यत इति। वैष्णवस्थानकादिना। *विष्णुसंबन्धवेषप्रभृतिना। § 1526

दिव्यमर्त्ये स तद्रूपो मिश्रमन्यतरस्तयोः।
सूचयेद् वस्तु बीजं वा मुखं पात्रमथापि वा॥ ३॥
§ 1528

स स्थापको दिव्यं वस्तु दिव्यो भूत्वा मर्त्यं च मर्त्यरूपो भूत्वा मिश्रं च दिव्यमर्त्ययोरन्यतरो भूत्वा सूचयेत्। वस्तु बीजं मुखं पात्रं वा। § 1529

दिव्यमर्त्ये इति। शुद्धदिव्यं वस्तु शुद्धदिव्यो भूत्वा मर्त्यं वस्तु मर्त्यो भूत्वा मिश्रं वस्तु दिव्यमर्त्ययोरन्यतरो भूत्वा=दिव्यो मर्त्यो वा भुत्वा सूचयेत्।

---

३ रः] This is the reading in A.T.A. and in B.M.'s. N.S.P. reads *kāvyam āsthāpayennaṭaḥ*. See *Abhinavabhāratī* on १६२. Abhinavagupta seems to have a different view about *sūtradhāra* and *sthāpaka*,as he takes only the appearance to be different, and not the person.
४ ङ्गः] Up to *nāṭyaśālāyāṃ tātsthyāt* is clear in A.T.A. The next line is not very clear. N.S.P. reads here *pūrvaraṅgo nāṭyaśālā. tatsthaprathamaprayogavyutthāpanādau pūrvaraṅgatā.* A.T.A. reading seems to be confirmed by Bh. Nṛ.
९ हि] Only T.M.S. reads *prayoge 'bhirajyata iti*. See *>Nāṭyaśāstra* (G.O.S.) V. २२, etc. and *Abhinavabhāratī* on page २१६.
१० त्राह] N.S.P. does not give it. But according to Bh.Nṛ. it seems it has to be.
११ *] See also *Abhinavabhāratī* under X. ५३.

सूचयंश्च तत्रापि वस्तु बीजं मुखं पात्रं वा सूचयेदित्यर्थः। तथा व्याचष्टे स स्थापक इत्यादिना। § 1530

*वस्तु* यथोदात्तराघवे—

रामो मूर्ध्नि निधाय काननमगान्मालामिवाज्ञां गुरो-
स्तद्भक्त्या भरतेन राज्यमखिलं मात्रा सहैवोज्झितम्।
तौ सुग्रीवविभीषणावनुगतौ नीतौ परां संपदं प्रोद्वृत्ता
दशकंधरप्रभृतयो ध्वस्ताः समस्ता द्विषः॥ § 1533

§ 1534

137 *बीजं* यथा रत्नावल्याम्—

द्वीपादन्यस्मादपि मध्यादपि जलनिधेर्दिशोऽप्यन्तात्।
आनीय झटिति घटयति विधिरभिमतमभिमुखीभूतः॥* § 1537

§ 1538

*मुखं* यथा—

आसादितप्रकटनिर्मलचन्द्रहासः प्राप्तः शरत्समय एष
विशुद्धकान्तः
उत्खाय गाढतमसं घनकालमुग्रं रामो दशास्यमिव
संभृतबन्धुजीवः॥ § 1541

§ 1542

*पात्रं* यथा शाकुन्तले—

तवास्मि गीतरागेण हारिणा प्रसभं हृतः।
एष राजेव दुष्यन्तः सारङ्गेणातिरंहसा॥* § 1545

§ 1546

रङ्गं प्रसाद्य मधुरैः श्लोकैः काव्यार्थसूचकैः।
ऋतुं कंचिदुपादाय भारतीं वृत्तिमाश्रयेत्॥ ४॥
§ 1548

रङ्गस्य प्रशस्तिं काव्यार्थानुगतार्थैः श्लोकैः कृत्वा—

७ *] १।७
१५ *] १।५

३ स्य] A.T.A. *prasaktim.*

औत्सुक्येन कृतत्वरा सहभुवा व्यावर्तमाना ह्रिया
तैस्तैर्बन्धुवधूजनस्य वचनैर्नीताभिमुख्यं पुनः।
दृष्ट्वाग्रे वरमात्तसाध्वसरसा गौरी नवे संगमे संरोहत्पुलका
हरेण हसताश्लिष्टा शिवा पातु वः॥* § 1551

*इत्यादिभिरिव *भारतीं वृत्ति*माश्रयेत्। § 1552

सा तु— § 1553

भारती संस्कृतप्रायो वाग्व्यापारो नटाश्रयः।
भेदैः प्ररोचनायुक्तैर्वीथीप्रहसनामुखैः॥ ५॥ § 1555

पुरुषविशेषप्रयोज्यः संस्कृतबहुलो वाक्प्रधानो नटाश्रयो व्यापारः= 138
भारती। प्ररोचनावीथीप्रहसनामुखानि चास्यामङ्गानि। § 1556
तां भरतीं लक्षयति सा त्विति। § 1557

यथोद्देशं लक्षणमाह— § 1558

...6ab उन्मुखीकरणं तत्र प्रशंसातः प्ररोचना। § 1559

प्रस्तुतार्थप्रशंसनेन श्रोतृणां प्रवृत्त्युन्मुखीकरणं=प्ररोचना। यथा रत्नावल्याम्—

श्रीहर्षो निपुणः कविः परिषदप्येषा गुणग्राहिणी लोके हारि
च वत्सराजचरितं नाट्ये च दक्षा वयम्।
वस्त्वेकैकमपीह वाञ्छितफलप्राप्तेः पदं किं पुन-
र्मद्भाग्योपचयादयं समुदितः सर्वो गुणानां गणः॥* § 1562

§ 1563

...6cd वीथी प्रहसनं चापि स्वप्रसङ्गेऽभिधास्यते॥ ६॥
§ 1564

२ *] रत्ना° १।२
३ *] N.S.P. *ityādibhir eva.*
६ *] १।५

...7 वीथ्यङ्गान्यामुखाङ्गत्वादुच्यन्तेऽत्रैव तत् पुनः।
सूत्रधारो नटीं ब्रूते मारिपं वा विदूषकम्॥ ७॥
§ 1566

...8 स्वकार्यं प्रस्तुताक्षेपि चित्रोक्त्या यत् तदामुखम्।
प्रस्तावना वा तत्र स्युः कथोद्घातः प्रवृत्तकम्॥ ८॥
§ 1568

...9ab प्रयोगातिशयश्चाथ वीथ्यङ्गानि त्रयोदश। § 1569

वीथीप्रहसनयोरिहानभिधाने हेतुमाह वीथी प्रहसनं चापीति। वीथ्यङ्गानां त्विहैवाभिधाने हेतुमाह वीथ्यङ्गानिति। वीथ्यङ्गानामेवामुखाङ्गत्वादभिधानं चेत्
139 कीदृशं तच्चामुखम्। तत्राह तत् पुनरिति। तदेव प्रस्तावनेत्यप्युच्यत इत्याह प्रस्तावना वेति। तत्रेति। कथोद्घातः प्रवृत्तकं प्रयोगातिशयश्च त्रयोदश वीथ्यङ्गानि च भवेयुरित्यर्थः। § 1570

तत्र *कथोद्घातः*— § 1571

...9cd *स्वेतिवृत्तसमं वाक्यमर्थं वा यत्र सूत्रिणः॥ ९॥
§ 1572

...10ab गृहीत्वा प्रविशेत् पात्रं कथोद्घातो द्विधैव सः। § 1573

वाक्यं यथा रत्नावल्याम्—

**यौगंधरायणः** द्वीपादन्यस्मादपि

इति। § 1574

वाक्यार्थं यथा वेणीसंहारे—

निर्वाणवैरिदहनाः प्रशमादरीणां नन्दन्तु पाण्डुतनयाः सह केशवेन।
रक्तप्रसाधितभुवः क्षतविग्रहाश्च स्वस्था भवन्तु कुरुराज-
सुताः सभृत्याः॥* § 1576 &

८ कीदृशं] Tri.MS. and M.G.T. read *tarhi āmukham*. Gr.MS. reads *kīdṛśaṃ syād āmukham*. T.MS. reads what is given in the text.

२ *] 'वाक्यं वाक्यार्थमथवा प्रस्तुतं यत्र सूत्रिणः' इति पाठः.
५ पि] १।७
९ *] १।७

§ 1577

ततोऽर्थेनाह—

लाक्षागृहानलविषान्नसभाप्रवेशैः प्राणेषु वित्तनिचयेषु च नः प्रहृत्य। आकृष्टपाण्डववधूपरिधानकेशाः स्वस्था भवन्तु मयि जीवति धार्तराष्टाः॥* § 1579 &

§ 1580

स्वेतिवृत्तसममिति। यत्र पात्रं स्वेतिवृत्तसमं सूत्रधारस्य वाक्यं वाक्यार्थं वा गृहीत्वा प्रविशेत् स कथोद्घातः। स च द्विविध इत्यर्थः। तथैवोदाहरति वाक्यमिति। § 1581

अथ *प्रवृत्तकम्*— § 1582 140

...10cd कालसाम्यसमाक्षिप्तप्रवेशः स्यात् प्रवृत्तकम्॥ १०॥
§ 1583

प्रवृत्तकालसमानगुणवर्णनया सूचितपात्रप्रवेशः=प्रवृत्तकम्। यथा—

आसादितप्रकटनिर्मलचन्द्रहासः प्राप्तः शरत्समय एष
विशुद्धकान्तः।
उत्खाय गाढतमसं घनकालमुग्रं रामो दशास्यमिव
संभृतबन्धुजीवः॥ § 1586

*ततः प्रविशति यथानिर्दिष्टो रामः*

§ 1587

अथ *प्रयोगातिशयः*— § 1588

...11 एषोऽयमित्युपक्षेपात् सूत्रधारप्रयोगतः।
पात्रप्रवेशो यत्रैष प्रयोगातिशयो मतः॥ ११॥ § 1590

यथा—एष राजेव दुष्यन्तः* इति। § 1591

अथ *वीथ्यङ्गानि*— § 1592

---

० *] वे॰ सं॰ (१।८

१ अथ] This is spelt in both ways as *pravṛttakam* and *pravartakam*.

४ *] शाकु॰ १।५

...12 उद्धात्यकावलगिते प्रपञ्चत्रिगते छलम्।
वाक्केल्यधिबले गण्डमवस्यन्दितनालिके॥ १२॥
§ 1594

...13ab असत्प्रलापव्याहारमृदवानि त्रयोदश। § 1595
तत्र— § 1596

...13cd गूडार्थपदपर्यायमाला प्रश्नोत्तरस्य वा॥ १३॥ § 1597

...14ab यत्रान्योन्यं समालापे द्वेधोद्धात्यं तदुच्यते। § 1598

गूढार्थं पदं तत्पर्यायश्चेति माला। प्रश्नश्चोत्तरं च तयोर्माला द्वयोरुक्तिप्रत्युक्ती। तद्द्विविधमुद्धात्यकम्। तत्राद्यं विक्रमोर्वश्यां यथा—

**विदूषकः** भो वयस्य इत्यादि।

उदाहरणान्तरं मालतिकायां वीथ्यां यथा—

**विदूषकः** *भो वअस्स, को एसो कामो जेण तुमं पि दूमिज्जसि। सो किं पुरिसो आदु इत्थिअत्ति।

६ त्रान्योन्यं] N.S.P. *samālāpo.*
B.M. *samālāpau.*

राजा सखे—

७ दं] N.S.P. reads -*paryāyaś cetyevaṃ mālā. praśnottaraṃ cetyevaṃ vā mālā. dvayor uktipratyuktau tad-*, etc.

८ त्राद्यं] After *Vikramorvaśyāṃ yathā*, the words of this illustration are perhaps missing in the MSS. The next portion beginning with *vidūṣakaḥ—bho vayassa*, etc. seems to be another illustration from the Vīthī known as *Mālatikā*. Most probably the first illustration too began with the words *vidūṣakaḥ—bho vayassa*, etc. from the *Vikramorvaśīya*. In what manner it was explained to be the illustration in the context is not clear, because of the missing of the relevant portion in the *Avaloka*. On page ६२ of the *Vikramorvaśīya* of the ed. by S. P. Pandit (B.S.S., १९०१) we find a situation where *ṿidūṣakaḥ—bho vayassa* etc. occur. In connection with the *bhūrjapatra* and its searching, there is some evasive remark on the part of the King in the context. It is not clear whether this portion was in any way connected with the discussion at hand. See Prof. V. Raghavan's *Bhoja's Śṛṅgāra Prakāśa*, १९६३, pp. ८८७–८. A.T.A. reads here *mālavikāgnimitre* ! This is perhaps the mistake of the scribe in taking Mālatikā for Mālavikā. --- In this context one thing is still puzzling to me. The transcript of Bahurūpamiśra's commentary on the *DR* of Dhanaṃjaya from the Madras Govt. Oriental MSS. Library, and the transcript of the same from the Trivandrum MSS. Library, contain also the sentence (of the controversial illustration) *tatrādyam vikramorvaśīye yathā—vidūṣakaḥ: bho vayassa*; Prof. Raghavan is silent about this and does not explain this illustration even according to B.M. The example from the *Mālatikā* (*vīthī*) occurs later on, in Bahurūpamiśra's, no doubt. But the reference to *Vikramorvaśīya* even by Bahurūpamiśra remains still a problem unsolved. It thus transpires that Dhanika, and Bahurūpamiśra—both refer to *Vikramorvaśīya* for illustrating the first *udghātyaka*. How these writers could have erred, is still not clear to me. --- Unfortunately Bh. Nṛ. is not helpful here, because of his silence. Till we get some more reliable evidence in the matter, I am unable to take it for granted that so scrupulously careful a writer as Dhanika would have made the mistake of giving the wrong name of a play, and of citing the incorrect illustration, as is contended by Prof. Raghavan. Further, the example for the second from *Pāṇḍavānanda* is given by Dhanika later than the

मनोजातिरनाधीना सुखेष्वेव प्रवर्तते। स्नेहस्य ललितो मार्गः काम इत्यभिधीयते॥ § 1600 &

**विदूषकः** *एवं पि ण जाणे।

>**राजा** वयस्य, इच्छाप्रभवः स इति।

**विदूषकः** *किं जो जं इच्छदि सो तं कामेदित्ति।

**राजा** अथ किम्।

**विदूषकः** *ता जाणिदं जह अहं सूअआरसालाए भोअणं इच्छामि।

§ 1601

द्वितीयं यथा पाण्डवानन्दे—

का श्लाघ्या गुणिनां क्षमा परिभवः को यः स्वकुल्यैः कृतः
किं दुःखं परसंश्रयो जगति कः श्लाघ्यो य आश्रीयते।
को मृत्युर्व्यसनं शुचं जहति के यैर्निर्जिताः शत्रवः
कैर्विज्ञातमिदं विराटनगरे छन्नस्थितैः पाण्डवैः॥ § 1604

§ 1605

गूढार्थेति। गूढार्थस्य पदस्य यः पर्यायः तस्य माला, प्रश्नोत्तरस्य वा माला, यत्रान्योन्यसमालापे तदुद्घात्यकमित्यर्थः। तथैव व्याचष्टे गूढार्थं पदमिति। § 1606

अथा *वलगितम्*— § 1607

---

one from the supposed *Mālatikā*, whereas in B.M.'s the references to the *Vikramorvaśīya* and *Pāṇḍavānanda* occur with the remarks as *ādyam* and *dvitīyam* respectively as in the *Avaloka*, and later on the example from the *Mālatikā* is found, without making it clear as to whether this was intended as an alternate example (if it was, though there is no *vā*) for the first or the second. The point thus is not completely free from doubts.

११ *] 'भो वयस्य, क एष कामो येन त्वमपि दूयसे। स किं पुरुषोऽथवा स्त्रीति।' इति च्छाया.

३ *] 'एवमपि न जानामि।' इति च्छाया.

३ *] 'किं यो यदिच्छति स तत्कामयतीति।' इति च्छाया.

३ *] 'तज्ज्ञातं यथाहं सूपकारशालायां भोजनमिच्छामि।' इति च्छाया.

३ का] B.M. *bhūṣā*

७ मालापे] N.S.P. reads as *samālāpo*.

...14cd यत्रैकत्र समावेशात् कार्यमन्यत् प्रसाध्यते॥ १४॥
§ 1608

...15ab प्रस्तुतेऽन्यत्र वान्यत् स्यात् तच्चावलगितं द्विधा।
§ 1609

तत्राद्यं यथोत्तरचरिते समुत्पन्नवनविहारगर्भदोहदायाः सीताया दोहद-कार्येऽनुप्रविश्य जनापवादादरण्ये त्यागः। द्वितीयं यथा छलितरामे—

रामः लक्ष्मण, तातवियुक्तामयोध्यां विमानस्थो नाहं प्रवेष्टुं शक्नोमि। तद-वतीर्य गच्छामि।

कोऽपि सिंहासनस्याधः स्थितः पादुकयोः पुरः। जटावानक्षमाली च चामरी च विराजते॥ § 1611&

इति भरतदर्शनकार्यसिद्धिः। § 1612

यत्रैकत्र समावेशादिति। एकत्र एकस्मिन्नुपक्रान्ते कार्ये सति अन्यदुप-संह्रियते यत्र तदवलगितमिति।* § 1613

अथ *प्रपञ्चः*— § 1614

...15cd *असद्भूतं मिथः स्तोत्रं प्रपञ्चो हास्यकृन्मतः॥ १५॥
§ 1615

असद्भूतेनार्थेन पारदार्यादिनैपुण्यादिना यान्योन्यस्तुतिः स प्रपञ्चः। यथा कर्पूरमञ्जर्याम्—

रंडा चंडा दिक्खिदा धम्मदारा मज्जं मंसं पिज्जए खज्जए अ। भिक्खा भोज्जं चम्मखंडं च सेज्जा कोलो धम्मो कस्स णो भादि रम्मो॥* § 1617&

§ 1618

रंडा चंडा।*

८ *] See Note ११३a before. The portion which was missing there is found here in both M.G.T. and Tri.MS.
२ *] 'असद्भूतमिथः स्तोत्रं' इति पाठः.
६ *] १। २३
६ *] *ru ḍāc ghā* is found here only in M.G.T. and not in others. The verse *raṇḍā caṇḍā*, etc. is from Rājaśekhara's *Karpūramañjarī* (I.२३). The word *raṇḍā* is derived by Sāyaṇa and others (from the root *raṇ* or *ram*) with the *uṇādi*-suffix prescribed by the rule *ñamantāḍḍaḥ*.

रण्डा चण्डा दीक्षिता धर्मदारा मद्यं मांसं पियते खाद्यते च।
भिक्षा भोज्यं चर्मखण्डं च शय्या कौलो धर्मः कस्य नो भाति
रम्यः॥ § 1621

§ 1622

अथ त्रिगतम्— § 1623

...16 श्रुतिसाम्यादनेकार्थयोजनं त्रिगतं त्विह।
नटादित्रितयालापः पूर्वरङ्गे तदिष्यते॥ १६॥ § 1625

यथा विक्रमोर्वश्याम्— 143

मत्तानां कुसुमरसेन षट्पदानां शब्दोऽयं परभृतनाद एष धीरः।
कैलासे सुरगणसेविते समन्तात् किंनर्यः कलमधुराक्षरं
प्रगीताः॥* § 1628

§ 1629

अथ *छलनम्*— § 1630

...17ab प्रियाभैरप्रियैर्वाक्यैर्विलोभ्य छलनाच्छलम्। § 1631

यथा वेणीसंहारे—

कर्ता द्यूतच्छलानां जतुमयशरणोद्दीपनः सोऽभिमानी राजा दुःशास-
नादेर्गुरुरनुजशतस्याङ्गराजस्य मित्रम्। कृष्णाकेशोत्तरीयव्य-
पनयनपटुः पाण्डवा यस्य दासाः क्वास्ते दुर्योधनोऽसौ
कथयत न रुषा द्रष्टुमभ्यागतौ स्वः॥* § 1633&

§ 1634

अथ *वाक्केली*— § 1635

---

४ था] This verse is found in some manuscripts of the *Vikramorvaśīya*.

६ *] १। ३
५ *] ५। २६

...17cd विनिवृत्त्यास्य वाक्केली त्रिस्त्रिः प्रत्युक्तितोऽपि वा॥ १७॥ § 1636

अस्येतिवाक्यस्य प्रक्रान्तस्य साकाङ्क्षस्य विनिवर्तनं = वाक्केली। द्वि-स्त्रिर्वा उक्तिप्रत्युक्तयः। तत्राद्या यथोत्तरचरिते—

त्वं जीवितं त्वमसि मे हृदयं द्वितीयं त्वं कौमुदी नयनयोरमृतं त्वमङ्गे।
इत्यादिभिः प्रियशतैरनुरुध्य मुग्धां तामेव शान्तमथवा किमतः परेण॥* § 1638&

§ 1639

उक्तिप्रत्युक्तितो यथा रत्नवल्याम्—

**विदूषकः** *भोदि मअणिए, मं पि एदं चच्चरिं सिक्खावेहि।*

**मदनिका** *हदास, ण क्खु एसा चच्चरी। दुवदिखंडअं क्खु एदं।

**विदूषकः** *भोदि, किं एदिणा खंडेण मोदआ करिअंति।

**मदनिका** *णहि। पढिअदि क्खु एदं।

इत्यादि। § 1640

अस्येति सर्वनाम्ना निर्दिष्टव्यान्तराभावान्निर्देश्यं वाक्यमित्याह अस्येति।*
§ 1641

अथा*धिबलम्*— § 1642

...18ab अन्योन्यवाक्याधिक्योक्तिः स्पर्धयाधिबलं भवेत्। § 1643

यथा वेणीसंहारे—

सकलरिपुजयाशा यत्र बद्धा सुतैस्ते तृणमिव परिभूतो यस्य गर्वेण

---

५ *] ३।२७
५ *] 'भवति मदनिके, मामप्येतां चर्चरीं शिक्षय।' इति च्छाया.
५ *] पृ० २४
५ *] 'हताश, न खल्वेषा चर्चरी। द्विपदीखण्डकं खल्वेतत्।' इति च्छाया.
५ *] 'भवति, किमेतेन खण्डेन मोदकाः क्रियन्ते।' इति च्छाया.
५ *] 'नहि। पठ्यते खल्वेतत्।' इति च्छाया.
५ *] B.M. notes his difference of opinion from Dhanika in the interpretation of the *sarvanāman, asya* here. --- Notes १३२ to १३७ are not given. But the serial number of the subsequent Notes (which are in the text already printed) is not changed, in order to avoid complications and confusion.

लोकः। रणशिरसि निहन्ता तस्य राधासुतस्य प्रणमति पितरौ वां मध्यमः पाण्डुपुत्रः॥* § 1645 &

इत्युपक्रमे

**अर्जुनः** अरे, नाहं भवानिव विकत्थनाप्रगल्भः। किंतु—

द्रक्ष्यन्ति न चिरात् सुप्तं बान्धवास्त्वां रणाङ्गणे। मद्गदाभिन्नवक्षोऽस्थिवेणिकाभङ्गभीषणम्॥* § 1647 &

इत्यन्तेन भीमदुर्योधनयोरन्योन्यवाक्यस्याधिक्योक्तिरधिबलम्। § 1648

अथ *गण्डम्*— § 1649

...18cd गण्डं प्रस्तुतसंबन्धिभिन्नार्थं सहसोदितम्॥ १८॥
§ 1650

यथोत्तरचरिते—

इयं गेहे लक्ष्मीरियममृतवर्तिर्नयनयो- रसावस्याः स्पर्शो वपुषि बहलश्चन्दनरसः। अयं बाहुः कण्ठे शिशिरमसृणो मौक्तिकसरः किमस्या न प्रेयो यदि परमसह्यस्तु विरहः॥ § 1652 &

**प्रतीहारी** *प्रविश्य*
*देव, उअत्थिदो।

**रामः** अयि, कः ?

**प्रतीहारी** *देवस्स आसण्णपरिचारओ दुम्मुहो।*
इति। § 1653

अथा*वस्यन्दितम्*— § 1654

...19ab *यथोक्तस्यान्यथा व्याख्या यत्रावस्यन्दितं हि तत्।
§ 1655

---

० *] ५।२७
० *] वे॰ सं॰ ५। ३४
५ *] 'देव, उपस्थितः।' इति च्छाया.
५ *] 'देवस्यासन्नपरिचारको दुर्मुखः।' इति च्छाया.
५ *] १। ३८
२ *] A.T.A. and B.M. give *yathoktasya*. N.S.P. *rasoktasya*.

यथा छलितरामे—

**सीता** *जाद, कल्ल क्खु तुम्हेहिं अजुज्झाए गंतव्वं। तहिं सो राआ विणएण णमिदव्वो।

**लवः** अम्ब, किमावाभ्यां राजोपजीविभ्यां भवितव्यम् ?

**सीता** *जाद, सो क्खु तुम्हाणं पिदा।

**लवः** किमावयो रघुपतिः पिता ?

**सीता** *साशङ्कम्*
*जाद, ण क्खु परं तुम्हाणं। सअलाए ज्जेव्व पुहवीए।

इति। § 1656

146 अथ *नालिका*— § 1657

## ...19cd सोपहासा निगूढार्था नालिकैव प्रहेलिका॥ १९॥

§ 1658

यथा मुद्राराक्षसे—

**चरः** *हंहो बम्हण, मा कुप्प। किं पि तुह उवज्झाओ जाणादि। किं पि अम्हारिसा जणा जाणंति।

**शिष्यः** किमस्मदुपाध्यायस्य सर्वज्ञत्वमपहर्तुमिच्छसि ?

**चरः** *यदि दे उवज्झाओ सव्वं जाणादि ता जाणादु दाव कस्स चंदो अणभिप्पेदो त्ति।

**शिष्यः** किमनेन ज्ञातेन भवति ?

इत्युपक्रमे

**चाणक्यः** चन्द्रगुप्तादपरक्तान् पुरुषान् जानामीत्युक्तं भवति

इति। § 1659

अथ *सत्प्रलापः*— § 1660

---

१ *] ‘जात, कल्यं खलु युवाभ्यामयोध्यायां गन्तव्यम्। तर्हि स राजा विनयेन नमितव्यः।’ इति च्छाया.
३ *] ‘जात, स खलु युवयोः पिता।’ इति च्छाया.
७ *] ‘जात, न खलु परं युवयोः। सकलाया एव पृथिव्याः।’ इति च्छाया.
३ *] ‘हंहो ब्राह्मण, मा कुप्य। किमपि तवोपाध्यायो जानाति। किमप्यस्मादृशा जना जानन्ति।’ इति च्छाया.
६ *] ‘यदि त उपाध्यायः सर्वं जानाति तज्ञानातु तावत् कस्य चन्द्रोऽनभिप्रेत इति।’ इति च्छाया.
१० ति] पृ॰ ७२

...20ab **असंबद्धकथाप्रायोऽसत्प्रलापो यथोत्तरः।** § 1661

ननु चासंबद्धार्थत्वेऽसंगतिर्नाम वाग्दोष उक्तः। तन्न। उत्स्वप्नायित- मदोन्मादशैशवादीनामसंबद्धप्रलापितैव विभावः। यथा—

अर्चिष्मन्ति विदार्थ वक्त्रकुहराण्यासृक्कतो वासुके- रङ्गुल्या
विषकर्वुरान् गणयतः संस्पृश्य दन्ताङ्कुरान्।
एकं त्रीणि नवाष्ट सप्त षडिति प्रध्वस्तसंख्याक्रमा वाचः
शक्तिधरस्य शैशवकलाः श्रेयांसि पुष्णन्तु वः॥ § 1664

§ 1665

यथा च— 147

हंस प्रयच्छ मे कान्तां गतिस्तस्यास्त्वया हृता।
विभावितैकदेशेन देयं यदभियुज्यते॥* § 1668

§ 1669

यथा वा—

भुक्ता हि मया गिरयः स्नातोऽहं वह्निना पिवामि वियत्।
हरिहरहिरण्यगर्भा मत्पुत्रास्तेन नृत्यमि॥ § 1672

§ 1673

अथ *व्याहारः*— § 1674

...20cd **अन्यार्थमेव व्याहारो हास्यलोभकरं वचः॥ २०॥**
§ 1675

यथा मालविकाग्निमित्रे लास्यप्रयोगावसाने—
*मालविका निर्गन्तुमिच्छति*
**विदूषकः** *मा दाव। उवएससुद्धा गमिस्ससि।*
इत्युपक्रमे
**गणदासः** *विदूषकं प्रति*
आर्य, उच्यतां यस्त्वया क्रमभेदो लक्षितः।

---

१ लापो] 'यथोत्तरम्' इति पाठः.
२ वाग्दोष] N.S.P. *vākyadoṣaḥ.*
३ लापितैव] A.T.A. *-pralāpitaiva bhavatīti bhāvaḥ.*
५ स्य] N.S.P. *vācaḥ krauñcaripoḥ śiśutvavikalāḥ.*
९ देयं] A.T.A. *steyam.*
९ *] विक्रमो° ४। ३३
५ *] 'मा तावत्। उपदेशशुद्धा गमिष्यसि।' इति च्छाया.
५ *] पृ° २८–३०

**विदूषकः** *पढमं पच्चूसे बम्हणस्स पूआ भोदि। सा तए लंघिदा।

*सर्वे स्मयन्ते*

इत्यादिना नायकस्य विश्रब्धनायिकादर्शनप्रयुक्तेन हास्यलोभकारिणा वचनेन व्याहारः। § 1676

अथ *मृदवम्*— § 1677

...21ab **दोषा गुणा गुणा दोषा यत्र स्युर्मृदवं हि तत्।** § 1678

यथा शाकुन्तले—

मेदश्छेदकृशोदरं लघु भवत्युत्थानयोग्यं वपुः
सत्त्वानामुपलक्ष्यते विकृतिमच्चित्तं भयक्रोधयोः।
148 उत्कर्षः स च धन्विनां यदिषवः सिध्यन्ति लक्ष्ये चले
मिथ्यैव व्यसनं वदन्ति मृगयामीदृग्विनोदः कुतः॥* § 1681

इति मृगयादोषस्य गुणीकारः। § 1682

यथा च—

सततमनिर्वृतमानसमायाससहस्रसंकुलक्लिष्टम्।
गतनिद्रमविश्वासं जीवति राजा जिगीषुरयम्॥ § 1685

इति राज्यगुणस्य दोषीभावः। § 1686

उभयं वा—

सन्तः सच्चरितोदयव्यसनिनः प्रादुर्भवद्यन्त्रणाः सर्वत्रैव
जनापवादचकिता जीवन्ति दुःखं सदा।
अव्युत्पन्नमतिः कृतेन न सता नैवासता व्याकुलो
युक्तायुक्तविवेकशून्यहृदयो धन्यो जनः प्राकृतः॥ § 1689

इति प्रस्तावनाङ्गानि। § 1690

...21cd **एषामन्यतमेनार्थं पात्रं चाक्षिप्य सूत्रभृत्॥ २१॥**
§ 1691

२ *] ‘प्रथमं प्रत्यूषे ब्राह्मणस्य पूजा भवति। सा ताया लङ्घिता।’ इति च्छाया.

५ *] २। ५

...22ab प्रस्तावनान्ते निर्गच्छेत् ततो वस्तु प्रपञ्चयेत्। § 1692

तत्र— § 1693

...22cd *अभिगम्यगुणैर्युक्तो धीरोदात्तः प्रतापवान्॥ २२॥
§ 1694

...23 कीर्तिकामो महोत्साहस्त्रय्यास्त्राता महीपतिः।
प्रख्यातवंशो राजर्षिर्दिव्यो वा यत्र नायकः॥ २३॥
§ 1696

...24ab तत्प्रख्यातं विधातव्यं वृत्तमत्राधिकारिकाम्। § 1697

यत्रेतिवृत्ते सत्यवागविसंवादिनीतिशास्त्रप्रसिद्धाभिगामिकादिगुणयुक्तो रामाय- 49
णमहाभारतादिप्रसिद्धो धीरोदात्तो राजर्षिर्दिव्यो वा नायकस्तत्प्रख्यातमेवात्र नाटक आधिकारिकं वस्तु विधेयमिति। § 1698

नीतिशास्त्रप्रसिद्धेत्यनेन अभिगम्यगुणकथनम्। इतरत्र धीरोदात्तादिगुण-कथनमिति। तत्प्रख्यातमिति। त्रिविधं हि प्रख्यातम्—इतिहासात् कथातो लोकाच्चेति। तत्रेतिहासप्रख्यातं प्रख्यातशब्देन गृह्यत इत्याह रामायणेति।
§ 1699

...24cd यत् तत्रानुचितं किंचिन्नायकस्य रसस्य वा॥ २४॥
§ 1700

...25ab विरुद्धं तत् परित्याज्यमन्यथा वा प्रकल्पयेत्।
§ 1701

यथा छद्मना वालिवधो मायुराजेनोदात्तराघवे। § 1702

...25cd आद्यन्तमेवं निश्चित्य पञ्चधा तद् विभज्य च॥ २५॥
§ 1703

---

३ *] 'अभिगामि', 'अधिगम्य' इति पाठौ.
३ वे] See *Avaloka* on II. ६

(a) (the portion connected with Note १६०a).

...26ab **खण्डशः संधिसंज्ञांस्तान् विभागानपि खण्डयेत्।**

§ 1704

अनौचित्यरसविरोधपरिहारपरिशुद्धं कृतसूचनीयदर्शनीयवस्तुविभागं फलानुसारेणोपक्लृप्तवीजबिन्दुपताकाप्रकरीकार्यलक्षणार्थप्रकृतिकं पञ्चावस्थानुगुण्येन पञ्चधा विभजेत्। पुनरपि चैकैकस्य भागस्य  वादश त्रयोदश पुनर्द्वादश त्रयोदश चतुर्दशेत्येवमङ्गसंज्ञया संधीनां विभागान् कुर्यात्। § 1705

आद्यन्तमेवं निश्चित्येत्यंशस्य व्याख्यानम् अनौचित्येत्यादि। पञ्चधा तद् विभज्य चेत्यंशस्य व्याख्यानं फलानुसारेणेति। खण्डशः संधिसंज्ञांस्तानित्याद्यंशस्य व्याख्यानं पुनरपि चेति। एवं पञ्चधा विभक्तान् संधिसंज्ञांस्तान् पुनरपि चाङ्गानुकूल्येन द्वादश, त्रयोदश, द्वादश, त्रयोदश, चतुर्दश, इत्येवं खण्डयेदित्युक्तं भवतीति। § 1706

150 ...26cd **चतुःषष्टिस्तु तानि स्युरङ्गानीत्यपरं तथा॥ २६॥**

§ 1707

...27 **पताकावृत्तमप्यूनमेकाद्यैरनुसंधिभिः।**
**अङ्गान्यत्र यथालाभमसंधिं प्रकरीं न्यसेत्॥ २७॥**

§ 1709

अपरमिति प्रासङ्गिकमितिवृत्तमेकाद्यैरनुसंधिभिर्न्यूनमिति प्रधानेतिवृत्तादेकद्वित्रिचतुर्भिरनुसंधिभिरूनं, पताकेतिवृत्तं न्यसनीयम्। अङ्गानि च प्रधानाविरोधेन यथालाभं न्यसनीयानि। प्रकरीवृत्तं त्वपरिपूर्णसंधि विधेयम्।

§ 1710

अपरस्मिन् प्रासङ्गिकेतिवृत्ते नाङ्गसंख्यानियम इत्याह अपरं तथेति।pratīkas are cited by Bh.Nṛ. not only from the Avaloka, but also sometimes from the kārikās of the Daśarūpaka. ऊनमिति। यथा प्रधानेतिवृत्तम् अङ्गैः पूर्णं विन्यस्यते नैवं प्रासङ्गिकमितिवृत्तम्। किं तु एकद्वित्रिभिः अनुसंधि-

---

४ स्य ] *dvādaśa, trayodaśa, punar* missing in N.S.P. These numbers refer to the *aṅga-s* of the *saṃdhi-s* respectively.
१२ द्वित्रिभिः ] N.S.P. and A.T.A. read *ekadvitricaturbhiḥ*. But all the MSS. of the *Laghuṭīkā* give it as *ekadvitribhiḥ*.

भिरूनं पताकेतिवृत्तं न्यसनीयमिति। असंधिं प्रकरीं न्यसेदित्यस्य विवरणं प्रकरीवृत्तं त्विति। असंधिं प्रकरीं न्यसेदिति तस्य संधेरेव विगमे संधीनां पञ्चत्वं व्याहन्यते। तेनाह अपरिपूर्णसंधि विधेयमिति। संध्यङ्गानां पूर्णता न भवत्यस्मिन्नित्यर्थः। § 1711

तत्रैवं विभक्ते— § 1712

...28ab आदौ विष्कम्भकं कुर्यादङ्कं वा कार्ययुक्तितः। § 1713

इयमत्र कार्ययुक्तिः— § 1714

...28cd अपेक्षितं परित्यज्य नीरसं वस्तुविस्तरम्॥ २८॥ § 1715

...29 यदा संदर्शयेच्छेषं कुर्याद् विष्कम्भकं तदा।
यदा तु सरसं वस्तु मूलादेव प्रवर्तते॥ २९॥ § 1717

...30ab आदावेव तदाङ्कः स्यादामुखाक्षेपसंश्रयः। § 1718

एवं विभक्तावयवस्य नाटकस्य रचनाप्रकारमाह तत्रेति। अपेक्षितं परित्यज्येति। नीरसं वस्तुविस्तरं परित्यज्य, अपेक्षितं शेषं यदा संदर्शयेत् तदा प्रथमत एव विष्कम्भः स्यात्। यदा तु प्रथमत एवापेक्षितं सर्वं प्रवर्त- 151
ते तदा प्रथमतः प्रस्तावनां विधाय तदाक्षिप्तमङ्कं प्रथमत एव न्यसेदित्याह अपेक्षितमिति। § 1719

स तु— § 1720

...30cd प्रत्यक्षनेतृचरितो बिन्दुव्याप्तिपुरस्कृतः॥ ३०॥ § 1721

...31ab अङ्को नानाप्रकारार्थसंविधानरसाश्रयः। § 1722

रङ्गप्रवेशेन साक्षान्निर्दिश्यमाननायकव्यापारो बिन्दुपक्षेपार्थपरिमितोऽनेकप्रयोजनसंविधानरसाधिकरण उत्सङ्ग इवाङ्कः। § 1723

१ ताकेतिवृत्तं] Only T.MS. reads *patāketivṛttam api.*
२ णं] N.S.P. reads *prakarītivṛttaṃ tu.*
१२ सेदित्याह] This is not found in the *Avaloka.*

स त्वङ्क एवं कर्तव्य इत्याह स त्विति। नानाप्रकाराथसंविधानरसाश्रय इति। नानाप्रकारमर्थसंविधानं रसश्च यदाश्रयः तादृशोऽङ्कः इत्यर्थः। गौणतामङ्कशब्दस्य दर्शयति उत्सङ्ग इवाङ्क इति। § 1724

तत्र च— § 1725

...31cd अनुभावविभावाभ्यां स्थायिना व्यभिचारिभिः॥ ३१॥ § 1726

...32ab गृहीतमुक्तैः कर्तव्यमङ्गिनः परिपोषणम्। § 1727

अङ्गिन इत्येवाङ्गिरसस्थायिनः संग्रहात् स्थायिनेति रसान्तरस्थायिनो ग्रहणम्। गृहीतमुक्तैः परस्परव्यतिकीर्णैरित्यर्थः। § 1728

नन्वङ्गिनः परिपोषणमित्यत्र स्थायिभावं विना अङ्गिरसासंभवाद् अङ्गिन इत्येव स्थायिनो ग्रहणे सिद्धे पुनः स्थायिग्रहणं व्यर्थम्। सत्यम्। रसान्तरस्थायी तेन गृह्यत इत्यदोष इत्याह अङ्गिन इत्येवेति। त्यागस्य रसपोषविरुद्धत्वात् परस्परव्यतिकीर्णैरित्याह। § 1729

152 ...32cd न चाति रसतो वस्तु दूरं विच्छिन्नतां नयेत्॥ ३२॥ § 1730

...33ab रसं वा न तिरोदध्याद् वस्त्वलंकारलक्षणैः। § 1731

कथासंध्यङ्गोपमाभूषणादिभिः। § 1732

वस्तुनो रसेन वा रसस्य वस्तुना वा तिरोधानं न कर्तव्यमित्याह न चेति। वस्त्वलंकारलक्षणैरित्यंशं विवृणोति कथेति। § 1733

...33cd एको रसोऽङ्गी कर्तव्यो वीरः शृङ्गार एव वा॥ ३३॥ § 1734

८ इत्याह] N.S.P. reads *aṅgina eveti*. Bh.Nṛ.'s *prat□ka* is correct.
९ त्वात्] T.MS. reads *parasparavyatirekibhiḥ*.
५ विवृणोति] N.S.P. does not seem to give correct reading. A.T.A. seems to give the reading herc as *kathāsaṃdhyaṅgopamābhūṣaṇādibhiḥ*.

...34ab अङ्गमन्ये रसाः सर्वे कुर्यान्निर्वहणेऽद्भुतम्। § 1735

ननु च रसान्तरस्थायिनेत्यनेनैव रसान्तराणामङ्गत्वमुक्तम्। तन्न। यत्र रसान्तरस्थायी स्वानुभावविभावव्यभिचारियुक्तो भूयसोपनिबध्यते तत्र रसान्तराणामङ्गत्वम्। केवलस्थाय्युपनिबन्धे तु स्थायिनोऽङ्गिव्यभिचारितैव। § 1736

रसेषु नियममाह एक इति। रूपकेषु एक एव रसोऽङ्गी। अन्ये सर्वे रसास्तस्याङ्गम्। स चाङ्गी वीरः शृङ्गारो वा। अङ्गरसेष्वद्भुतं निर्वहण एव कुर्यादित्यर्थः। चोदयति ननु चेति। पूर्वमङ्गिरसस्योपसंग्रहणात् स्थायिनेति रसान्तरस्थायी गृह्यत इत्युक्तम्। तेनैव रसान्तराणामङ्गत्वे सिद्धे सति अङ्गमन्ये रसाः सर्वे इति रसान्तराणामङ्गत्वं न वक्तव्यमिति चोद्यार्थः। परिहरति तन्नेति। विभावानुभावादिसंयोगाद् रसतामापन्नस्य [इव] तदसंयोगात् केवलीभूतस्यापि स्थायिनोऽङ्गत्वं वक्तुं पुनरपि रसग्रहणमित्यर्थः। § 1737

...34cd दूराध्वानं वधं युद्धं राज्यदेशादिविप्लवम्॥ ३४॥
§ 1738

...35 संरोधं भोजनं स्नानं सुरतं चानुलेपनम्।
अम्बरग्रहणादीनि प्रत्यक्षाणि नि निर्दिशेत्॥ ३५॥
§ 1740

अङ्के नैवोपनिबध्नीयात् प्रवेशकादिभिरेव सूचयेदित्यर्थः। § 1741

ननु सर्वथैवानिर्देशो न युक्त इति [चेत्] प्रत्यक्षाणि न निर्दिशेदित्युक्त- 153
मित्याह अङ्के नैवोपनिबध्नीयादिति। § 1742

---

११ पि] M.G.T., T.MS., Gr.MS. read *punar api saṃgrahaṇam ity arthaḥ*. Only Tri.MS. gives *punar api rasagrahaṇam ity arthaḥ*. --- A.T.A. reads the *kārikā*- portion here as *aṅgam anyarasāḥ sarve*. The expression *rasa* stands for *rasībhāvayogya*. In this context the following verse may be noted: ratyādayaḥ sthāyibhāvāḥ syur bhūyiṣṭhavibhāvajāḥ | stokair vibhāvair utpannās ta eva vyabhicāriṇaḥ || (*Saṃgītartnākara*, Adyar, vol. IV, ch. VII. १५१९)

६ मित्याह] N.S.P. reads *aṅkair naivopanibadhnīta*. What is given in the text is according to Bh.Nṛ.'s *pratīka*.

...36ab नाधिकारिवधं क्वापि त्याज्यमावश्यकं न च। § 1743

अधिकृतनायकवधं प्रवेशकादिनापि न सूचयेत्। आवश्यकं तु देवपितृकार्याद्यवश्यमेव क्वचित् कुर्यात्। § 1744

क्वापीति सामान्यतो निषिद्धम्। तत्रावश्यकं तु देवपितृकार्यादि प्रवेशकादिना सूचयेदित्याह आवश्यकं त्विति। § 1745

...36cd एकाहाचरितैकार्थं कुर्यादासन्ननायकम्॥ ३६॥
§ 1746

...37ab पात्रैस्त्रिचतुरैरङ्कं तेषामन्तेऽस्य निर्गमः। § 1747

एकदिवसप्रवृत्तैकप्रयोजनसंबद्धमासन्ननायकमबहुपात्रप्रवेशमङ्कं कुर्यात्। तेषां पात्राणामस्याङ्कस्यान्ते निर्गमः कार्यः। § 1748

तेषामिति। अस्याङ्कस्यान्ते तेषां पात्राणां विनिर्गम इत्यर्थः। § 1749

...37cd पताकास्थानकान्यत्र बिन्दुरन्ते च बीजवत्॥ ३७॥
§ 1750

...38 एवमङ्काः प्रकर्तव्याः प्रवेशादिपुरस्कृताः।
पञ्चाङ्कमेतदवरं दशाङ्कं नाटकं परम्॥ ३८॥ § 1752

इत्युक्तं नाटकलक्षणम्। § 1753

पताकास्थानकान्यत्राङ्के कुर्यात्। बीजयुक्तं बिन्दुमादावन्तेऽपि कुर्यादित्याह पताकास्थानकानीति। अयमङ्कविधानप्रकार इत्याह एवमिति। एतन्नाटकम् अवरं पञ्चाङ्कं परं दशाङ्कमिति नाटकस्याङ्केषु संख्यानियमं दर्शयति पञ्चाङ्कमिति। नाटकलक्षणं पूर्णमित्याह इत्युक्तमिति। § 1754

154 ...39 अथ प्रकरणे वृत्तमुत्पाद्यं लोकसंश्रयम्।
अमात्यविप्रवणिजामेकं कुर्याच्च नायकम्॥ ३९॥
§ 1756

...40 धीरप्रशान्तं सोपायं धर्मकामार्थतत्परम्।
शेषं नाटकवत् संधिपवेशकरसादिकम्॥ ४०॥
§ 1758

कविबुद्धिविरचितमितिवृत्तम्। लोकसंश्रयमनुदात्तममात्याद्यन्यतमधीरप्रशान्तनायकं विपदन्तरितार्थसिद्धिं कुर्यात्। प्रकरणे मन्त्री अमात्य एव। सार्थवाहो वणिग्विशेष एवेति। स्पष्टमन्यत्। § 1759

प्रकरणलक्षणस्य व्याख्यानं कविबुद्धिविरचितमित्यादि। ननु प्रदेशान्तरे मन्त्री च प्रकरणनायक इत्युक्तम्। इह तु मन्त्री नोक्त इत्याशङ्क्याह मन्त्री अमात्य एवेति। अमात्य एव मन्त्रयुक्तः सन् मन्त्रीत्युच्यत इत्यर्थः। इह तु वणिजो नायकत्वमुक्तम्। सार्थवाहस्य तु किं नोच्यत इत्याकाङ्क्षायामाह सार्थवाहेति। § 1760

...41 नायिका तु द्विधा तत्र कुलस्त्री गणिका तथा।
क्वचिदेकैव कुलजा वेश्या क्वापि द्वयं क्वचित्॥
४१॥ § 1762

...42 कुलजाभ्यन्तरा बाह्या वेश्या नातिक्रमोऽनयोः।
आभिः प्रकरणं त्रेधा संकीर्णं धूर्तसंकुलम्॥ ४२॥
§ 1764

वेशः = भृतिः, सोऽस्या जीवनमिति वेश्या। तद्विशेषो *गणिका*। यदुक्तम्—

आभिरभ्यर्थिता वेश्या रूपशीलगुणान्विता।
लभते गणिकाशब्दं स्थानं च जनसंसदि॥ § 1767

इति। एवं च कुलजा वेश्या उभयमिति त्रेधा प्रकरणे ना- 155
यिका। यथा वेश्यैव तरङ्गदत्ते कुलजैव पुष्पदूषितके। ते द्वे अपि मृच्छकटिकायामिति। कितवद्यूतकारादिधूर्तसंकुलं तु मृच्छकटिकादिवत् संकीर्णप्रकरणमिति। § 1768

नायिका तु द्विधा तत्रेति।* तत्र प्रकरणे द्विविधा नायिका। क्वचित् कुलस्त्री क्वचिद् गणिका क्वचिदुभयमिति। यत्रोभयं तत्र नायकेन अन-

१३ *] N.S.P. reads *nāyikā tu dvidhā netuḥ*. *tara* instead of *netuḥ* is the *pratīka* given by Bh.Nṛ.

योः कुलस्त्रीगणिकयोः नातिक्रमः कार्यः। कुलस्त्रीमात्रयुक्तं गणिकामात्रयुक्तं च प्रकरणं शुद्धम्। उभययुक्तं प्रकरणं संकीर्णमिति। क्वचिद् गणिका नायिकेत्युक्त्वा पुनर्वेश्या क्वापीति वचनं व्याकुलमिव। तत्राह वेशो भृतिरित्यादि। गणिकैव वेशान्वयाद् वेश्येत्यभिधीयत इत्यर्थः। § 1769

अथ *नाटिका*— § 1770

...43ab **लक्ष्यते नाटिकाप्यत्र संकीर्णान्यनिवृत्तये।** § 1771

अत्र केचित्—

*अनयोश्च बन्धयोगादेको भेदः प्रयोक्तृभिर्ज्ञेयः।
प्रख्यातस्त्वितरो वा नाटीसंज्ञाश्रिते काव्ये॥* § 1774

इत्यमुं भारतीयं श्लोकमेको भेदः प्रख्यातो नाटिकाख्य इतरस्त्वप्रख्यातः प्रकरणिकासंज्ञो नाटीसंज्ञया द्वे काव्ये आश्रिते इति व्याचक्षणाः प्रकरणिकामपि मन्यन्ते। तदसत्। उद्देशलक्षणयोरनभिधानात् समानलक्षणत्वे च भेदाभावात्। वस्तुरसनायकानां प्रकरणाभेदात् प्रकरणिकायाः। अतोऽनुद्दिष्टाया नाटिकाया यन्मुनिना लक्षणं कृतं तत्रायमभिप्रायः। शुद्धलक्षणसंकरादेव तल्लक्षणे सिद्धे लक्षणकरणं संकीर्णा नाटिकैव कर्तव्येति नियमार्थं विज्ञायते। § 1775

प्रकरणानन्तरमेव भाणाद्यनुक्त्वा नाटिकाया लक्षणवचने हेतुमाह ल-
156 क्ष्यत इति। अर्थप्राप्तस्यापि नाटिकालक्षणस्य करणमन्यनिवृत्तिफलम्। नाटिकैव नाटकप्रकरणलक्षणसंकीर्णा विधेया नान्यदित्येवमर्थमिति। अन्यदपि संकीर्णमस्तीति किमु वक्तारः सन्ति। ओमित्याह अत्र केचिदिति। अन्योऽपि प्रबन्धभेदोऽस्तीति तेषां वचने मूलमिदमित्याह अनयोश्चेति। अनयोर्नाटकप्रकरणयोः बन्धयोगान्नाटीसंज्ञया आश्रिते द्वे काव्ये स्तः। तयोरेकः प्रबन्धभेदः प्रख्यातः। इतरस्त्वप्रख्यात इति तं भारतीयं श्लोकं व्याचक्षाणाः नाटिकाव्यतिरेकेण केचित् प्रकरणिकामपि मन्यन्ते। वस्तुतस्तु अस्य श्लोकस्यायमर्थः—अनयोर्नाटकप्रकरणयोः बन्धयोगादेको भेदो नाटीसंज्ञाश्रिते काव्ये भवति। स तु भेदः प्रख्यातो वा भवति। इतरो वा भवति। नायकस्य प्रख्यातत्ववशात् प्रख्यात इति वक्तुं शक्यते। इतिवृत्तस्य तु अप्रख्यातत्ववशादप्रख्यात इत्यपि वक्तुं शक्यत इत्यर्थः। तान्निराकरोति तदसदिति।

४ *] See the Introduction. See Note १४१a to *Laghuṭīkā*.
५ *] ना॰ शा॰ [GOS] १८। ५७
१९ तं] Except in T.MS. in all others the reading is *tam evaṃ bhāratīyaṃ ślokaṃ vyācakṣāṇāḥ*. Abhinava also refers (as *anye tu*) to the division of *nāṭikā* and *prakaraṇikā*. (See Abhinavabhāratī, vol. II, page ४३४.)

हेतुमाह उद्देशलक्षणयोरिति। उद्देशलक्षणयोरनभिधानात् प्रकरणिकायाः। ननु नाटिकया समानलक्षणाक्रान्तत्वे क्वाप्यनभिधानं संभवतीति चेत् तत्राह समानेति। एकलक्षणाक्रान्तत्वमेव हि एकत्वे प्रयोजकम्। एवं सति भेदः उदाहरणभेदात् नातिरिच्यते। वस्तुरसनायका हि भेदहेतवः। ते तु पृथक्प्रबन्धत्वं नापादयन्ति। तेषां प्रकरणादभेदादिति। नाटिकाया अपि तर्हि उद्देशे सत्येव लक्षणकरणं युज्यते। न त्वनुद्देशे सत्यपीति चेत् तत्राह अत इति। न लक्षणं कर्तव्यमिति नाटिकालक्षणकरणम्। किं तर्हि। शुद्धयोः नाटकप्रकरणयोः लक्षणकरणादेव नाटिकाया अपि तत्संसर्गात्मनो लक्षणे सिद्धे पुनर्लक्षणकरणं मुनेः संकीर्णा नाटिकैव कर्तव्या नान्यदित्यन्यप्रबन्धनिवृत्तिफलमित्यर्थः। § 1776

तमेव संकरं दर्शयति— § 1777

...43cd तत्र वस्तु प्रकरणान्नाटकान्नायको नृपः॥ ४३॥
§ 1778

...44ab प्रख्यातो धीरललितः शृङ्गारोऽङ्गी सलक्षणः। § 1779

उत्पाद्येतिवृत्तत्वं प्रकरणधर्मः प्रख्यातनृपनायकादित्वं तु नाटकधर्म इति।
§ 1780

तत्र वस्तु प्रकरणादिति। नाटिकायाः प्रकरणधर्मः उत्पाद्येतिवृत्तत्वम्। 157
नाटकधर्मः प्रख्यातनायकत्वम्, अङ्गी रसः सलक्षणशृङ्गार इति। तथा व्याचष्टे उत्पाद्येति। § 1781

---

२ या] *nanu nāṭikāyāḥ samānalakṣaṇākrāntatve 'pi* is the reading in Gr.MS. and M.G.T. Tri.MS. gives it as *nanu nāṭikayā samānalakṣaṇākrāntatve 'pi abhidhānaṃ saṃbhavatīti cet*. What is given in the text is the reading I made on the basis of the T.MS.
४ भेदात्] This amounts to saying that the difference is only of the illustration and not of the dramatic type. T.MS. and Tri.MS. read *-bhedaṃ nātiricyate*. Gr.MS. and M.G.T. read *-bhedān nātiricyate* (*pañcamī*) which seems to be appropriate here. --- There is a discussion on Nāṭikā in Prof. V. Raghavan's *Bhoja's Śṛṅgāra Prakāśa*, (१९६३, pp. ५३८–९) where this verse of Bharata *anayoś ca bandhayogāt*, etc. referred to by Dhanika, is also cited. But the significance and the meaning of the second line according to those who did not accept *prakaraṇikā* as a separate type, are explained only here by Bh.Nṛ.

एवं च नाटकप्रकरणनाटिकातिरेकेण वस्त्वादेः प्रकरणिकायामभावादङ्कपात्रभेदाद्यदि भेदः, तत्र— § 1782

...44cd स्त्रीपायचतुरङ्कादि भेदकं यदि चेष्यते॥ ४४॥ § 1783

...45ab एकद्वित्र्यङ्कपात्रादिभेदेनानन्तरूपता। § 1784

तत्र नाटिकेति स्त्रीसमाख्ययौचित्यप्राप्तं स्त्रीप्रधानत्वम्। कैशिकीवृत्त्याश्रयत्वाच्च तदङ्गसंख्ययाल्पावमर्शत्वेन चतुरङ्कत्वमप्यौचित्यप्राप्तमेव। विशेषस्तु— § 1785

...45cd देवी तत्र भवेज्ज्येष्ठा प्रगल्भा नृपवंशजा॥ ४५॥ § 1786

...46ab गम्भीरा मानिनी कृच्छ्रात् तद्वशान्नेतृसंगमः। § 1787

एवं चेति। एवं वस्तुनेतृरसादीनां नाटिकात्वापादन इव प्रकरणिकाया वस्त्वादिः पृथङ्नास्ति। एवं स्थिते पात्रभेदादङ्कभेदाद्वा भेदो वक्तव्यः। सोऽपि नास्तीत्यर्थः। स्त्रीप्रायेति। स्त्रीप्रायत्वं स्त्र्यन्तसंज्ञाविधानादौचित्यप्राप्तम्। चतुरङ्कत्वमपि कैशिकीवृत्तिप्राधान्यात् तस्याश्चाङ्गसंख्यया भवत्यौचित्यप्राप्तम्। संधिसंख्यायामपि विमर्शे संधेः स्वल्पत्वेन चतुरङ्कत्वमौचित्यप्राप्तम्। अतस्ततोऽपि विशेषो न भवति। ततो विशेषङ्गीकारे त्रिप्रभृत्यङ्कादेरपि प्रसज्यत्वात् सत्त्वप्रसङ्ग [अनन्तत्वप्रसङ्गः] इत्यर्थः। केन तर्हि विशेष इत्याकाङ्क्षायामाह विशेषस्त्विति। § 1788

*प्राप्या* तु— § 1789

...46cd नायिका तादृशी मुग्धा दिव्या चातिमनोहरा॥ ४६॥ § 1790

158 तादृशीति नृपवंशजत्वादिधर्मातिदेशः। § 1791

१५ पि] *triprabhṛtyaṅkāder api prabandhasya* is the reading in Tri.MS., and M.G.T., and it seems to be so even in Gr.MS. T.MS. however reads what is given in the text.

...47 अन्तःपुरादिसंबन्धादासन्ना श्रुतिदर्शनैः।
अनुरागो नवावस्थो नेतुस्तस्यां यथोत्तरम्॥ ४७॥
§ 1793

...48ab नेता तत्र प्रवर्तेत देवीत्रासेन शङ्कितः। § 1794

तस्यां मुग्धानायिकायामन्तः पुरसंबन्धसंगीतकसंबन्धादिना प्रत्यासन्नायां नायकस्य देवीप्रतीबन्धान्तरित उत्तरोत्तरो नवावस्थानुरागो निबन्धनीयः।
§ 1795

...48cd कैशिक्यङ्गैश्चतुर्भिश्च युक्ताङ्कैरिह नाटिका॥ ४८॥
§ 1796

प्रत्यङ्कोपनिबद्धाभिहितलक्षणकैशिक्यङ्गचतुष्टयवती नाटिकेति। § 1797

अथ *भाणः*— § 1798

...49 भाणस्तु धूर्तचरितं स्वानुभूतं परेण वा।
यत्रोपवर्णयेदेको निपुणः पण्डितो विटः॥ ४९॥
§ 1800

...50 संबोधनोक्तिप्रत्युक्ती कुर्यादाकाशभाषितैः।
सूचयेद्वीरशृङ्गारौ शौर्यसौभाग्यसंस्तवैः॥ ५०॥ § 1802

...51 भूयसा भारती वृत्तिरेकाङ्कं वस्तु कल्पितम्।
मुखनिर्वहणे साङ्गे लास्याङ्गानि दशापि च॥ ५१॥
§ 1804

धूर्ताश्चोरद्यूतकारादयस्तेषां चरितं यत्रैक एव विटः स्वकृतं परकृतं वोपवर्णयति स भारतीवृत्तिप्रधानत्वाद् भाणः। एकस्य चोक्तिप्रत्युक्तय आकाशभाषितैराशङ्कितोत्तरत्वेन भवन्ति। अस्पष्टत्वाच्च वीरशृङ्गारौ सौभाग्यशौर्योपवर्णनया सूचनीयौ। § 1805

भाणलक्षणं तु स्पष्टम्। § 1806

*लास्याङ्गानि*— § 1807 159

...52 गेयपदं स्थितपाठ्यमासीनं पुष्पगण्डिका।
प्रच्छेदकस्त्रिगूढं च सैन्धवाख्यं द्विगूढकम्॥ ५२॥
§ 1809

...53 उत्तमोत्तमकं चैव उक्तप्रत्युक्तमेव च।
लास्ये दशविधं ह्येतदङ्गनिर्देशकल्पनम्॥ ५३॥
§ 1811

शेषं स्पष्टमिति। § 1812

अथ *प्रहसनम्*— § 1813

...54ab तद्वत् प्रहसनं त्रेधा शुद्धवैकृतसंकरैः। § 1814

तद्वदिति भाणवद्वस्तुसंध्यङ्गानामतिदेशः। § 1815

प्रहसनं तु शुद्धं विकृतं संकीर्णं चेति त्रेधा। यत्र अप्रच्युतस्वरूपाः पाषण्डकशुकितापसा एव विभावाः तत् शुद्धम्। यत्र तु ते चोरभटादिवेषभाषादियोगिनः प्रच्युतस्वभावाः तद् विकृतम्। यत्र तु संकरः तत् संकीर्णमिति। तथैव दर्शयति तद्वदित्यादिना। § 1816

तत्र *शुद्धं* तावत्— § 1817

...54cd पाषण्डिविप्रप्रभृतिचेटचेटीविटाकुलम्॥ ५४॥ § 1818

...55ab चेष्टितं वेषभाषाभिः शुद्धं हास्यवचोऽन्वितम्। § 1819

पाषण्डिनः = शाक्यनिर्ग्रन्थप्रभृतयः। विप्राश्चात्यन्तमृजवः, जातिमात्रोपजीविनो वा प्रहसनाङ्गिहास्यविभावाः। तेषां च यथावत्स्वव्यापारोपनिबन्धनं चेटचेटीव्यवहारयुक्तं शुद्धं प्रहसनम्। § 1820

160 *विकृतं* तु— § 1821

२ स्त्रिगूढं ] A.T.A. *trimūḍham* and *dvimūḍhakam*.
३ तिदेशः ] N.S.P. *vastusaṃdhi-saṃdhyaṅgalāsyādīnām.*

...55cd कामुकादिवचोवेषैः षण्ढकञ्चुकितापसैः॥ ५५॥
§ 1822

...56ab विकृतं संकराद् वीथ्या संकीर्णं धूर्तसंकुलम्।
§ 1823

कामुकादयः= भुजंगचारभटाद्याः। तद्वेषभाषादियोगिनो यत्र षण्ढकञ्चुकितापसवृद्धादयस्तद्विकृतम्। स्वस्वरूपप्रच्युतविभावत्वात्। वीथ्यङ्गैस्तु संकीर्णत्वात् संकीर्णम्। § 1824

...56cd रसस्तु भूयसा कार्यः षड्विधो हास्य एव तु॥ ५६॥
§ 1825

इति स्पष्टम्। § 1826

अथ *डिमः*— § 1827

...57 डिमे वस्तु प्रसिद्धं स्याद् वृत्तयः कैशिकीं विना।
नेतारो देवगन्धर्वयक्षरक्षोमहोरगाः॥ ५७॥ § 1829

...58 भूतप्रेतपिशाचाद्याः षोडशात्यन्तमुद्धताः।
रसैरहास्यशृङ्गारैः षड्भिर्दीप्तैः समन्वितः॥ ५८॥
§ 1831

...59 मायेन्द्रजालसंग्रामक्रोधोद्भ्रान्तादिचेष्टितैः।
चन्द्रसूर्योपरागैश्च न्याय्ये रौद्ररसेऽङ्गिनि॥ ५९॥
§ 1833

...60ab चतुरङ्कश्चतुःसंधिर्निर्विमर्शो डिमः स्मृतः। § 1834

डिम संघात इति नायकसंघातव्यापारात्मकत्वात् डिमः। तत्रेतिहासप्रसिद्धमितिवृत्तम्। वृत्तयश्च कैशिकीवर्जास्तिस्रः। रसाश्च वीररौद्रबीभत्साद्भुतकरुणभयानकाः षट्। स्थायी तु रौद्रो न्यायप्रधानः। विमर्शरहिता मुख-

161 प्रतिमुखगर्भनिर्वहणाख्याश्चत्वारः संधयः साङ्गाः मायेन्द्रजालाद्यनुभावसमाश्र-
याः। शेषं प्रस्तावनादि नाटकवत्। एतच्च—

इदं त्रिपुरदाहे तु लक्षणं ब्रह्मणोदितम्।
ततस्त्रिपुरदाहश्च डिमसंज्ञः प्रयोजितः॥* § 1837

इति भरतमुनिना स्वयमेव त्रिपुरदाहेतिवृत्तस्य तुल्यत्वं दर्शितम्। § 1838

डिमे तु देवगन्धर्वादयः षोडश नायकाः। प्रख्यातमितिवृत्तम्। रसास्तु हास्यशृङ्गाररहिताः षट्। वृत्तयः कैशिकीरहितास्तिस्रः। तत्र न्यायप्राप्तो रौद्रः अङ्गी रसः। न्यायप्राप्तिश्च रावणवत्परदारादिश्रद्धावैधुर्यम्। इतरे पञ्चापि रसास्तदङ्गम्। संधयो विमर्शरहिताः चत्वारः। अङ्का अपि तत्संख्यया चत्वारः। उदाहरणमेतस्य त्रिपुरदाहः। तथैव दर्शयति डिम इत्यादिना। § 1839

अथ *व्यायोगः*— § 1840

...60cd ख्यातेतिवृत्तो व्यायोगः ख्यातोद्धतनराश्रयः॥ ६० ॥
§ 1841

...61 हीनो गर्भविमर्शाभ्यां दीप्ताः स्युर्डिमवद् रसाः।
अस्त्रीनिमित्तसंग्रामो जामदग्न्यजये यथा॥ ६१ ॥
§ 1843

...62ab एकाहाचरितैकाङ्को व्यायोगो बहुभिर्नरैः। § 1844

व्यायुज्यन्तेऽस्मिन् बहवः पुरुषा इति व्यायोगः। तत्र डिमवद् रसाः षट् हास्यशृङ्गाररहिताः। *वृत्त्यात्मकत्वाच्च रसानामवचनेऽपि कैशिकीरहितेतरवृत्तित्वं रसवदेव लभ्यते। अस्त्रीनिमित्तश्चात्र संग्रामः। यथा परशुरामेण पितृवधकोपात् सहस्रबाहुर्जुनवधः कृतः। शेषं स्पष्टम्। § 1845

व्यायोगे तु प्रख्यातमितिवृत्तम्। प्रख्यात उद्धतश्च नायकः। डिमव-
162 द् दीप्ताः षड् रसाः। कैशिकीरहितास्तिस्रो वृत्तयः। गर्भविमर्शरहितास्त्रयः संधयः। अङ्कस्त्वेकः। अस्त्रीनिमित्तः संग्रामः। यथा जामदग्न्यजय इति। तथा दर्शयति ख्यातेतिवृत्तेत्यादिना।* § 1846

४ *] ना॰ शा॰ [GOS] ४।१० [उत्तरार्धमात्रम्]
७ *] A.T.A. *rasavṛttyātmakatvāc ca.*

१३ *] The protion on *vyāyoga* is missing in T.MS. and Gr.MS.

अथ *समवकारः*— § 1847

...62cd कार्यं समवकारे स्यादामुखं नाटकादिवत्॥ ६२॥
§ 1848

...63 ख्यातं देवासुरं वस्तु निर्विमर्शास्तु संधयः।
वृत्तयो मन्दकैशिक्यो नेतारो देवदानवाः॥ ६३॥
§ 1850

...64 द्वादशोदात्तविख्याताः फलं तेषां पृथक् पृथक्।
बहुवीरा रसाः सर्वे यद्वदम्भोधिमन्थने॥ ६४॥
§ 1852

...65 अङ्कैस्त्रिभिस्त्रिकपटस्त्रिशृङ्गारस्त्रिविद्रवः।
द्विसंधिरङ्कः प्रथमः कार्यो द्वादशनाडिकः॥ ६५॥
§ 1854

...66 चतुर्द्विनाडिकावन्त्यौ नाडिका घटिकाद्वयम्।
वस्तुस्वभावदैवारिकृताः स्युः कपटास्त्रयः॥ ६६॥
§ 1856

...67 नगरोपरोधयुद्धेभवाताग्न्यादिषु विद्रवः।
धर्मार्थकामैः शृङ्गारो नात्र बिन्दुप्रवेशकौ॥ ६७॥
§ 1858

...68ab वीथ्यङ्गानि यथालाभं कुर्यात् प्रहसने यथा। § 1859

समवकीर्यन्तेऽस्मिन्नर्था इति समवकारः। तत्र नाटकादिवदामुखमिति समस्तरूपकाणामामुखप्रापणम्। विमर्शवर्जिताश्चत्वारः संधयः। देवासुरादयो द्वादश नायकाः। तेषां च फलानि पृथक् पृथग् भवन्ति। यथा समुद्र-

११ वः] This is the reading in A.T.A. and in B.M.'s.

मन्थने वासुदेवादीनां लक्ष्म्यादिलाभः। वीरश्चाङ्गी। अङ्गभूताश्च सर्वे रसाः। त्रयोऽङ्काः। तेषां प्रथमो द्वादशनाडिकानिर्वृत्तेतिवृत्तप्रमाणः। यथासंख्यं चतुर्द्विनाडिकावन्त्यौ। नाडिका च=घटिकाद्वयम्। प्रत्यङ्कं च यथासंख्यं कप-
163 टाः। तथा नगरोपरोधयुद्धवाताग्न्यादिविद्रवाणां मध्य एकैको विद्रवः कार्यः। धर्मार्थकामशृङ्गाराणामेकैकः शृङ्गारः प्रत्यङ्कमेव विधातव्यः। वीथ्यङ्गानि च यथालाभं कार्याणि। बिन्दुप्रवेशकौ नाटकोक्तावपि न विधातव्यौ। इत्ययं समवकारः। § 1860

समवकारे तु नाटकादिवत् प्रथममामुखं कार्यम्। प्रख्यातदेवासुरमितिवृत्तम्। विमर्शरहिताश्चत्वारः संधयः। वृत्तिषु चतसृष्वपि कैशिकी स्वल्पाभिधातव्या। देवदानवप्रभृतयो द्वादश नायकाः। तेषां नायकानां पृथक् पृथक् फलानि। अङ्गी तु रसो वीरः। इतरे तु रसास्तदङ्गम्। त्रयोऽङ्काः। त्रिष्वङ्केषु प्रथमोऽङ्को द्विसंधिः। त्रयोऽप्यङ्काः यथाक्रमं कपटैस्त्रिभिः, शृङ्गारैस्त्रिभिः, विद्रवैस्त्रिभिश्च युक्ता विधातव्याः। अत्र कालपरिमाणकथनमितिवृत्तपरिमाणाय। उदाहरणम् अम्भोधिमन्थनम्। तथा दर्शयति कार्यं समवकारेN.S.P. reads kāryaṃ samavakāre 'pi. स्यादित्यादिना। किमस्यैवामुखयोगित्वं विशेषः। नेत्याह समस्तरूपकाणामिति। § 1861

अथ *वीथी*— § 1862

...68cd वीथी तु कैशिकीवृत्तौ संध्यङ्गाङ्कैस्तु भाणवत्॥ ६८॥ § 1863

...69 रसः सूच्यस्तु शृङ्गारः स्पृशेदपि रसान्तरम्।
युक्ता प्रस्तावनाख्यातैरङ्गैरुद्घात्यकादिभिः॥ ६९॥
§ 1865

...70ab एवं वीथी विधातव्या द्व्येकपात्रप्रयोजिता। § 1866

वीथीवद् वीथी मार्गः। अङ्गादीनामुपपत्तिः भाणवत् कार्या विशेषस्तु रसः शृङ्गारोऽपरिपूर्णत्वाद्भूयसा सूच्यः। रसान्तराण्यपि स्तोकं स्पर्शनीयानि। कैशिकी वृत्तिरिह रसौचित्यादेवेति। शेषं स्पष्टम्। § 1867

वीथी तु भाणवत् कार्या। विशेषस्तु कैशिकी वृत्तिः। संध्यङ्गानि च
164 अङ्काश्च भाणवत् कार्याः। रसः शृङ्गारः। रसान्तराणि च स्वल्पानि विधात-

६ त्तिः ] N.S.P. *aṅgānāṃ paṅktir vā*.

व्यानि। प्रस्तावनाकथितैरुद्घात्यकादिभिः अङ्गैर्युक्ता। पात्राणि च बहूनि। एवं विधातव्या वीथी। तथा दर्शयति वीथी त्विति। § 1868

अथाङ्कः— § 1869

...70cd उत्सृष्टिकाङ्के प्रख्यातं वृत्तं बुद्ध्या प्रपञ्चयेत्॥ ७०॥
§ 1870

...71 रसस्तु करुणः स्थायी नेतारः प्राकृता नराः।
भाणवत् संधिवृत्त्यङ्गैर्युक्तः स्त्रीपरिदेवितैः॥ ७१॥
§ 1872

...72ab वाचा युद्धं विधातव्यं तथा जयपराजयौ। § 1873

उत्सृष्टिकाङ्क इति नाटकान्तर्गताङ्कव्यवच्छेदार्थम्। शेषं प्रतीतमिति। § 1874

उत्सृष्टिकाङ्के प्रख्यातमितिवृत्तम्। प्राकृता जना नेतारः। रसस्तु करुणः। संधिसंध्यङ्गानि अङ्काश्च भाणवत्। स्त्रीपरिदेवितं भूयो विधेयम्। वाचैव युद्धं विधेयं न कर्मणा। जयपराजयौ च वाचैव विधेयौ। तथा दर्शयति उत्सृष्टिकाङ्क इति। § 1875

अथेहामृगः— § 1876

...72cd मिश्रमीहामृगे वृत्तं चतुरङ्कं त्रिसंधिमत्॥ ७२॥
§ 1877

...73 नरदिव्यावनियमान्नायकप्रतिनायकौ।
ख्यातौ धीरोद्धतावन्त्यो विपर्यासादयुक्तकृत्॥ ७३॥
§ 1879

...74 दिव्यस्त्रियमनिच्छन्तीमपहारादिनेच्छतः।

४ ङ्गैर्युक्तः ] N.S.P. *vṛttyaṅgaiḥ*.

*श‍ृङ्गाराभासमप्यस्य किंचित् किंचित् प्रदर्शयेत्॥
७४॥ § 1881

...75 संरम्भं परमानीय युद्धं व्याजान्निवारयेत्।
वधप्राप्तस्य कुर्वीत वधं नैव महात्मनः॥ ७५॥
§ 1883

...75ef * कार्यो व्यायोगवत् किं तु स्त्रीहेतुरिह संगरः।
§ 1884

मृगवदलभ्यां नायिकां नायकोऽस्मिन्नीहते=वाञ्छति इतीहामृगः। ख्याताख्यातं वस्तु। अन्त्यः=प्रतिनायको विपर्यासाद् विपर्ययज्ञानादयुक्तकारी विधेयः। स्पष्टमन्यत्। § 1885

ईहामृगे तु प्रख्याताप्रख्यातमितिवृत्तम्। नरदिव्यौ नायकप्रतिनायकौ। प्रतिनायकस्तु भ्रमादयुक्तकारी। श‍ृङ्गारमप्यत्र किंचित् किंचित् प्रदर्शयेत्। नायकस्य परमं संरम्भं प्रदर्श्य व्याजेन केनाप्यसौ निवर्तनीयः। वधप्राप्तेऽपि महात्मनि वधो न विधातव्यः। व्यायोगवत् समरः कार्यः। स त्विह स्त्रीहेतुर्भवति। एवमीहामृगः कर्तव्यः। तथा दर्शयति मिश्रमित्यादिना। § 1886

...76 इत्थं विचिन्त्य दशरूपकलक्ष्ममार्ग- मालोक्य
वस्तु परिभाव्य कविप्रबन्धान्।
कुर्यादयत्नवदलंकृतिभिः प्रबन्धं वाक्यैरुदारमधुरैः
स्फुटमन्दवृत्तैः॥ ७६॥ § 1888

---

१ *] A.T.A. *śṛṅgārahāsyam,* and B.M. *śṛṅgārākāram.* Bh.Nṛ. in his comments uses only *śṛṅgāram.* I retained the N.S.P. reading because of the expression *anicchantīṃ divyastriyam.* Cf. :ekatraivānurāgaś cet tiryaṅmlecchagato 'pi vā | yoṣito bahusaktiś ced rasābhāsas tridhā mataḥ ||

४ *] A.T.A. gives this half verse, which is confirmed by Bh. Nr.'s explanation.

११ त्विह] T.MS. reads *saṃrambhaḥ strīhetur bhavati.* Gr.MS. gives it as *samaram api strī-,* etc. M.G.T. reads *satīha strīhetur bhavati.* Tri.MS. reads *nanv iha strī-,* etc. The reading given in the text is my surmise. B.M. says in this context *vyāyogas tu astrīnimittasaṃgrāma iti.*

इति धनंजयविरचिते दशरूपके तृतीयः प्रकाशः

स्पष्टम्। § 1890

इति श्रीविष्णुसूनोर्धनिकस्य कृतौ दशरूपावलोके रूपकलक्षणप्रकाशो नाम तृतीयः प्रकाशः समाप्तः

इत्थं दशरूपकलक्षणं चिन्तयित्वा इतिवृत्तं चावलोक्य महाकविप्रबन्धांश्च दृष्ट्वा तदानुगुण्येन रूपकोक्तैरलंकारैः स्फुटवृत्तैर्मन्दवृत्तैश्च उदारमधुरैर्वाक्यैः प्रबन्धं कुर्यादित्युपसंहरति इत्थमिति। § 1892

इति धनिककृतस्य दशरूपावलोकस्य भट्टनृसिंहकृतायां टीकायां तृतीयः परिच्छेदः[१]

# ४ चतुर्थः प्रकाशः

166

अथेदानीं रसभेदः प्रदर्श्यते— § 1894

...1 विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः।
आनीयमानः स्वाद्यत्वं स्थायी भावो रसः स्मृतः॥
१॥ § 1896

वक्ष्यमाणस्वभावैर्विभावानुभावव्यभिचारिसात्त्विकैः काव्योपात्तैरभिनयोपदर्शितैर्वा श्रोतृप्रेक्षकाणामन्तर्विपरिवर्तमानो रत्यादिर्वक्ष्यमाणलक्षणः स्थायी स्वादगोचरतां निर्भरानन्दसंविदात्मतामानीयमानो रसः। तेन रसिकाः सामाजिकाः। काव्यं तु तथाविधानन्दसंविदुन्मीलनहेतुभावेन रसवत्। आयुर्घृतम् इत्यादिव्यपदेशवत्। § 1897

## चतुर्थः परिच्छेदः

क्रमप्राप्तमपि पूर्वं रसवचनमतिलङ्घ्य नाटकादिषु वस्तुनेतृरसानामुप- 167
योगः प्रतिपादितः। अथेदानीं तत्परिसमाप्तौ लब्धावसरतया स एव रसभेदः

१. Only Gr.MS. reads *daśarūpāvalokanasya ṭīkāyāṃ tṛtīyaḥ prakāśaḥ*.

१ अथेदानीं] A.T.A. reads *rasabhāvāḥ pratipādyante*.
१ पि] T.MS. reads *kramaprāptaṃ pūrvaṃ rasam atilaṅghya*. All other MSS. have *rasavacanam*. Gr.MS. is corrupt in other expressions here.

प्रतिपाद्यत इत्याह अथेति। वक्ष्यमाणस्वभावैरिति। वक्ष्यते हि विभावादीनां स्वभावः। तमिदानीं सिद्धं कृत्वा रसेषु तेषां कश्चित् प्रकारः कथ्यत इति। काव्योपात्तैरिति। द्विविधो हि प्रबन्धः श्राव्योऽभिनेयश्च तत्र श्राव्यापेक्षया। श्रोतॄणामिति अभिनेयापेक्षया च प्रेक्षकाणामिति। स्वादगोचरतामिति। स्वाद्यो हि स्वादुर्भवति। स्वादश्च आत्मानन्दाभिव्यक्तिः। वक्ष्यति हि ‘स्वादः काव्यार्थसंभेदादात्मानन्दसमुद्भवः’ इति । ततश्च विभावादिभिः स्थायिभावो रत्यादिः स्वादगोचरताम् आनन्दरूपतामानीयते। तेनासौ स्वादुर्भवति। स्था-
168 यित्वं च भावस्य प्रत्ययविशेषात्मनः संस्कारद्वारेणेति। स्वादौचित्येन तद्गोचरस्य स्वरूपमाह निर्भरानन्दसंविदात्मतामिति। निरतिशयत्वं निर्भरत्वम्।

---

६ इति] (४।४३)

९ माह] M.G.T. alone reads *svādaucityena tadgocarasvabhāvam āha*. All others give it as *tadgocarasya svarūpam āha*. (This shows that Tri.MS. and M.G.T. are not copies from the same MS., although in some places they seem to have identical readings.) --- Jagannātha quotes the Vedic text *raso vai saḥ; rasaṃ hy evāyaṃ labdhvānand□ bhavati*, in the course of his discussion about the *kāvyarasa*. Viśveśvara, the author of the *Camatkāracandrikā* and protégé of Śiṅgabhūpāla (about A.D. १३३०), is said to be the earliest known writer (see *Annals of BORI.*, vol. १६, p. १३४) to exploit the Upaniṣadic text *raso vai saḥ* in connection with *kāvyarasa*. This text is quoted also by Bh.Nṛ. But there is this difference that Viśveśvara quotes it while talking about the *kāvyarasa* as *brahmasamakakṣayā prokto rasaḥ*, and Jagannātha too quoting these lines says: *asyāṃ* (*rasacarvaṇāyāṃ*) *sukhāṃśabhāne raso vai saḥ, rasaṃ hy evāyaṃ labdhvānandī bhavati iti śrutiḥ, sakalasahṛdayapratyakṣaṃ ceti pramāṇadvayam*. --- Thus Jagannātha brings in these Vedic lines as a *śabdapramāṇa* to prove the *sukhāṃśa* of the *kāvyarasacarvaṇā*. Bh.Nṛ. quotes the Upaniṣadic lines to corroborate the point that *ānanda* in the *kāvya* is *rasaśabdavācya*, as it was so seen in the *śruti* (*tatas ca kāvye 'pi sa* [*ānandaḥ*] *eva rasaśabdavācya iti*—L.Ṭ., p. १६८). By quoting these he simply shows that in the *kāvya*, *rasa* means nothing but *ānanda*. This is not cited by him as a *śabdapramāṇa*, like Jagannātha, or to say (like Viśveśvara) *brahmasamakakṣayā prokto rasaḥ*. If it can be proved that Bh.Nṛ. was earlier than Śiṅgabhūpāla (see the Introduction) then Bh.Nṛ. would be the earliest known writer to quote these Vedic lines in connection with the *kāvyarasa*. See the Introduction.

तदेव च परमत्वम्। तेन परमानन्दसंविदात्मतामित्यर्थः। एकमेव हि वस्तु खपुष्पादिव्यावृत्त्या, दुःखव्यावृत्त्या, जडव्यावृत्त्या च, सत्त्वेन, सुखत्वेन, अनुभवत्वेन चाख्यायते। तेन स्वादस्य विषयोऽपि तथाविधः पदार्थः। स एव च तैस्तैरुपाधिभिस्तारतम्येन सर्वत्राभिव्यज्यमानो रसः। श्रूयते हि 'रसो वै सः'*। रसं ह्येवायं लब्ध्वानन्दी भवति' इति । ततश्च काव्येऽपि स एव रसशब्दवाच्य इति। रसभाजो हि रसिकाः, त एव सामाजिका इति रामादय एव रसभाज इति वदन्तं प्रत्युक्तम्। तर्हि रसवत काव्यमिति कथं काव्यस्य रसवत्ताव्यपदेशः ? तत्राह काव्यं त्विति। *दृष्टश्च तद्धेतावपि तत्त्वेन व्यपदेश इत्याह आयुरिति। § 1898

तत्र *विभावः*— § 1899

…2 ज्ञायमानतया तत्र विभावो भावपोषकृत्।
आलम्बनोद्दीपनत्वप्रभेदेन स च द्विधा॥ २॥ § 1901

*एवमयमेवमियमित्यतिशयोक्तिरूपकादिकाव्यव्यापाराहितविशिष्टरूपतया ज्ञायमानो विभाव्यमानः सन्नालम्बनत्वेनोद्दीपनत्वेन वा यो नायकादिरभिमतदेशकालादिर्वा स विभावः। यदुक्तम्—विभाव इति विज्ञानार्थः इति। तांश्च यथास्वं यथावसरं च रसेषूपपादयिष्यामः। अमीषां चानपेक्षितबाह्यसत्त्वानां शब्दोपधानादेवासादिततद्भावानां सामान्यात्मनां स्वस्वसंबन्धित्वेन विभावितानां साक्षाद् भावकचेतसि विपरिवर्तमानानामालम्बनादिभाव इति न वस्तुशून्यता। तदुक्तं भर्तृहरिणा—

शब्दोपहितरूपांस्तान् बुद्धेर्विषयतां गतान्।
प्रत्यक्षमिव कंसादीन् साधनत्वेन मन्यते॥* § 1904

इति। षड्गहस्रीकृताप्युक्तम्—एभ्यश्च सामान्यगुणयोगेन रसा निष्पद्यन्ते इति। § 1905 169

---

३ ते] Only M.G.T. gives (*anubhavatvena ca*) *khyāyate*. All others give *ākhyāyate*. *duḥkhavyāvṛttyā* and *anubhavatvena ca* are missing in T.MS., and *jaḍavyāvṛttyā* is missing in Tri.MS.

५ *] *śrūyate hi raso vai saḥ* (*Taittirīyopaniṣad*, II. ६.१) is missing in M.G.T. What is given in the text is the reading in all others.

५ इति] (तैत्तिरीयोपनिषत् २।६।१)

८ *] Only M.G.T. reads *dṛśyate* instead of *dṛṣṭaś ca*.

४ *] A.T.A. reads *rasabhāvāḥ pratipādyante*.

६ इति] ना० शा० [GOS. vol. I] पृ० ३४६

१२ *] वाक्यपदीये साधनसमुद्देशे कारिका ५

१४ इति] ना० शा० [GOS. vol. I] पृ० ३४८

ज्ञायमानतया नायकादिरालम्बनत्वम्, अभिमतदेशकालादिश्च उद्दीपनत्वं भजताम्। विभावशब्दस्तयोः किमालम्बन इत्यत्र ज्ञानालम्बन एवेत्युक्त्वा तत्संवादमाह यदुक्तमिति। ननु अतिशयोक्त्या रूपकेण च यथा विभावादयो ज्ञाप्यन्ते तेषां तादृशो बहिःसद्भावो नास्ति। न चैतत् ज्ञानं निर्वस्तुकं युज्यते। तत्राह अमीषां चेति। अमीषां विभावादीनां यादृशं बहिःसत्त्वं तद् आलम्बनादिभावे नापेक्षितमित्यर्थः। कुतस्तर्हि अमीषां तद्भाव इत्यत्राह शब्दोपधानादेवेति। शब्दोपहितं यादृशं रूपं तेनैव तेषां तद्भाव इत्यर्थः। यदि बहिःसत्त्वमेषामनपेक्षितं तर्हि किमात्मान एते येनालम्बनादिभावं भजेरन्। तत्राह सामान्यात्मनामिति। देशकालाद्यनुगतं स्वं स्वं रूपं मा भूत्। तदनुगतं तु शब्दोपहितं रूपम्। तेन रूपेण सर्वदेशेषु सर्वकालेषु सर्वावस्थासु च सर्वान् प्रतिपत्तॄन् प्रत्यमी तद्भावं भजन्त इति। यदि शब्दोपहितमपि रूपं न बहिः प्रकाशेत तत्र सामाजिकानां सर्वेषां चेतसि कथं तद्धेतुको रसास्वादो भवेत्। तत्राह स्वस्वसंबन्धित्वेनेति। एतदुक्तं भवति— सर्वजनस्वसंवेदनसिद्धा खलु रसप्रतिपत्तिः नापलपितुं शक्यते। सा च न समीचीना, आरोपेण जायमानत्वात्। न संशयः, एककोटिकत्वात्। न सा हि भ्रान्तिः,* बाधकाभावात्। न सादृश्यकृता, तथानध्यवसायात्। अस्ति च। तेन लोकोत्तरमेव तस्या रूपं यथा निर्वहति तथैव संविधेयमिति। शब्दोपहितेन रूपेण विभावादीनामुपयोग इत्यत्र विद्वत्संमतिमाह तदुक्तमिति।

---

४ त्] Only T.MS. reads *na cet jñānaṃ nirvastukaṃ yujyate*.
६ द्] This is the reading in Tri.MS. and in Gr.MS. M.G.T. reads *ālambanādibhāve nākṣiptam ity arthaḥ*. T.MS. reads *tadālambanādibhāvo nāpekṣita ity arthaḥ*.
९ तं] T.MS. reads *deśakālādyananugatam,* whereas all others give it as *deśakālādyanugatam.*
१४ त्तिः] nāpalapituṃ śakyate is missing in Tri.MS.
१४ न] In T.MS., and M.G.T. *na* is missing.
१६ *] Except T.MS., all others read merely *na bhrāntiḥ*.
१६ सायात्] Except T.MS., all others read *tathānavasāyāt.*
१७ ति] This is the reading in all MSS. except in M.G.T. which gives it as *yathā nirvahati tathaiva nirvahatu. tathaiva saṃvidhīyatām iti.*
१८ तिमाह] The *kārikā—śabdopahitarūpāṃś ca*, etc. is from the *Vākyapadīya*, Sādhanasamuddeśa, *kārikā* ५. See also Nāgeśa’s *Laghumañjūṣā*, with *Kuñcikā* and *Kalā* (C.S.S., १९२५), p. ३४६, for the interpretation. In this context Kumārasvāmin says thus: *kaṃsādīnāṃ pratyakṣarūpam iva śabdopahitarūpam apy arthakriyākārīty arthaḥ* (op. cit., p. २०६). G.C.O. Haas’ remark (Introduction, p. xxxvii) that this *kārikā* is not from the *Vākyapadīya* is not correct.

यथा कंसादीनां प्रत्यक्षं रूपं तेषु कार्येषु कारणं भवति तथा काव्यशब्दोपहितमपि रूपं रसप्रतिपत्तिकारणत्वेन श्रोतारो मन्यन्त इत्यर्थः। अत्र भरतसंमतिमप्याह षड्भिरस्त्रीकृतापीति। एभ्यः=विभावादिभ्यः। न व्यावृत्तेन स्वरूपेण किं तु शब्दोपहितेन सकलदेशकालाद्यनुगततया सामान्य- गुणयोगेनेत्यर्थः। उक्तं च— 170

अपारे काव्यसंसारे कविरेकः प्रजापतिः।
यथास्मै रोचते विश्वं तथेदं परिवर्तते॥ § 1908
* इति। § 1909

तत्रा*लम्बनविभावो* यथा—

अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तप्रभः
शृङ्गारैकनिधिः स्वयं नु मदनो मासो नु पुष्पाकारः।
वेदाभ्यासजडः कथं नु विषयव्यावृत्तकौतूहलो निर्मातुं
प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः॥* § 1912

§ 1913

अस्याः सर्गविधाविति। अस्या इत्यनेन लावण्यशृङ्गारसौन्दर्यातिशयः प्रतिपाद्यते। तथाहि अस्याः स्रष्टा प्रायेण चन्द्र एव। स हि कान्तप्रभः। विशेषेण स्रष्टापि मदन एव। स हि शृङ्गारैकरसः। उत मधुमास एव। स हि पुष्पाकरः। मुनेरेव सृष्टिकौशलमाशङ्क्य तस्य सांक्रामिकं स्वाभाविकं च कौशलं निषेधति वेदाभ्यासजड इत्यादिना। विषयव्यावृत्तकौतूहलत्वे हेतुः पुराण इति। वेदाभ्यासजडत्वे हेतुः मुनिरिति। § 1914

*उद्दीपनविभावो* यथा—

अयमुदयति चन्द्रश्चन्द्रिकाधौतविश्वः परिणतविमलिम्नि व्योम्नि
कर्पूरगौरः।
ऋजुरजतशलाकास्पर्धिभिर्यस्य पादै-
र्जगदमलमृणालीपञ्जरस्थं विभाति॥ § 1917

§ 1918

…3ab अनुभावो विकारस्तु भावसंसूचनात्मकः। § 1919

---

८ *] (ध्वन्यालोके ३।४२ [वृत्तौ])
३ *] विक्रमो° १।१०
५ नेन] Except in T.MS. in all others *ity anena* is not found.

171 *स्थायिभावाननुभावयन्तः सामाजिकानामश्रु भ्रूविक्षेपकटाक्षादयो रसपोषकारिणोऽनुभावाः। एवं चाभिनयकाव्ययोरप्यनुभावता। साक्षाद्भावकानुभवकर्मतयानुभूयन्त इत्यनुभावनमिति वानुभावा रसिकेषु व्यपदिश्यन्ते। विकारो भावसंसूचनात्मक इति तु लौकिकरसापेक्षया, इह तु तेषां कारणत्वमेव। यथा ममैव—

उज्जृम्भाननमुल्लसत्कुचतटं लोलभ्रमद्भ्रूलतं
स्वेदाम्भःस्नपिताङ्गयष्टि विगलद्व्रीडं सरोमाञ्चया।
धन्यः कोऽपि युवा स यस्य वदने व्यापारिताः सस्पृहं
मुग्धे दुग्धपयोधिफेनपटलप्रख्याः कटाक्षच्छटाः॥ § 1922

इत्यादि यथारसमुदाहरिष्यामः। § 1923

स्थायिभावानिति। काव्याद्युपात्तान् विभावान् भावयतां सामाजिकानां तदुपात्तास्तदनन्तरं भाव्यमाना रसपोषकारिणो येऽश्रुभ्रूविक्षेपकटाक्षादयस्ते अनुभावाः। एवं चेति*। एवं रसपोषकारिणामनुभावत्वेन रसपोषकारिणोरभिनयकाव्ययोरपि अनुभावतेत्यर्थः। एवमनुभावस्वरूपमुक्त्वा तच्छब्दस्यापि समवेतार्थतामाह साक्षादिति। साक्षाद् भावकानामनुभावस्य कर्मतया अनुभूयन्त इत्येवमनुभावा इति, तेषामश्रुप्रभृतीनां फलभूतानाम् अनुभावनम्=भावनानन्तरम् इत्यनुभावा इति वा रसिकेषु भवन्तो व्यपदिश्यन्त इत्यर्थः। स्वमतेन सूत्रकारमतेन च निर्वचनद्वयमित्यवगन्तव्यम्। ननु भवदुक्तनिर्वचनं सूत्रविरुद्धमिव। तत्राह विकारो भावसंसूचनात्मक इति। § 1924

...3cd हेतुकार्यात्मनोः सिद्धिस्तयोः संव्यवहारतः॥ ३॥
§ 1925

१ *] N.S.P. contains a number of mistakes here, making it difficult to get any proper sense. The reader will see the difference by comparing the present text with that of the N.S.P. I am not reproducing here all the readings from N.S.P.
७ मुग्धे] N.S.P. *dugdhamahābdhi-*.
११ *] The text of *Avaloka* in this context in N.S.P. ed. (and others too perhaps) is full of mistakes. The corrected text given now is on the basis of the A.T.A., and the *pratīka*s and interpretations by Bhaṭṭanṛsiṃha.
१२ र्थः] All the MSS. of the commentary read *anubhāvyatety arthaḥ*. From the comments of Bh.Nṛ. *anubhāvatā* seems to be applicable here.

तयोर्विभावानुभावयोर्लौकिकरसं प्रति हेतुकार्यभूतयोः संव्यवहारादेव
सिद्धत्वान्न पृथग्लक्षणमुपयुज्यते। तदुक्तम्—विभावानुभावौ लोकसंसिद्धौ 172
लोकयात्रानुगामिनौ लोकस्वभावानुगतत्वाच्च न पृथग्लक्षणमुच्यते। इति।
§ 1926

ननु विभावानुभावयोः स्वरूपमुक्तम्। ज्ञायमानतया रसपोषकारित्वं हि सर्वेषां समानम्। व्यावृत्तं तु लक्षणं किं नोच्यते। तत्राह हेत्विति। § 1927

अथ *भावः*— § 1928

...4ab सुखदुःखादिभिर्भावैर्भावस्तद्भावभावनम्। § 1929

अनुकार्याश्रयत्वेनोपनिबध्यमानैः सुखदुःखादिरूपैर्भावैस्तद्भावस्य भावकचेतसो भावनं=वासनं भावः। तदुक्तम्—अहो ह्यनेन रसेन गन्धेन वा सर्वमेतद्भावितं= वासितम् इति। यत्तु रसान् भावयन् भावः इति, कवेरन्तर्गतं भावं भावयन् भावः इति च, तदभिनयकाव्ययोः प्रवर्तमानस्य भावशब्दस्य प्रवृत्तिनिमित्तकथनमिति। ते च स्थायिनो व्यभिचारिणश्चेति वक्ष्यमाणाः। § 1930

सुखदुःखादिभिरिति। अनुकार्याश्रयत्वेन कविनोपनिबध्यमानैः सुखदुःखादिभिर्भावैः तस्य सामाजिकस्य [भावस्य] चेतसो यद् भावनं=वासनं स भाव इत्यर्थः। तथैव व्याचष्टे अनुकार्येति। भावशब्दस्य रसान् भावयन् भाव इति कवेरन्तर्गतं भावं भावयन् भाव इति च वदतो वासनावाचित्वं विरुद्धमिव। तत्राह यत्त्विति। ते चेति। ते च भावा इत्यर्थः। § 1931

...4cd पृथग्भावा भवन्त्यन्येऽनुभावत्वेऽपि सात्त्विकाः॥ ४॥
§ 1932

...5ab सत्त्वादेव समुत्पत्तेस्तच्च तद्भावभावनम्। § 1933

परगतदुःखहर्षादिभावनायामत्यन्तानुकूलान्तःकरणत्वं=सत्त्वम्। यदाह— 173
सत्त्वं नाम मनःप्रभवम्। तच्च समाहितमनस्त्वादुत्पद्यते।*। एतदेवास्य सत्त्वं
यत् दुःखितेन प्रहर्षितेन वाश्रुरोमाञ्चादयो निर्वर्त्यन्ते। तेन सत्त्वेन निर्वृत्ताः

३ इति] ना॰ शा॰ [GOS. vol. I] पृ॰ ३४८

५ इति] ना॰ शा॰ [GOS. vol. I] पृ॰ ३४४

६ इति] ना॰ शा॰ [GOS. vol. I] पृ॰ ३४६

४ *] ना॰ शा॰ [GOS. vol. I] पृ॰ ३७४

सात्त्विकाः। तद्भावभावनं च भावः।* तत उत्पद्यमानत्वादश्रुप्रभृतयोऽपि भावाः, भावसंसूचनात्मकविकाररूपत्वाच्चानुभावा इति द्वैरूप्यमेतेषाम्। § 1934

पृथगिति। उक्तेभ्यो भावेभ्यः पृथग् अन्ये सात्त्विकाः सत्त्वजनिताः अनुभावत्वेऽपि भावा भवन्ति। अनुभावाश्च भावाश्च भवन्तीति यावत्। कथं तेषां भावत्वमित्यत्राह सत्त्वादेवेति। कथं तावता तेषां भावत्वमित्यत्राह तच्चेति। तत=सत्त्वं च तद्भावस्य=सामाजिकचेतसो भावनं =वासनं यत इत्यर्थः। तथैव व्याचष्टे परगतेति। अत्यन्तशब्देन रागद्वेषाभ्यामवशीकृतत्वमुच्यते। एवं प्रकृत्यर्थं सत्त्वमुक्त्वा प्रत्ययार्थमाह तेनेति। तथापि तेषां भावत्वस्य किमायातम्। तत्राह तद्भावभावनं चेति। § 1935

ते च— § 1936

...5cd स्तम्भप्रलयरोमाञ्चाः स्वेदो वैवर्ण्यवेपथू॥ ५॥ § 1937

...6 अश्रुवैस्वर्यमित्यष्टौ स्तम्भोऽस्मिन्निष्क्रियाङ्गता।
प्रलयो नष्टसंज्ञत्वं शेषाः सुव्यक्तलक्षणाः॥ ६॥ § 1939

यथा—

*वेवइ सेअदवद्दिअरोमंचिअगत्ति।
सद्दाह अ वीसरवअणा बाहुल्लिअणेत्ति होइ॥ § 1942

मुहं पेमेण वि ण दिज्जइ सामळीहोइ।
खणे खणे मुच्छइ उठ्ठेहि देहि से दंसणअं॥ § 1944

§ 1945

१ *] This is missing in N.S.P.
४ न्तीति] *sattvajanitāḥ* is missing in Tri.MS., and this and *bhāvāś ca* are missing in T.MS. and Gr.MS.
५ त्राह] See Note २०३.
९ त्राह] N.S.P. does not give any reading like *tadbhāvabhāvanaṃ ca,* which is the *pratīka* cited by Bh.Nṛ. A.T.A. gives *tadbhāvabhāvanaṃ ca bhāvaḥ*, which seems to be necessary according to Bh.Nṛ.'s interpretations. The significance seems to be this: *sattvasya= tadbhāvabhāvanasya bhāvatvena, sattvena nirvṛtto ' pi bhāvo bhavati= sattvātmakabhāvavyapadeśyo bhavati. pārthivakapālādinirvṛttaghaṭādeḥ pārthivatvavat.*
६ *] See the Introduction.

तांश्च सात्त्विकानुद्दिशति ते चेत्यादिना। तेष्वव्यक्तांशं व्याचष्टे स्त- 174
म्भोऽस्मिन्निति।

वेवइ सेअदवद्दिअरोमंचिअगत्ति।
सद्दाइ अ वीसरवअणा। बाहुळ्ळिअणेत्ति होइ॥ § 1948

मुहं पेमेण वि ण दिज्जइ सामळीहोइ।
खणे खणे मुच्छइ उठ्ठेहि देहि से दंसणअं॥ § 1950

वेपते स्वेदद्रवार्द्रितरोमाञ्चितगात्री।
शब्दायते च विस्वरवचना बाष्पार्द्रितनेत्रा भवति॥ § 1953

मुखं प्रेम्णापि न दीयते श्यामलीभवति।
क्षणे क्षणे मूर्च्छति उत्तिष्ठ देह्यस्मै दर्शनम्॥ § 1955

इति। अत्र वेपत इति साध्वसमुच्यते। स्वेदद्रवार्द्रित इति स्वेदः। रोमाञ्चितगात्रीति रोमाञ्चः। शब्दायते च विस्वरवचनेत्यनेन गद्गदः। बाष्पार्द्रनेत्रेति बाष्पः। मुखं प्रेम्णापि न दीयत इति स्तम्भः। श्यामलीभवतीति वैवर्ण्यम्। क्षणे क्षणे मूर्च्छतीत्यनेन प्रलय इति। § 1956

अथ *व्यभिचारिणः*। तत्र सामान्यलक्षणम्— § 1957

...7 विशेषादाभिमुख्येन चरन्तो व्यभिचारिणः।
स्थायिन्युन्मग्ननिर्मग्नाः कल्लोला इव वारिधौ॥ ७॥
§ 1959

यथा वारिधौ सत्येव कल्लोला उद्भवन्ति विलीयन्ते च तद्वदेव रत्यादौ स्थायिनि सत्येवाविर्भावतिरोभावाभ्यामाभिमुख्येन चरन्तो वर्तमाना निर्वेदादयो व्यभिचारिणो भावाः। ते च— § 1960

---

४ ळिअणेत्ति] See the Introduction. In the list of words given at the end of *Prākṛtavyākaraṇavṛtti* of Trivikramadeva, *se* is also noted in the sense of *asya* (which is perhaps also of *asmai*). T.MS. is mainly the basis for the Prakrit verses and the *chāyā*, where other MSS. show some serious mistakes. A.T.A. (i.e. *Avaloka*) reads *bāhullira* which corresponds to *bāṣpārdra* in Sanskrit.
६ मुच्छइ] T.MS. seems to read *mujhjhañjai*.
११ ति] Only T.MS. seems to read *mujjhai* in Prakrit and *muhyati* in *chāyā* instead of *mucchai* and *mūrchati*.

...8 निर्वेदग्लानिशङ्काश्रमधृतिजडताहर्षदैन्यौग्र्यचिन्ता-
स्त्रासेर्ष्यामर्षगर्वाः स्मृतिमरणमदाः
सुप्तनिद्राविबोधाः
व्रीडापस्मारमोहाः समतिरलसतावेगतर्कावहित्था
व्याध्युन्मादौ विषादोत्सुकचपलयुतास्त्रिंशदेते
त्रयश्च॥ ८॥ § 1962

अत्र स्थायिनीति सति सप्तमीति व्याचष्टे यथेति। § 1963

तत्र *निर्वेदः*— § 1964

...9 तत्त्वज्ञानापदीर्ष्यादेर्निर्वेदः स्वावमाननम्।
तत्र चिन्ताश्रुनिःश्वासवैवर्ण्योच्छ्वासदीनताः॥ ९॥
§ 1966

तत्त्वज्ञानान्निर्वेदो यथा—

प्राप्ताः श्रियः सकलकामदुधास्ततः किं दत्तं पदं शिरसि
विद्विषतां ततः किम्।
संप्रीणिताः प्रणयिनो विभवैस्ततः किं कल्पं स्थितं तनुभृतां
तनुभिस्ततः किम्॥* § 1969

§ 1970

आपदो यथा—

राज्ञो विपद्बन्धुवियोगदुःखं देशच्युतिर्दुर्गममार्गखेदः।
आस्वाद्यतेऽस्याः कटुनिष्फलायाः फलं मयैतच्चिरजीवितायाः॥
§ 1973

§ 1974

ईर्ष्यातो यथा—

धिग्धिक् शक्रजितं प्रबोधितवता किं कुम्भकर्णेन वा
स्वर्गग्रामटिकाविलुण्ठनपरैः पीनैः किमेभिर्भुजैः।
न्यक्कारो ह्ययमेव मे यदरयस्तत्राप्यसौ तापसः सोऽप्यत्रैव
निहन्ति राक्षसभटान् जीवत्यहो रावणः॥* § 1977

६ *] वैराग्य॰ श्लो॰ ६७
१४ *] हनु॰ ना॰ १४।६

§ 1978

वीरशृङ्गारयो*र्व्यभिचारी निर्वेदो* यथा— 176

ये बाहवो न युधि
वैरकठोरकण्ठपीठोच्छलद्रुधिरराजिविराजितांसाः।
नापि प्रियापृथुपयोधरपत्रभङ्गसंक्रान्तकुङ्कुमरसाः खलु
निष्फलास्ते॥ § 1981

§ 1982

आत्मानुरूपं रिपुं रमणीं वालभमानस्य निर्वेदादियमुक्तिः। एवं रसान्तराणामप्यङ्गभाव उदाहार्यः। § 1983

रसानङ्ग*स्वतन्त्रो निर्वेदो* यथा—

कस्त्वं भोः कथयामि दैवहतकं मां विद्धि शाखोटकं
वैराग्यादिव वक्षि साधु विदितं कस्मादिदं कथ्यते।
वामेनात्र वटस्तमध्वगजनः सर्वात्मना सेवते न च्छायापि
परोपकारकरणी मार्गस्थितस्यापि मे॥ § 1986

विभावानुभावरसाङ्गतदनङ्गभेदादनेकशाखो निर्वेदो निदर्शनीयः। § 1987

एवं निर्वेदमात्रमुक्तम्। इदानीं तस्याङ्गत्वमप्याह वीरेति। क्वचित् तस्य स्वातन्त्र्यमप्यस्तीत्याह रसानङ्गेति। एवं विभावभेदाद्, अनुभावभेदाद्, व्यभिचारिभेदाद्, रसाङ्गत्वाद्, अनङ्गत्वाच्च बहुप्रकारो निर्वेदो निदर्शनीय इत्याह विभावानुभावेति। § 1988

अथ *ग्लानिः*— § 1989

...10 रत्याद्यायासतृट्क्षुद्भिर्ग्लानिर्निष्प्राणतेह च।
वैवर्ण्यकम्पानुत्साहक्षामाङ्गवचनक्रियाः॥ १०॥
§ 1991

निधुवनकलाभ्यासादिश्रमतृट्क्षुद्वमनादिभिर्निष्प्राणतारूपा ग्लानिः। अस्यां च वैवर्ण्यकम्पानुत्साहादयोऽनुभावाः। § 1992

यथा माघे— 177

लुलितनयनताराः क्षामवक्त्रेन्दुबिम्बा रजनय इव
निद्राक्लान्तनीलोत्पलाक्ष्यः।

तिमिरमिव दधानाः स्रसिनः केशपाशा- नवनिपतिगृहेभ्यो यान्त्यमूर्वारवध्वः॥* § 1995

शेषं निर्वेदवदूह्यम्। § 1996

रत्याख्यं भावं व्यावर्तयन् व्याचष्टे निधुवनेति। § 1997

अथ *शङ्का*— § 1998

...11 अनर्थप्रतिभा शङ्का परक्रौर्यात् स्वदुर्नयात्।
कम्पशोषाभिवीक्षादिरत्र वर्णस्वरान्यता॥ ११॥
§ 2000

तत्र *परक्रौर्याद्* यथा रत्नावल्याम्—

ह्रिया सर्वस्यासौ हरति विदितास्मीति वदनं द्वयोर्दृष्ट्वालापं कलयति कथामात्मविषयाम्।
सखीषु स्मेरासु प्रकटयति वैलक्ष्यमधिकं प्रिया प्रायेणास्ते हृदयनिहितातङ्कविधुरा॥* § 2003

§ 2004

*स्वदुर्नयाद्* यथा वीरचरिते—

दूराद् दवीयो धरणीवराभं यस्ताटकेयं तृणवद् व्यधूनोत्।
हन्ता सुबाहोरपि ताटकारिः स राजपुत्रो हृदि बाधते माम्॥*
§ 2007

अनया दिशान्यदप्यनुसर्तव्यम्। § 2008

अथ *श्रमः*— § 2009

...12ab श्रमः खेदोऽध्वरत्यादेः स्वेदोऽस्मिन् मर्दनादयः।
§ 2010

178 *अध्वतो* यथोत्तररामचरिते—

अलसलुलितमुग्धान्यध्वसंजातखेदा-
दशिथिलपरिरम्भैर्दत्तसंवाहनानि।

१ *] ११।२०
६ *] ३।४
१० *] २।१

परिमृदितमृणालीदुर्बलान्यङ्गकानि त्वमुरसि मम कृत्वा यत्र निद्रामवाप्ता॥* § 2013

§ 2014

*रतिश्रमो* यथा माघे—

प्राप्य मन्मथरसादतिभूमिं दुर्वहस्तनभराः सुरतस्य।
शश्रमुः श्रमजलार्द्रललाटश्लिष्टकेशमसितायतकेश्यः॥* § 2017

इत्याद्युत्प्रेक्ष्यम्। § 2018

अथ *धृतिः*— § 2019

...12cd संतोषो ज्ञानशक्त्यादेर्धृतिरव्यग्रभोगकृत्॥ १२॥
§ 2020

*ज्ञानाद्* यथा भर्तृहरिशतके—

वयमिह परितुष्टा वल्कलैस्त्वं च लक्ष्म्या सम इह परितोषो निर्विशेषो विशेषः।
स तु भवतु दरिद्रो यस्य तृष्णा विशाला मनसि च परितुष्टे कोऽर्थवान् को दरिद्रः॥* § 2023

§ 2024

निर्विशेषा विशेषाThe pratīka is thus given in plural in all MSS. and not as nirviśeṣo viśeṣaḥ. इति। वल्कलादयो विशेषा न व्यावर्तका इत्यर्थः। § 2025

*शक्तितो* यथा रत्नावल्याम्—

राज्यं निर्जितशत्रु योग्यसचिवे न्यस्तः समस्तो भरः सम्यक्पालनलालिताः प्रशमिताशेषोपसर्गाः प्रजाः।
प्रद्योतस्य सुता वसन्तसमयस्त्वं चेति नाम्ना धृतिं कामः 179
काममुपैत्वयं मम पुनर्मन्ये महानुत्सवः॥* § 2028

इत्याद्यूह्यम्। § 2029

अथ *जडता*— § 2030

---

१ *] १।२४
५ *] १०।८०
२ कृत्] A.T.A. *bhāvakṛt*.
५ *] वैराग्य° श्लो° ५३
३ *] १।१०

...13 अप्रतिपत्तिर्जडता स्यादिष्टानिष्टदर्शनश्रुतिभिः।
अनिमिषनयननिरीक्षणतूष्णींभावादयस्तत्र॥ १३॥
§ 2032

*इष्टदर्शनाद्* यथा—

एवमालि निगृहीतसाध्वसं शंकरो रहसि सेव्यतामिति।
सा सखीभिरुपदिष्टमाकुला नास्मरत् प्रमुखवर्तिनि प्रिये॥*
§ 2035

§ 2036

*अनिष्टश्रवणाद्* यथोदात्तराघवे—

तावन्तस्ते महात्मानो निहताः केन राक्षसाः। येषां नायकतां यातास्त्रिशिरःखरदूषणाः॥ § 2038 &

द्वितीयः गृहीतधनुषा रामहतकेन।

**प्रथमः** किमेकाकिनैव।

**द्वितीयः** अदृष्ट्वा कः **प्रत्येति**। *तथापि शृणु वयस्य, धनुर्द्वितीय एव तत्र तावतोऽस्मद्बलस्य—

सद्यश्छिन्नशिरःश्वभ्रमज्जत्कङ्ककुलाकुलाः। कबन्धाः केवलं जातास्तालोत्ताला रणाङ्गणे॥ § 2040 &

**प्रथमः** सखे, यद्येवं तदाहमेवंविधः किं करवाणि।' इति।
*तथा च तीव्राभिषङ्गप्रभवेन इत्यादि § 2041

180 अथ *हर्षः*— § 2042

...14ab प्रसत्तिरुत्सवादिभ्यो हर्षोऽश्रुस्वेदगद्गदाः। § 2043

प्रियागमनपुत्रजननोत्सवादिविभावैश्चेतःप्रसादः=हर्षः। तत्र चाश्रुस्वेदगद्गदादयोऽनुभावाः। यथा—

---

५ *] कुमार० ८।५
९ *] N.S.P. *paśya tāvato 'smadbalasya-*, etc.
९ *] The reading in A.T.A. looks like *atiśayoktirūparūpakādibhiḥ kāvyavyāpārābhihita-*, etc.
९ इत्यादि] कुमार० ३।७३

आयाते दयिते मरुस्थलभुवामुत्प्रेक्ष्य दुर्लङ्घ्यतां गेहिन्या
परितोषवाष्पकलिलामासज्य दृष्टिं मुखे।
दत्त्वा पीलुशमीकरीरकवलान् स्वेनाञ्चलेनादरा- दुन्मृष्टं
करभस्य केसरसटाभाराग्रलग्नं रजः॥* § 2046

निवर्देवदितरदुन्नेयम्। § 2047

अथ *दैन्यम्*— § 2048

...14cd दौर्गत्याद्यैरनौजस्यं दैन्यं कार्ष्ण्यामृजादिमत्॥ १४॥
§ 2049

दारिद्र्यन्यक्कारादिविभावैरनोजस्कता चेतसः=दैन्यम्। तत्र च कृष्णतामलिनवसनदर्शनादयोऽनुभावाः। यथा—

वृद्धोऽन्धः पतिरेष मञ्चकगतः स्थूणावशेषं गृहं
कालोऽभ्यर्णजलागमः कुशलिनी वत्सस्य वार्तापि नो।
यत्नात् संचिततैलबिन्दुघटिका भग्नेति पर्याकुला दृष्ट्वा
गर्भभरालसां सुतवधूं श्वश्रूश्चिरं रोदिति॥ § 2052

शेषं पूर्ववत्। § 2053

अ*थौग्र्यम्*— § 2054 181

...15 दृष्टेऽपराधदौर्मुख्यशौर्यैश्चण्डत्वमुग्रता।
तत्र स्वेदशिरःकम्पतर्जनाताडनादयः॥ १५॥ § 2056

यथा वीरचरिते—

उत्कृत्योत्कृत्य गर्भानपि शकलयतः क्षत्रसंतानरोषा- दुद्दामस्यैक-
विंशत्यवधि विशसतः सर्वतो राजवंश्यान्। पित्र्यं तद्रक्त-
पूर्णह्रदसवनमहानन्दमन्दायमान- क्रोधाग्नेः कुर्वतो मे न
खलु न विदितः सर्वभूतैः स्वभावः॥* § 2058&

§ 2059

अथ *चिन्ता*— § 2060

२ *] अमरु॰ श्लो॰ ७७
६ *] २।४८

...16ab ध्यानं चिन्तेहितानाप्तेः शून्यताश्वासतापकृत्। § 2061

यथा—

पक्ष्माग्रग्रथिताश्रुबिन्दुनिकरैर्मुक्ताफलस्पर्धिभिः कुर्वत्या
हरहासहारि हृदये हारावलीभूषणम्।
बाले बालमृणालनालवलयालंकारकान्ते करे
विन्यस्याननमायताक्षि सुकृती कोऽयं त्वया स्मर्यते॥
§ 2064

§ 2065

यथा वा—

अस्तमितविषयसङ्गा मुकुलितनयनोत्पला बहुश्वसिता।
ध्यायति किमप्यलक्ष्यं बाला योगाभियुक्तेव॥ § 2068

§ 2069

अथ *त्रासः*— § 2070

...16cd गर्जितादेर्मनःक्षोभस्त्रासोऽत्रोत्कम्पितादयः॥ १६॥
§ 2071

182 यथा माघे—

त्रस्यन्ती चलशफरीविघट्टितोरुर्वामोरूरतिशयमाप विभ्रमस्य।
क्षुभ्यन्ति प्रसभमहो विनापि हेतोर्लीलाभिः किमु सति कारणे
रमण्यः॥* § 2074

§ 2075

अथा*सूया*— § 2076

...17 परोत्कर्षाक्षमासूया गर्वदौर्जन्यमन्युजा।
दोषोक्त्यवज्ञे भ्रुकुटिमन्युक्रोधेङ्गितानि च॥ १७॥
§ 2078

*गर्वे* यथा वीरचरिते—

५ *] ८।२४

अर्थित्वे प्रकटीकृतेऽपि न फलप्राप्तिः प्रभोः प्रत्युत द्रुह्यन्
दाशरथिर्विरुद्धचरितो युक्तस्तया कन्यया।
उत्कर्षं च परस्य मानयशसोर्विस्रंसनं चात्मनः स्त्रीरत्नं च
जगत्पतिर्दशमुखो दृप्तः कथं मृष्यते॥* § 2081

§ 2082

*दौर्जन्याद्* यथा—

यदि परगुणा न क्षम्यन्ते यतस्व गुणार्जने नहि परयशो
निन्दाव्याजैरलं परिमार्जितुम्।
विरमसि न चेदिच्छाद्वेषप्रसक्तमनोरथो दिनकरकरान्
पाणिच्छत्रैर्नुदन् श्रममेष्यसि॥ § 2085

§ 2086

*मन्युजा* यथामरुशतके—

पुरस्तन्व्या गोत्रस्खलनचकितोऽहं नतमुखः प्रवृत्तो
वैलक्ष्यात् किमपि लिखितुं दैवहतकः।
स्फुटो रेखान्यासः कथमपि स तादृक् परिणतो गता येन
व्यक्तिं पुनरवयवैः सैव तरुणी॥§ 2089

ततश्चाभिज्ञाय स्फुरदरुणगण्डस्थलरुचा मनस्विन्या 183
रोषप्रणयरभसाद् गद्गदगिरा।
अहो चित्रं चित्रं स्फुटमिति निगद्याश्रुकलुषं रुषा ब्रह्मास्त्रं
मे शिरसि निहितो वामचरणः॥* § 2091

§ 2092

पुरस्तन्व्या इत्यादि। पुनरवयवैरिति। या पूर्वं नामतो ज्ञाता सैवावयवैर्यथा व्यक्तिं गता भवति तथेत्यर्थः। स्फुटमिति। भवतो हृदयगतमखिलं स्फुटमित्यर्थः। § 2093

*अथामर्षः*— § 2094

...18 अधिक्षेपापमानादेरमर्षोऽभिनिविष्टता।
*तत्र स्वेदशिरःकम्पतर्जनाताडनादयः॥ १८॥ § 2096

२ *] २।९
१२ *] श्लो॰ ५१-५२
३ *] A.T.A. reads: *svedo 'tra tāḍanaṃ kampaḥ śironirdhūnanāni ca.*

यथा वीरचरिते—

प्रायश्चित्तं चरिष्यामि पूज्यानां वो व्यतिक्रमात्।
न त्वेव दूषयिष्यामि शस्त्रग्रहमहाव्रतम्॥* § 2099

§ 2100

यथा वा वेणीसंहारे—

युष्मच्छासनलङ्घनाम्भसि मया मग्नेन नाम स्थितं प्राप्ता
नाम विगर्हणा स्थितिमतां मध्येऽनुजानामपि।
क्रोधोल्लासितशोणितारुणगदस्योच्छिन्दतः कौरवा- नद्यैकं
दिवसं ममासि न गुरुर्नाहं विधेयस्तव॥* § 2103

§ 2104

अथ *गर्वः*— § 2105

...19 **गर्वोऽभिजनलावण्यबलैश्वर्यादिभिर्मदः।**
**कर्माण्याधर्षणावज्ञा सविलासाङ्गवीक्षणम्॥ १९॥**

§ 2107

184 यथा वीरचरिते—

मुनिरयमथ वीरस्तादृशस्तत्प्रियं मे विरमतु परिकम्पः
कातरे क्षत्रियासि।
तपसि विततकीर्तेर्दर्पकण्डूलदोष्णः परिचरणसमर्थो राघवः
क्षत्रियोऽहम्॥* § 2110

§ 2111

यथा वा तत्रैव—

ब्राह्मणातिक्रमत्यागो भवतामेव भूतये।
जामदग्न्यश्च वो मित्रमन्यथा दुर्मनायते॥* § 2114

§ 2115

अथ *स्मृतिः*— § 2116

३ *] ३।८
७ *] १।१२
६ *] २।२७
१० *] २।१०

...20 सदृशज्ञानचिन्ताद्यैः संस्कारात् स्मृतिरत्र च।
ज्ञातत्वेनार्थभासिन्यां भ्रूसमुन्नमनादयः॥ २०॥ § 2118

यथा—

मैनाकः किमयं रुणद्धि गगने मन्मार्गमव्याहतं शक्तिस्तस्य
कुतः स वज्रपतनाद् भीतो महेन्द्रादपि।
तार्क्ष्यः सोऽपि समं निजेन विभुना जानाति मां रावणं हा
ज्ञातं स जटायुरेष जरसा क्लिष्टो वधं वाञ्छति॥* § 2121

§ 2122

यथा वा मालतीमाधवे—

[illegible]ः मम हि प्राक्तनोपलम्भसंभावितात्मजन्मनः संस्कारस्यानवरत-प्रबोधात् प्रतायमानस्तद्विसदृशैः प्रत्ययान्तरैरतिरस्कृतप्रवाहः प्रियत-मास्मृतिप्रत्ययोत्पत्तिसंतानस्तन्मयमिव करोति वृत्तिसारूप्यत- श्चैत-न्यम्।

लीनेव प्रतिबिम्बितेव लिखितेवोत्कीर्णरूपेव च प्रत्युप्तेव च व-
ज्रलेपघटितेवान्तर्निखातेव च। सा नश्चेतसि कीलितेव वि-
शिखैश्चेतोभुवः पञ्चभि- श्चिन्तासंततितन्तुजालनिबिडस्यूतेव
लग्ना प्रिया॥* § 2124&

§ 2125

सदृशेति। सदृशदर्शनादिसचिवात् संस्कारात् स्मृतिर्भवतीत्यर्थः। स्मृतेः स्वरूपमाह ज्ञातत्वेनार्थभासिन्यामिति। अनुभवपुरस्कारेण तदेकविषया स्मृतिरित्यर्थः। वृत्तिसारूप्यत इति। या चैतन्यस्य तन्मयत्वे वृत्तिः प्रियतमाविषयस्यापि तस्य तादृशी वृत्तिः क्रियत इत्यर्थः।* § 2126

५ *] हनु॰ ना॰ ४।९
१३ च] Pūrṇasarasvatī reads *vajralepa* instead of *vajrasāra*. His comments in this context are worth quoting: *vajralepaghaṭiteva = pīṭhadeśīye tasmin devatāpratimādivat vajralepākhyena auṣadhena dṛḍhaṃ śliṣṭeva iti.* lākṣā sarjarasaḥ śaṅkhaḥ sikatā triphalārasaḥ | kunduruṣkaṃ ca saṃpiṣṭaṃ vajralepo 'yam īritaḥ || --- (T.S.S., p. २६७)
१३ *] मालती॰ ५।१०

१३ र्थः] *arthaḥ* is missing in T.MS. and Gr.MS.
१३ स्कारेण] In M.G.T. the reading is *anubhavasaṃskāreṇa*.
१३ *] Pūrṇasarasvatī's comments in this context are worth quoting: *vṛttisārūpyataḥ, vṛttyā=buddhivṛttirūpeṇa jñānena samānarūpatayā ekākāratayety arthaḥ. caitanyam=ātmasvarūpabhūtaṃ*

अथ *मरणम्*— § 2127

...21ab **मरणं सुप्रसिद्धत्वादनर्थत्वाच्च नोच्यते।** § 2128

यथा—

संप्राप्तेऽवधिवासरे क्षणमनु त्वद्वर्त्मवातायनं वारंवारमुपेत्य
निष्क्रियतया निश्चित्य किंचिच्चिरम्।
संप्रत्येव निवेद्य केलिकुररीं सास्रं सखीभ्यः शिशो-
र्माधव्याः सहकारकेण करुणः पाणिग्रहो निर्मितः॥ § 2131

इत्यादिवच्छृङ्गाराश्रयत्वेन मरणे व्यवसायमात्रमुपनिबन्धनीयम्। अन्यत्र कामचारः। यथा वीरचरिते—

पश्यन्तु भवन्तस्ताटकाम्—

हृन्मर्मभेदिपतदुत्कटकङ्कपत्रसंवेगतत्क्षणकृतस्फुरदङ्गभङ्गा।
नासाकुटीरकुहरद्वयतुल्यनिर्यदुद्बुद्बुदध्वनदसृक्प्रसरा मृतेव॥*
§ 2134

§ 2135

186 मरणावचनस्य हेतुमुक्त्वा शृङ्गारे मरणव्यवसायमात्रं निबन्धनीयम्, अन्यत्र वीरादौ मरणस्यैव निबन्धनेऽपि न दोष इत्याह शृङ्गाराश्रयत्वेनेति।
§ 2136

अथ *मदः*— § 2137

...21cd **हर्षोत्कर्षो मदः पानात् स्खलदङ्गवचोगतिः॥ २१॥**
§ 2138

---

*jñānam. ayam arthaḥ—buddhivṛttyātmakasya priyāsmṛtipratyayasaṃtānasya caitanyaikākāratayodayamānasya ādhyānaparyāyasya ātmacaitanyaikyam āpadya vilayān nirbhedasvarūpaśūnyam ivānandānubhavamātram avasthānam samādhisaṃjñitaṃ sampadyate iti* (T.S.S., p. २६५).

६ त्वेन] N.S.P. *śṛṅgārāśrayālambanatvena.*

१० *] वी० च० १।३९

१३ इत्याह] The reading of the *Avaloka* in N.S.P. is *śṛṅgārārayālambanatvena,* which does not seem to be correct according to Bh.Nṛ.

...22ab निद्रा हासोऽत्र रुदितं ज्येष्ठमध्याधमादिषु। § 2139

यथा माघे—

भावहारि हसितं वचनानां कौशलं दृशि विकारविशेषाः।
चक्रिरे भृशमृजोरपि वध्वाः कामिनेव तरुणेन मदेन॥* § 2142

इत्यादि। § 2143

ज्येष्ठमध्यमाधमेषु क्रमशो निद्राहासरुदितान्युक्त्वा मध्यममुदाहरति भावहारीति। § 2144

अथ *सुप्तम्*— § 2145

...22cd सुप्तं निद्रोद्भवं तत्र श्वासोच्छ्वासक्रिया परम्॥ २२॥
§ 2146

यथा—

लवुनि तृणकुटीरे क्षेत्रकोणे यवानां नवकलमपलालस्रस्तरे
सोपधाने।
परिहरति सुषुप्तं हालिकद्वन्द्वमारात्
कुचकलशमहोष्माबद्धरेखस्तुषारः॥ § 2149

§ 2150

परिहरतीति। सुप्तं सुषुप्तिः। कुचकलशमहोष्मेति। कुच- कालश-योरूष्मणा निरस्तस्तुषारो बहिर्मण्डलाकारः स्थित इत्यर्थः। § 2151

अथ *निद्रा*— § 2152 187

...23 मनःसंमीलनं निद्रा चिन्तालस्यक्लमादिभिः।
तत्र जृम्भाङ्गभङ्गाक्षिमीलनोत्स्वप्नतादयः॥ २३॥
§ 2154

यथा—

४ *] १०।१३
७ ति] In the printed editions of the *Śiśupālavadha* (X.१३) the reading is *hāvahāri*, and also according to Mallinātha. But Bh.Nṛ.'s *pratīka* in all the MSS. is *bhāvahāri*.

*नीद्रार्धमीलितदृशो मदमन्थराणि नाप्यर्थवन्ति न च यानि निरर्थकानि।
अद्यापि मे मृगदृशो मधुराणि तस्या- स्तान्यक्षराणि हृदये किमपि ध्वनन्ति॥ § 2157

§ 2158

यथा च माघे—

प्रहरकमपनीय स्वं निदिद्रासतोच्चैः प्रतिपदमुपहूतः केनचिज्जागृहीति।
मुहुरविशदवर्णां निद्रया शून्यशून्यां ददपि गिरमन्तर्बुध्यते नो मनुष्यः।* § 2161

§ 2162

अथ *विबोधः*— § 2163

...24ab **विबोधः परिणामादेस्तत्र जृम्भाक्षिमर्दने।** § 2164

यथा माघे—

चिररतिपरिखेदप्राप्तनिद्रासुखानां चरममपि शयित्वा पूर्वमेव प्रबुद्धाः।
अपरिचलितगात्राः कुर्वते न प्रियाणा- मशिथिलभुजचक्राश्लेषभेदं तरुण्यः॥* § 2167

§ 2168

188 परिणामादेरिति। आहारपरिणामादेरित्यर्थः। § 2169

अथ *व्रीडा*— § 2170

१ *] N.S.P. gives within brackets Bilhaṇa as the author of this verse. In Vallabhadeva's *Subhāṣitāvalī* this is attributed to Kalaśaka. This verse occurs in the *Locana* at the end of the first Udyota. The authorship of Bilhaṇa does not seem to be correct. Similar verses seem to have been known long before Bilhaṇa. Under II.२.१० Vāmana in his *Kāvyālaṃkāra-sūtravṛtti* quotes *adyāpi smarati rasālasaṃ mano me mugdhāyāḥ smaracaturāṇi ceṣṭitāni.*

६ *] ११।४

५ *] ११।१३

...24cdef दुराचारादिभिर्व्रीडा धार्ष्ट्याभावस्तमुन्नयेत्।
साचीकृताङ्गावरणवैवर्ण्याधोमुखादिभिः॥ २४॥
§ 2172

यथामरुशतके—

पटालग्ने पत्यौ नमयति मुखं जातविनया हठाश्लेषं
वाञ्छत्यपहरति गात्राणि निभृतम्।
न शक्नोत्याख्यातुं स्मितमुखसखीदत्तनयना ह्रिया
ताम्यत्यन्तः प्रथमपरिहासे नववधूः॥* § 2175

§ 2176

अथा*पस्मारः*— § 2177

...25 आवेशो ग्रहदुःखाद्यैरपस्मारो यथाभिधः।
भूपातकम्पप्रस्वेदलालाफेनोद्गमादयः॥ २५॥ § 2179

यथाभिध इति। अपगता स्मृतिर्यत्र सोऽपस्मार इति तस्य निरुक्तिरिति।
§ 2180

यथा माघे—

आश्लिष्टभूमिं रसितारमुच्चैर्लोलद्भुजाकारबृहत्तरङ्गम्।
फेनायमानं पतिमापगानामसावपस्मारिणमाशशङ्के॥* § 2183

§ 2184

अथ *मोहः*— § 2185

...26 मोहो विचित्तता भीतिदुःखावेशानुचिन्तनैः।
तत्राज्ञानभ्रमाघातघूर्णनादर्शनादयः॥ २६॥ § 2187

यथा कुमारसंभवे— 189

तीव्राभिषङ्गप्रभवेण वृत्तिं मोहेन संस्तम्भयतेन्द्रियाणाम्।

५ *] श्लो० ४१
३ *] ३।७२

अज्ञातभर्तृव्यसना मुहूर्तं कृतोपकारेव रतिर्बभूव॥* § 2190

§ 2191

यथा चोत्तररामचरिते—

विनिश्चेतुं शक्यो न सुखमिति वा दुःखमिति वा प्रमोहो
निद्रा वा किमु विषविसर्पः किमु मदः।
तव स्पर्शे स्पर्शे मम हि परिमूढेन्द्रियगणो विकारः
कोऽप्यन्तर्जडयति च तापं च कुरुते॥* § 2194

§ 2195

अथ *मतिः*— § 2196

...27ab भ्रान्तिच्छेदोपदेशाभ्यां शास्त्रादेस्तत्त्वधीर्मतिः। § 2197

यथा किराते—

सहसा विदधीत न क्रियामविवेकः परमापदां पदम्।
वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव संपदः॥* § 2200

§ 2201

यथा च—

न पण्डिताः साहसिका भवन्ति श्रुत्वापि ते संतुलयन्ति तत्त्वम्।
तत्त्वं समादाय समाचरन्ति स्वार्थं प्रकुर्वन्ति परस्य चार्थम्॥
§ 2204

§ 2205

अथा*लस्यम्*— § 2206

...27cd आलस्यं श्रमगर्भादिर्जैह्म्यजृम्भासितादिमत्॥ २७॥
§ 2207

यथा ममैव—

चलति कथंचित् पृष्टा यच्छति वचनं कथंचिदालीनाम्।

---

१ *] ३।७३
५ *] १।३५
५ *] २।३०

आसितुमेव हि मनुते गुरुगर्भभरालसा सुतनुः॥ § 2210

§ 2211

अथावेगः— § 2212

…28 आवेगः संभ्रमोऽस्मिन्नभिमरजनिते शस्त्रनागाभियोगो
वातात् पांसूपदिग्धस्त्वरितपदगतिर्वर्षजे पिण्डिताङ्गः।
उत्पातात् स्रस्तताङ्गेष्वहितहितकृते शोकहर्षानुभावा
वह्नेर्धूमाकुलाक्षः करिजमनु भयस्तम्भकम्पापसाराः॥ २८॥ § 2214

*अभिमरः=राजकलहादिः, तद्धेतुरावेगः। यथा ममैव—

आगच्छागच्छ सज्जं कुरु वरतुरगं संनिधेहि द्रुतं मे खड्गः
क्वासौ कृपाणीमुपनय धनुषा किं किमङ्ग प्रविष्टम्।
*संरम्भोन्निष्ठितानां क्षितिभृति गहनेऽन्योन्यमेव प्रतीत्थं नाथ
स्वप्नाभिदृष्टे त्वयि चकितदृशां विद्विषामाविरासीत्॥ § 2217

इत्यादि। *

तनुत्राणं तनुत्राणं शस्त्रं शस्त्रं रथो रथः।
इति शुश्रुविरे विष्वगुद्भटाः सुभटोक्तयः॥ § 2220

§ 2221

यथा वा—

प्रारब्धां तरुपुत्रकेषु सहसा संत्यज्य सेकक्रिया-
मेतास्तापसकन्यकाः किमिदमित्यालोकयन्त्याकुलाः।

---

२ निते] *abhimara* is the reading in A.T.A. and in B.M.'s, who explains it thus: *abhimaraḥ = śatruśastra-prahāraḥ*, and *Karijam anuasdviradajanitam āveśam anu = paścāt bhayādayo 'nubhāvā bhavanti*. N.S.P. reads *abhisara*.

४ *] N.S.P. *abhisaraḥ = rājavidravādiḥ*. Of the following *yathā mamaiva*, *mamaiva* is missing in A.T.A.

६ *] N.S.P. *saṃrambhonnidritānām* for *saṃrambhonniṣṭhitānām*, and *vādaḥ* for *nātha*.

७ *] The verse *tanutrāṇam tanutrāṇam* is missing in A.T.A.

आरोहन्त्युटजद्रुमांश्च वटवो वाचंयमा अप्यमी सद्यो
मुक्तसमाधयो निजबृसीष्वेवोच्चपादं स्थिताः॥ § 2224

§ 2225

*वातावेगो* यथा—वाताहतं वसनमाकुलमुत्तरीयम् इत्यादि। § 2226
*वर्षजो* यथा—

देवे वर्षत्यशनपचनव्यापृता वह्निहेतो- र्गेहाद् गेहं
फलकनिचितैः सेतुभिः पङ्कभीताः।
191 निम्नप्रान्तानविरलजलान् पाणिभिस्ताडयित्वा
शूर्पच्छत्रस्थगितशिरसो योषितः संचरन्ति॥ § 2229

§ 2230

*उत्पातजो* यथा—

पौलस्त्यपीनभुजसंपदुदस्यमान- कैलाससंभ्रमविलोलदृशः
प्रियायाः।
श्रेयांसि वो दिशतु निह्नुतकोपचिह्न-
मालिङ्गनोत्पुलकमासितमिन्दुमौलेः॥ § 2233

§ 2234

अहितकृतस्त्वनिष्टदर्शनश्रवणाभ्याम्। तद्यथोदात्तराघवे—
**चित्रमायः** *ससंभ्रमम्*
भगवन् कुलपते रामभद्र, परित्रायतां परित्रायताम्।*इत्याकुलतां नाटयति*
इत्यादि। पुनः
मृगरूपं परित्यज्य विधाय विकटं वपुः। नीयते रक्षसानेन लक्ष्मणो
युधि संशयम्॥ § 2236&

वत्सस्याभयवारिधेः प्रतिभयं शङ्के कथं राक्षसात् त्रस्तश्चैष मुनिर्विरौति
मनसश्चास्त्येव मे संभ्रमः। मा हासीर्जनकात्मजामिति मुहुः
स्नेहाद् गुरुर्याचते न स्थातुं न च गन्तुमाकुलमतेर्मूढस्य
मे निश्चयः॥ § 2238&

इत्यन्तेनानिष्टप्राप्तिकृतसंभ्रमः। § 2239
*इष्टप्राप्तिकृतो* यथात्रैव—

५ देवे] N.S.P. *pavana* and *nīdhra* for *pacana* and *nimna*.

१८ यं] N.S.P. *manye* for *śaṅke*.

*प्रविश्य पटाक्षेपेण संभ्रान्तो वानरः*

**चित्रमायः** *महाराअ, एदं खु पवणणंदणागमणेण पहरिस इत्यादि *देवस्स हिअआणंदजणणं विअलिदं महुवणं। इत्यन्तम्। § 2240

यथा वा वीरचरिते—

एह्येहि वत्स रघुनन्दन पूर्णचन्द्र चुम्बामि मूर्धनि चिरस्य परिष्वजे त्वाम्।
आरोप्य वा हृदि दिवानिशमुद्वहामि वन्देऽथवा चरणपुष्करकद्वयं ते॥* § 2243

§ 2244

*वह्निजो* यथामरुशतके—

क्षिप्तो हस्तावलग्नः प्रसभमभिहतोऽप्याददानोंऽशुकान्तं गृह्णन् केशेष्वपास्तश्चरणनिपतितो नेक्षितः संभ्रमेण।
आलिङ्गन् योऽवधूतस्त्रिपुरयुवतिभिः साश्रुनेत्रोत्पलाभिः कामीवार्द्रापराधः स दहतु दुरितं शांभवो वः शराग्निः॥*
§ 2247

§ 2248

यथा वा रत्नावल्याम्—

विरम विरम वह्ने मुञ्च धूमाकुलत्वं प्रसरयसि किमुच्चैरर्चिषां चक्रवालम्।
विरहहुतभुजाहं यो न दग्धः प्रियायाः प्रलयदहनभासा तस्य किं त्वं करोषि॥* § 2251

§ 2252

*करिजो* यथा रघुवंशे—

स च्छिन्नबन्धद्रुतयुग्यशून्यं भग्नाक्षपर्यस्तरथं क्षणेन।
रामापरित्राणविहस्तयोधं सेनानिवेशं तुमुलं चकार॥ § 2255

करिग्रहणं व्यालोपलक्षणार्थम्। तेन व्याघ्रसूकरवानरादिप्रभवा आवेगा व्याख्याताः। § 2256

० *] 'महाराज, एतत् खलु पवननन्दनागमनेन प्रहर्ष'—इति च्छाया.
० *] 'देवस्य हृदयानन्दजननं विदलितं मधुवनम्'—इति च्छाया.
१ *] १। ५५
५ *] श्लो० २
९ *] ४। १६

११ वुवंशे] ५। ४९
१५ व्याख्याताः] After *vyākhyātāḥ* the following is found in A.T.A. *yathā mālatī—are re saṃkarūravāsiṇā jana ity ādi.*

अथ *वितर्कः*— § 2257

...29ab तर्को विचारः संदेहाद् भ्रूशिरोऽङ्गुलिनर्तकः। § 2258

193 यथा—

किं लोभेन विलङ्घितः स भरतो येनैतदेवं कृतं सद्यः
स्त्रीलघुतां गता किमथवा मातैव मे मध्यमा।
मिथ्यैतन्मम चिन्तितं द्वितयमप्यार्यानुजोऽसौ गुरु- र्माता
तातकलत्रमित्यनुचितं मन्ये विधात्रा कृतम्॥ § 2261

§ 2262

अथवा—

कः समुचिताभिषेकादार्यं प्रच्यावयेद् गुणज्येष्ठम्।
मन्ये ममैष पुण्यैः सेवावसरः कृतो विधिना॥ § 2265

§ 2266

अथा*वहित्थम्*— § 2267

...29cd लज्जाद्यैर्विक्रियागुप्ताववहित्थाङ्गविक्रिया। § 2268

यथा कुमारसंभवे—

एवंवादिनि देवर्षौ पार्श्वे पितुरधोमुखी।
लीलाकमलपत्राणि गणयामास पार्वती॥* § 2271

§ 2272

अथ *व्याधिः*— § 2273

...29ef व्याधयः संनिपाताद्यास्तेषामन्यत्र विस्तरः॥ २९॥
§ 2274

दिङ्मात्रं तु यथा—

५ *] ६। ८४

अच्छिन्नं नयनाम्बु बन्धुषु कृतं चिन्ता गुरुभ्योऽर्पिता दत्तं
दैन्यमशेषतः परिजने तापः सखीष्वाहितः।
अद्य श्वः परिनिर्वृतिं व्रजति सा श्वासैः परं खिद्यते विश्रब्धो
भव विप्रयोगजनितं दुःखं विभक्तं तया॥ § 2277

§ 2278

अथोन्मादः— § 2279 194

...30 अप्रेक्षाकारितोन्मादः संनिपातग्रहादिभिः।
अस्मिन्नवस्था रुदितगीतहास्यस्मितादयः॥ ३०॥
§ 2281

यथा—

आः क्षुद्रराक्षस, तिष्ठ तिष्ठ। क्व मे प्रियतमामादाय गच्छसि इत्युपक्रमे

कथम्—

नवजलधरः संनद्धोऽयं न दृप्तनिशाचरः सुरधनुरिदं दूराकृष्टं न तस्य
शरासनम्। अयमपि पटुर्धारासारो न बाणपरंपरा क-
नकनिकषस्निग्धा विद्युत् प्रिया न ममोर्वशी॥* § 2283 &

इत्यादि। § 2284

अथ *विषादः*— § 2285

...31 प्रारब्धकार्यासिद्ध्यादेर्विषादः सत्त्वसंक्षयः।
निःश्वासोच्छ्वासहृत्तापसहायान्वेषणादिकृत्॥ ३१॥
§ 2287

यथा वीरचरिते—

हा आर्ये ताटके, किं हि नामैतत्। अम्वुनि मज्जन्त्यलाबूनि, ग्रावाणः प्लवन्ते।

नन्वेष राक्षसपतेः स्खलितः प्रतापः प्राप्तोऽद्भुतः परिभवो हि मनुष्य-
पोतात्। दृष्टः स्थितेन च मया स्वजनप्रमाथो दैन्यं जरा
च निरुणद्धि कथं करोमि॥ § 2289 &

---

३ स्था ] 'स्थान' इति पाठः.
३ यः ] N.S.P. -*hāsāsitādayaḥ*.
१ * ] विक्रमो° ४। ७

** § 2290

195 अथौत्सुक्यम्— § 2291

...32 कालाक्षमत्वमौत्सुक्यं रम्येच्छारतिसंभ्रमैः।
*तत्रोच्छ्वासत्वनिःश्वासहृत्तापस्वेदविभ्रमाः॥ ३२॥
§ 2293

यथा कुमारसंभवे—

आत्मानमालोक्य च शोभमानमादर्शबिम्बे स्तिमितायताक्षी।
हरोपयाने त्वरिता बभूव स्त्रीणां प्रियालोकफलो हि वेषः॥*
§ 2296

§ 2297

यथा वा तत्रैव—

पशुपतिरपि तान्यहानि कृच्छ्रादगमयदद्रिसुतासमागमोत्कः।
कमपरमवशं न विप्रकुर्युर्विभुमपि तं यदमी स्पृशन्ति भावाः॥*
§ 2300

§ 2301

अथ चापलम्— § 2302

...33 मात्सर्यद्वेषरागादेश्चापलं त्वनवस्थितिः।
तत्र भर्त्सनपारुष्यस्वच्छन्दाचरणादयः॥ ३३॥ § 2304

यथा विकटनितम्बायाः—

अन्यासु तावदुपमर्दसहासु भृङ्ग लोलं विनोदय मनः सुमनोलतासु।

---

० *] A.T.A. reads one more example for *viṣāda* as *yathā vā—arthitve prakaṭīkṛte 'pi ity ādi.*
० *] वी॰ च॰ १। ४०
३ *] 'तत्रोच्छ्वासत्वरा' इति पाठः
६ *] ७। २२
८ था] A.T.A. omits *yathā vā tatraiva paśupatir api,* etc.
१० *] ६। ९५
४ था] Vikaṭanitambāyāḥ is missing in A.T.A.

बालामजातरजसं कलिकामकाले व्यर्थं कदर्थयसि किं
नवमल्लिकायाः॥ § 2307

§ 2308

यथा वा—

विनिकषणरणत्कठोरदंष्ट्राक्रकचविशङ्कटकन्दरोदराणि।
अहमहमिकया पतन्तु कोपात् सममधुनैव किमत्र 196
मन्मुखानि॥ § 2311

अथवा प्रस्तुतमेव तावत् सुविहितं करिष्ये। इति। § 2312

अन्ये च चित्तवृत्तिविशेषा एतेषामेव विभावानुभावस्वरूपानुप्रवेशान्न पृथग्वाच्याः। § 2313

नन्वन्येऽपि सन्ति चित्तवृत्तिविशेषा इति तेऽपि वाच्याः। तत्राह अन्ये चेति। § 2314

अथ *स्थायी*— § 2315

...34 विरुद्धैरविरुद्धैर्वा भावैर्विच्छिद्यते न यः।
आत्मभावं नयत्यन्यान् स स्थायी लवणाकरः॥
३४॥ § 2317

सजातीयविजातीयभावान्तरैरतिरस्कृतत्वेनोपनिबध्यमानो रत्यादिः स्थायी। यथा बृहत्कथायां नरवाहनदत्तस्य मदनमञ्जर्यामनुरागः तत्तदवान्तरनायिकानुरागैरतिरस्कृतः स्थायी। यथा च मालतीमाधवे श्मशानाङ्के बीभत्सेन मालत्यनुरागस्यातिरस्कारो मम हि प्राक्तनोपलम्भसंभावितात्मजन्मनः संस्कारस्यानवरतप्रबोधात् प्रतायमानस्तद्विसदृशैः प्रत्ययान्तरैरतिरस्कृतप्रवाहः प्रियतमाप्रत्ययोत्पत्तिसंतानस्तन्मयमिव करोति वृत्तिसारूप्यतश्चैतन्यम् इत्यादिनोपनिबद्धः। तदनेन प्रकारेण विरोधिनामविरोधिनां च समावेशो न विरोधी। § 2318

---

५ थायां] A.T.A. reads *prākṛtasya naravāhanadattasya*.
५ स्य] N.S.P. *madanamañjūṣāyām*. A.T.A. gives *madanamañjaryām*. The name is found as Madanamañcukā in Somadeva's *Kathāsaritsāgara*, VI. ८–९५. Budhasvāmin's *Bṛhatkathāślokasaṃgraha* has it as *madanamañjukā*, VII. १७.
९ रोति] N.S.P., *antarvṛtti-*.

तथा हि—कथं विरोधः ? सहानवस्थानं बाध्यबाधकभावो वा ? उभयरूपो न तावत्। स्वादात्मनितस्यैकरूपत्वेनाविर्भावात्। स्थायिनां विभावादीनांच यदि विरोधः, तत्रापि न तावत् सहानवस्थानम्। रत्याद्युपरक्ते चेतसि स्रक्सूत्रन्यायेनाविरोधिनां व्यभिचारिणां विरोधिनां चोपनिबन्धः समस्तभावकस्वसंवेदनसिद्धः। यथैव च स्वसंवेदनसिद्धस्त-
197 थैव काव्यव्यापारसंरम्भेणानुकार्येऽप्यावेश्यमानः स्वचेतःसंभेदेनतथाविधानन्दसंविदुन्मीलनहेतुः संपद्यते। तस्मान्न तावद् भावानां सहानवस्थानम्।

§ 2319

बाध्यबाधकभावोहि भावान्तरैर्भावान्तरतिरस्कारः। स च व्यभिचारिणां स्थायिना न विरोधः(संभवति)। व्यभिचारिभिः (च) स्थायिनो न विरुद्धाः। तेषामङ्गत्वात्। प्रधानविरुद्धस्य चाङ्गत्वायोगात्। आनन्तर्यविरोधोऽपि अनेनैव प्रकारेणापास्तः (सन्) न संभवति। तथा च मालतीमाधवे शृङ्गारानन्तरं बीभत्सोपनिबन्धेऽपि न किंचिद् वैरस्यम्। § 2320

तदेवमवस्थितेविरुद्धरसैकालम्बनत्वमेव विरोधहेतुः। स तु अविरुद्धरसान्तरव्यवधानेनोपनिबध्यमानो न विरोधी। यथा—

अण्णाउ ताउ महिला जह परिमलसुअंधु।

---

२ रूपो ] N.S.P. *ubhayarūpeṇāpi*.
२ नि ] This is a better reading than *tādātmyasya eka-*, etc. given in N.S.P.
३ विभावादीनां ] It is not clear why it is *vibhāvādīnām*. As he is discussing the *virodha* between *sthāyibhāva* and *vyabhicāribhāva, bhāvādīnām*perhaps would be suitable. I do not know whether *vyabhicārin-s*are also referred to as *vibhāva-s* in any text.
६ चेतःसंभेदेन ] A.T.A. reads *svasaṃvedanena*. But I have given the reading according to the *pratīka* cited by Bhaṭṭanṛsiṃha.
९ भावो ] N.S.P. has *bādhyabādhakabhāvas tu,* but what is given here is the *pratīka* in the commentary.
१० विरोधः ] A.T.A. reads *viruddhaḥ* and without *saṃbhavati*. The reading given here is based on the interpretation and wording of Bhaṭṭanṛsiṃha.
१० विरुद्धाः ] A.T.A. reads *viddhāḥ* which is obviously a mistake of the scribe.
११ विरोधोऽपि ] A.T.A. reads *-virodhitvam api*. Bhaṭṭanṛsiṃha gives the chosen reading.
११ अनेनैव ] A.T.A. reads *anena prakāreṇa*. Bhaṭṭanṛsiṃha gives *anenaiva prakāreṇa*.
१२ कारेणापास्तः ] N.S.P. and A.T.A. have *apāstaṃ bhavati*.
१४ स्थिते ] Perhaps the reading was *avasthito*. Or else we may supply*sthāyinaḥ sthāyyantareṇa virodha ity asmin viṣaye* to be construed with the locative *avasthite*.
१४ हेतुः ] N.S.P. *virodhe hetuḥ*.

मह कंतह अल्लीणउ वणवीसअगंधु॥ § 2323

इत्यत्र बीभत्सस्य वीरव्यवधानेन शृङ्गारे समावेशो न विरुद्धः प्रकारान्तरेणैकाश्रयविरोधः परिहर्तव्यः। § 2324

विरुद्धैरविरुद्धैर्वेति। अस्यार्थः—विरुद्धैरविरुद्धैर्वा भावैः य आहितः संस्कारो न विच्छेदी भवति, प्रत्युत तान् सर्वानात्मभावं नयति, स स्थायी भावो लवणाकरः। लवणाकरवल्लवणाकरः। उक्तं हि—

‘यथा रुमायां लवणाकरेषु मेरौ यथा वोज्ज्वलरुक्मभूमौ।
यज्जायते तन्मयमेव तत् स्याद्’ इति। § 2327

* § 2328

*विरुद्धाविरुद्धाविच्छेदित्वमन्यदनुत्पाद्येतिवृत्तेषु, अन्यदुत्पाद्येतिवृत्तेषु च प्रबन्धेषु दृष्टमित्याह यथेत्यादिना। अविच्छेदं प्रतिज्ञातमुपपादयति तथा

१ वीसअगंधु] A.T.A. seems to give a different reading of the २nd half of this verse, which is not clear. See the Introduction for a discussion on this verse. Hemacandra reproduces in his *Kāvyānuśāsana* (commentary) *verbatim* the lines and examples from the *Avaloka* from *nanu yatraikatāparyeṇa* up to *na kvacid anekatātparyam*, but leaves out any discussion on or citing of the difficult verse *aṇṇāu tāu-*, etc. Even in the portion that is reproduced, there are mistakes in the text as given in print. (See *H.K.A.*, pp. १६८–९.)

२ स्य] This is the clear reading in A.T.A., which is correct according to Bh.Nr.'s interpretation. N.S.P. reads in this place thus: *ity atra bībhatsasyāṅgabhūtarasāntaravyavadhānena śṛṅgārasamāveśo na viruddhaḥ.*

९ *] (तन्त्रवार्तिके—आनन्दाश्रममुद्रिते पृ० २०७)

१० *] Gr.MS. reads *viruddhāvicchedatvam anyad utpādyetivrateṣu utpādyetivṛtteṣu pṛṣṭam ity āha*. T.MS. and M.G.T. give as *viruddhāviruddhāvicched-itvam anutpādyetivṛtteṣu*. On I.१५, and on III.२३ of the *DR* Bhaṭṭanṛsiṃha explainde the *prakhyāta* is of three types *itihāsāt prasiddham, prakhyātakathātaḥ prasiddham*, and *lokataḥ prasiddham*. And about *utpādya* he says *yatra itivṛttaṃ kavibuddhyaiva kalpyate tad utpādyam*. From this it appears that any *itivṛtta* based on *Bṛhatkathā* (i.e. *prakhyātakathā*) is treated by him as *prakhyātam* (i.e. *anutpādya*) and the story of *Mālatīmādhava* will be *utpādyam*. As both are cited in the *Avaloka* for illustration, I think that the sentence intended here must have reference to both. Therefore I gave it as *anyad anutpādyetivṛtteṣu anyad utpādyetivṛtteṣu ca prabandheṣu dṛṣṭam ity āha*.

हीत्यादिना। कथमिति*। अत्र स्थायिनः स्थाय्यन्तरेण विरोधस्तावत् तिष्ठ-
198 तु। किं तु स्थायिनः परिपोषकतया निधीयमाना विभावादय *एव यदि तं विरुन्ध्युः तर्हि का गतिरिति चेत् तत्राह स्थायिनां विभावादीनां ca is missing only in T.MS. which is also found in A.T.A. (of Avaloka).च यदि विरोध इति। हेतुमाह रत्याद्युपरक्त इति। यदा हि रत्याद्युपरक्तं भवति मनस्तदा तद्विरोधिनां जुगुप्सादीनामविरोधिनामुत्कण्ठादीनां [च] तेन रत्यादिना सहभावो दृष्टः। यथा शुक्लकृष्णपुष्पसंभेदेऽपि अनुस्यूतस्य स्रक्सूत्रस्येत्यर्थः। न केवलं दर्शनमेव, तथैवोपनिबन्धोऽपीत्याह यथैवेति। See Note २५३ to Daśarūpāvaloka.स्वचेतःसंभेदेनेति। वक्ष्यति हि रसाविर्भावप्रकारमुपपादयन् 'स्वादः काव्यार्थसंभेदादात्मानन्दसमुद्भवः' इति । एवं परिहृतं सहानवस्थानमुपसंहरति तस्मादिति। बाध्यबाधकभावलक्षणस्य विरोधस्याप्यभावं वर्णयन् तत्स्वरूपं तावदाह बाध्यबाधकभावोSee Note २५४ to Daśarūpāvaloka. हीति। स हि रत्याद्याहितसंस्कारस्य भावान्तरैर्विच्छेदः। स्वरूपस्य पुनरुत्तरकालीनेन प्रत्ययान्तरेणैव विच्छेदादिति। एवं स्वरूपं परिशोध्य—द्वावेव हि पक्षौ संभवतः। व्यभिचारिभावांस्ते विरुन्धताम्, व्यभिचारिणो वा विरुन्ध्युरिति। तत्र तेषां व्यभिचारिभिर्विरोधो न संभवति। स्थायित्वात्। व्यभिचारिणां चास्थायित्वात्। स्थायित्वं च विषयरामणीयकेन तेषां संभवति। व्यभिचारिणां चास्थायित्वं स्वरूपमेव। 'स्थायिन्युन्मग्ननिर्मग्नाः' * इति वचनात्। स्थायिविरुद्धानामपि व्यभिचारित्वं न संभवति। तान् प्रति तेषामङ्गत्वात्। प्रधानानुकूलं खल्वङ्गं भवति। न तु विरुद्धम्—इत्याह स चेति। ननु मा भूद् यौगपद्येन विरोधः। स्थायिभावानन्तरमेव विजातीयानां निबन्धः एकवाक्ये विरुद्ध इत्यस्माभिरुच्यत इति चेत् तत्राह आनन्तर्यविरोधोऽपीति। अनेनैव प्रकारेण= प्रधानविरुद्धस्याङ्गत्वं न संभवतीति प्रकारेण। तदेवं स्वाङ्गभूतैर्भावैः स्थायिभावानां न कश्चिद् विरोध

१ *] From the commentary it appears that there was perhaps the reading of *katham* before *virodhaḥ* in the *Avaloka*.
२ *] *eva* is missing in only T.MS.
८ था] *kṛṣṇa* is a synonym of *nīla* in Sanskrit. So here it must mean some blue flowers like *nīlotpala*.
११ इति] (दश॰ ४। ४३)
१६ रिशोध्य] *pariśodhya* is connected with *ity āha* coming before *sa ceti*.
२० *] (दश॰ ४। ७)
२२ इत्याह] *pariśodhya* is connected with *ity āha* coming before *sa ceti*.
२३ मेव] Gr.MS. reads *sajātīyānām*. M.G.T. gives it as *vijātīyānām* which is shown in the text as it seems to be suitable in the context. T.MS. seems to read *sajātīyavijātīyānām*.
२४ कारेण] Only T.MS. reads *tatrāha* before *anenaiva prakāreṇa*.

इत्युक्तम्। स्थायिनः स्थाय्यन्तरेण विरोध इति तु परिशिष्यते। तत्राह तदेव-मिति। स्थायिनो रसस्याङ्गभूतैरपि रसान्तरैरेकाश्रयत्वं परिहरणीयमित्यर्थः।
§ 2329

किं तत् सर्वथा त्यजनीयमेव तेषामेकाश्रयत्वम् ? नेत्याह स त्विति। व्यवधानेनाविरोधमुदाहरति—

अण्णाउ ताउ महिळा जह परिमळसुअंधु।
मह कंतह अळ्ळीणउ वणवीसअगंधु॥ § 2332

199

अन्यास्ता महिला यथा परिमलसुगन्धाः।
मम कान्तस्य आश्रितो व्रणविस्रगन्धः॥ § 2335

*अत्रान्यासामसौभाग्यं तत्प्रियतमानामशौर्यं च स्वसौभाग्यप्रकटनेन

२ त्वं] *viruddharasaikālambanatvam eva virodhahetuḥ* (of *Avaloka*) is being explained in this sentence. Bhaṭṭanṛsiṃha by his comment using *ekāśrayatvam* seems to take the two expressions *ekālambanatvam* and *ekāśrayatvam* to convey the same idea, and not in the restricted senses involving a difference between *ālambana* and *āśraya* as noted by later writers like Viśvanātha and others.
६ अण्णाउ] See the Introduction. The reading of the verse available in print without *chāyā* is this: aṇṇahuṇāhumaheliahujuhup-arimalususuaṃdhu | muhukaṃtaha agatthahaaṃga ṇa phiṭṭai gaṃdhu ||
७ ह] The spacing in this verse is mine. The manuscript reads in a continuous way. Sometimes in the Telugu MS. an *anusvāra* or *anusvāra*-like symbol (or zero called *nalli*, according to Dr. Upadhye in his letter who adds that it was the case with Kannada manuscripts too—I noticed it also in the Grantha MS.—) is used before a consonant to indicate that the following consonant is to be duplicated (see Introduction). Consequent on this practice the two words *aṃṇāu* and *aṃḷīṇau* are found with this symbol, and I have given them in the text with the consonants uplicated.
१० स्य] T.MS. reads *āśrite* but M.G.T., Gr.MS. and Tr.MS.—all give *āśrito*, and so I have given this.
११ *] The T.MS. reads *atrāsām*, etc. M.G.T. reads *atrānyāsām*, whereas the Tri.MS. gives *yadanyāsām*. I preferred *atrānyāsām*.

स्वभर्तुः शौर्यप्रकटनेन च स्वात्मनो निन्दाव्याजेन काचिद् ब्रूते। अन्याः खलु ताः स्त्रियो यासामङ्गरागानुकूलश्चिरस्थायी परिमलः। मम तु निर्भाग्यायाः कृतेऽप्यङ्गरागे भर्तृव्रणकृतविस्रगन्ध एवेत्यर्थः। प्रकारान्करेण = अव्यवधानेन = अविरुद्धरसान्तराव्यवधानेन। § 2336

ननु यत्रैकतात्पर्येणेतरेषां विरुद्धानामविरुद्धानां च न्यग्भूतत्वेनोपादानं तत्र भवत्वङ्गत्वेनाविरोधः। यत्र तु समप्रधानत्वेनानेकस्य भावस्योपनिबन्धनं तत्र कथम्। यथा—*

एक्कतो रुअइ पिआ अण्णत्तो समरतूरणिग्घोसो।
पेम्मेण रणरसेण अ भडस्स डोलाइअं हिअअं॥ § 2339

इत्यादौ रत्युत्सादयोः,

मात्सर्यमुत्सार्य विचार्य कार्यमार्याः समर्यादमिदं वदन्तु।
सेव्या नितम्बाः किमु भूधराणामुत स्मरस्मेरविलासिनीनाम्॥*
§ 2342

इत्यादौ रतिशमयोः,

इयं सा लोलाक्षी त्रिभुवनललामैकवसतिः स चायं
दृष्टात्मा स्वसुरपकृतं येन मम तत्।
इतस्तीव्रः कामो गुरुरयमितः क्रोधदहनः कृतो वेषश्चायं
कथमिदमिति भ्राम्यति मनः॥ § 2345

इत्यादौ रतिक्रोधयोः,

अन्त्रैः कल्पितमङ्गलप्रतिसराः स्त्रीहस्तरक्तोत्पल-
व्यक्तोत्तंसभृतः पिनह्य सहसा द्राक् पुण्डरीकस्रजः।
एताः शोणितपङ्ककुङ्कुमजुषः संभूय कान्तैः पिब-
न्त्यस्थिस्नेहसुरां कपालचषकैः प्रीताः पिशाचाङ्गनाः॥*
§ 2348

---

१ नेन] The protion from *svabhartuḥ* to *nindāvyājena* is left out in the T.MS. whereas the M.G.T., Gr.MS. and Tri.MS.—all these contain the reading.
१ निन्दाव्याजेन] The protion from *svabhartuḥ* to *nindāvyājena* is left out in the T.MS. whereas the M.G.T., Gr.MS. and Tri.MS.—all these contain the reading.
३ *] एकतो रोदिति प्रियान्यतः समरतूर्यनिर्घोषः। प्रेम्णा रणरसेन च भटस्य दोलायितं हृदयम्॥ इति च्छाया.
४ तो] This verse as quoted in *Dhvanyāloka* and *H.K.A.* has a slightly different reading.
८ *] शृङ्गार० ३६
१३ भृतः] N.S.P. *pinaddhaśirasā*.
१४ *] मालती० ५। १८

इत्यादावेकाश्रयत्वेन रतिजुगुप्सयोः

एक ध्याननिमीलनान्मुकुलितं चक्षुर्द्वितीयं पुनः पार्वत्या
वदनाम्बुजस्तनतटे शृङ्गारभारालसम्।
अन्यद् दूरनिकृष्टचापमदनक्रोधानलोद्दीपितं शंभोर्भिन्नरसं
समाधिसमये नेत्रत्रयं पातु वः॥ § 2351

इत्यादौ शमरतिक्रोधानाम्,

एकेनाक्ष्णा प्रविततरुषा वीक्षते व्योमसंस्थं भानोर्बिम्बं
सलिललुलितेनापरेणात्मकान्तम्।
अह्नश्छेदे दयितविरहाशङ्किनी चक्रवाकी द्वौ संकीर्णौ
रचयति रसौ नर्तकीव प्रगल्भा॥ § 2354

इत्यादौ शोककोधयोः समप्राधान्येनोपनिबन्धः तत्र कथं न विरोधः ?
अत्रोच्यते—तत्राप्येक एव स्थायी। तथा हि—एक्कत्तो रुअइ पिआ इत्यादौ
थायिभूतोत्साहस्य व्यभिचारिवितर्कलक्षणहेतुसंदेहकारणतया करुणसंग्राम-
तूर्ययोरुपादानं वीरमेव पुष्णातीति भटस्येत्यनेन पदेन प्रतिपादितम्। न च
द्वयोः समप्रधानयोरन्योन्यमुपकार्योपकारकभावरहितयोरेकत्रभावो युज्यते।
किं च संग्रामोपक्रमेसुभटानां कार्यान्तरकरणे प्रस्तुतसंग्रामौदासीन्येन म-
हदनौचित्यम्। अतो भर्तुः संग्रामैकरसिकतया शौर्यमेव प्रकाशयन् प्रिय-
तमाकरुणो वीरमेव पुष्णाति। एवम् मात्सर्यम् इत्यादावपि चिरप्रवृत्त- 201
रतिवासनाया हेयतयोपादानाच्छमैकपरत्वम् आर्याः समर्यादम् इत्यादिना
प्रकाशितमेव। एवम् इयं सा लोलाक्षी इत्यादावपि रावणस्य प्रतिनायक-
तया निशाचरत्वेन मायाप्रधानतया च रौद्रव्यभिचारिभाववितर्कहेतुतया च र-

---

५ भानोर्बिम्बं ] N.S.P. *sajalalulitena*. This verse is attributed to Candraka in *Subhāṣitāvalī*. This is also found in *Hanumannāṭaka* (XII. १७) with the reading as *raudrakāruṇyasaṃjñau* instead of *nartakīva pragalbhā*.

७ इत्यादौ ] N.S.P. and *H.K.A.* read *ratiśokakrodhānām*. But *dvau racayati rasau* in the verse is clear in all the texts.

७ न्धः ] N.S.P. *tat kathaṃ na virodhaḥ*?

९ इत्यादौ ] N.S.P. *-sthāyibhūtotsāhavyabhicāri-lakṣaṇavitarkabhāvahetusaṃdehakāraṇatayā*.

९ या ] A.T.A. *rodanasaṃgrāma-*, etc. in place of *karuṇasaṃgrāma-*.

११ भावो ] N.S.P. *ekavākyābhāvo*.

१२ मे ] N.S.P. *upakrānte saṃgrāme* instead of *saṃgrāmopakrame*, and *kāryāntarakaraṇena* instead of *-karaṇe*.

१७ च ] N.S.P. and *H.K.A.* read *raudravyabhicāriviṣāda-vibhāvavitarkahetutayā*.

तिक्रोधयोरुपादानं रौद्रपरमेव। अन्त्रैः कल्पितमङ्गलप्रतिसराः इत्यादौ बीभत्सैक- परत्वमेव। एकं ध्याननिमीलनात् इत्यादौ शंभोर्भावान्तरैरनाक्षिप्ततया शमस्थस्यापि योग्यन्तरसमाधिवैलक्षण्यप्रतिपादनेन शमैकपरतैव समाधिसमये इत्यनेन स्फुटीकृता। एकेनाक्ष्णा इत्यादौ तु समस्तमपि वाक्यं भविष्यद्विप्रलम्भविषयमिति न क्वचिदनेकतात्पर्यम्। § 2355

यत्र तु श्लेषादिवाक्येष्वनेकतात्पर्यमपि तत्र वाक्यार्थभेदेन स्वतन्त्रतया चार्थद्वयपरतेत्यदोषः। यथा— *

श्लाघ्याशेषतनुं सुदर्शनकरः सर्वाङ्गलीलाजित- त्रैलोक्यां
चरणारविन्दललितेनाक्रान्तलोको हरिः।
बिभ्राणां मुखमिन्दुसुन्दररुचं चन्द्रात्मचक्षुर्दधत् स्थाने यां
स्वतनोरपश्यदधिकां सा रुक्मिणी वोऽवतात्॥ § 2358

इत्यादौ। तदेवमुक्तप्रकारेण रत्याद्युपनिबन्धे सर्वत्राविरोधः। यथा वा श्रूयमाणरत्यादिपदेष्वपि वाक्येषु तत्रैव तात्पर्यं तथाग्रे दर्शयिष्यामः। § 2359

ननु अङ्गतया खलु विरोधः परिहृतः। अङ्गत्वरहितानामप्यनेकेषामेकाश्रयत्वेनान्यतात्पर्यविधुराणामपि दर्शनात् स कथं परिह्रियत इति चोदयति नन्वित्यादिना। एतेष्वप्येकत्रैव तात्पर्यं कथयन् परिहरति अत्रोच्यत इति। एक्कतो रुअइ पिआ इत्यादाविति। अत्र खलु वीरो रसः। तदारम्भकस्थायी उत्साहः। स तु विभावानुभावव्यभिचारिसंयोगेन हि रसीभवति। तस्योत्साहस्य व्यभिचारिभावो यो वितर्कः सः अनवधारणात्मकत्वात् कोटिद्व-

१ इत्यादौ ] N.S.P. and *H.K.A.* read *hāsyarasaikaparatvam eva*. But Dhanika himself posing the question with reference to this verse mentions *ratijugupsayoḥ* (where there is no reference to *hāsa*) which is also reproduced by Hemacandra. Pūrṇasarasvatī commeeting on this verse has a different view (and he also does not mention *hāsa* or *hāsya*). His remarks are: --- *svayaṃ śṛṅgāritvāt teṣāṃ bībhatsarasam api śṛṅgāratvenābhimanyamānaś camatkaroti*, etc. and again at the end *atrāntrādipadānāṃ jugupsādyotakānām api maṅgalapratisarādipadair antarānītair aślīlatvaṃ parihṛtam. śṛṅgāriṇo hi jagad api śṛṅgāramayaṃ paśyantīti guṇatvena, viśrānter iti bhojaḥ. atra śṛṅgāraḥ pratīyate*. (Though he is thus laying stress on *rati* instead of *jugupsā* like Dhanika, he too does not mention *hāsyarasaikaparatvam*.)
३ स्यापि ] N.S.P. and Hemacandra *yogyantaraśamād vailakṣaṇya-*, etc.
७ * ] In A.T.A. *ślāghyāśeṣatanum*, etc. is missing, and instead *subhru tvaṃ kupitetyādau* is found.
१२ या ] *khalu* is missing in T.MS.

यावलम्बिना संदेहेनैव समुत्पद्यते। तस्य संदेहस्योत्पादकतया *>करुण- 202
संग्राममतूर्ययोरुपादानम्। अमुं चार्थं भटशब्दो व्यञ्जयतीति। अपि चैकस्मिन् वाक्ये द्वयोस्तात्पर्यार्थयोरुपादानं न युज्यते। न खलु समप्रधानयोः संबन्धः संभवति। अतः तयोरेकीकरणं नावकल्पते। *तेनाप्येकत्रैव तात्पर्यमिति। किं च समरोपक्रमे तं विहाय शृङ्गारपरत्वमिति सुभटत्वव्याघातकरम्। अतः प्रियतमाकरुणोऽपि वीरस्याङ्गमित्याह किं च N.S.P. gives the Avaloka here as kiṃ copakrānte saṃgrāme, whereas Bh.Nṛ.'s pratīka and A.T.A. read what is now given in the text.संग्रामोपक्रम इति। See Note २७० to Daśarūpāvaloka. On the basis of the pratīkadhāraṇa and explanation by Bh.Nṛ. the different reading in the text is given.रौद्रव्याभिचारिभावेति। रौद्ररसस्योत्पद्यमानस्य यो व्यभिचारिभावो वितर्कः तद्धेतुतया रतिक्रोधयोरुपादानं रौद्रपरमेवेति। शमस्थस्यापीति। यद्यपि शमस्थ एव शंभुः। तथापि शमस्थयोग्यन्तरव्यावृत्तावुपयुज्यते ध्यानमिति तत्रापि शमैकपरतैव। § 2360

ननु श्लिष्टवाक्येष्वनेकत्रापि तात्पर्यं दृश्यते। तत्राह यत्र त्विति। स्वतन्त्रतयेति। एकोच्चारणपठितयोर्वाक्ययोस्तात्पर्यार्थगतगुणप्राधान्याभावेऽपि न दोषः। तत्र वाक्ययोरेव भिन्नत्वादिति। ननु युक्तं श्रूयमाणेषु रत्यादिपदेषु तत्प्रतिपादकस्य वाक्यस्य तत्र तात्पर्यमिति। अश्रूयमाणे तु तस्मिन् कथं तत्र तात्पर्यम्। तेनाश्रूयमाणरत्यादिपदानां 'विवृण्वती शैलसुतापि भावम्' इत्यादीनां रसपरत्वं न युज्यते। तत्राह यथेति। § 2361

ते च— § 2362

---

१ *] A.T.A. (of *Avaloka*) reads here as *rodanasaṃgrāmatūryayoḥ*, But all the MSS. of Bh.Nṛ.'s commentary give it as *karuṇasaṃgrāmatūryayoḥ*.
३ योरुपादानं] T.MS. reads simply *dvayor upādānaṃ na yujyate*.
४ अतः] N.S.P. gives the reading of the *Avaloka* here as *ekavākyabhāvo yujyate*. A.T.A. (of *Avaloka*) reads *ekatrabhāvo yujyate* which seems to be nearer to Bh.Nṛ.'s comment here as *ekīkaraṇaṃ nāvakalpate*.
४ *] M.G.T. and Tri.MS. read *nāpy ekatraiva tātparyam iti*.
१६ ते] See Note १७२a before. The portion of the commentary under IV.४ from *sattvād eveti* up to *tathaivopanibandho 'pīty āha yathaiveti*, which was missing in its proper place in Tri.MS., is found later on before *dṛśyate tarāha* here.
२१ त्राह] N.S.P. reads the *Avaloka* here *yathā vā śrūyamāṇa*, etc. A.T.A. (of *Avaloka*) reads *tathā ca aśrūyamāṇaratyādipadeṣv api vākyeṣu yathaiva tattātparyaṃ tathāgre darśayiṣyāmaḥ*.

...35 रत्युत्साहजुगुप्साः क्रोधो हासः स्मयो भयं शोकः।
शममपि केचित् प्राहुः पुष्टिर्नाट्येषु नैतस्य॥ ३५॥

§ 2364

इह शान्तरसं प्रति वादिनामनेकविधा विप्रतिपत्तयः। तत्र केचिदाहुः—नास्त्येव शान्तो रसः। तस्याचार्येण विभावाद्यप्रतिपादनाल्लक्षणाकरणाच्च। अन्ये तु वस्तुतस्तस्याभावं वर्णयन्ति। अनादिकालप्रवाहायातरागद्वेषयोरुच्छेत्तुमशक्यत्वात्। अन्ये तु वीरबीभत्सादावन्तर्भावं वर्णयन्ति। एवं वदन्तः शममपि नेच्छन्ति। यथा तथास्तु। सर्वथा नाटकादावभिनयात्मनि स्थायित्वमस्माभिः शमस्य नेष्यते। तस्य समस्तव्यापारप्रविलयरूपस्याभिनयायोगात्।

§ 2365

203 अन्ये तु वस्तुतस्तस्येति। भवतु नाम स्वरूपेण शान्तिः। तस्य स्वादात्मकत्वं न विद्यत इति पूर्वेषां पक्षः। अन्येषां तु तत्स्वरूपमेव नास्तीति। अन्ये तु वीरबीभत्सादाविति। यथा वीरो जीमूतवाहनः सर्वत्र कृपापरवशतया तेषां गुणदोषौ प्रति शान्तः। यथा च बीभत्सुस्तांस्तान् कुणपादीन् धिगित्यवजानन् सर्वतो व्यावृत्तः शान्त इति। § 2366

यत्तु केश्चिन्नागानन्दादौ शमस्य स्थायित्वमुपवर्णितम्, *तन्मलयवत्यनुरागेणाप्रबन्धप्रवृत्तेन, अन्ते विद्याधरचक्रवर्तित्वप्राप्तेश्च फलत्वेन विरुद्धम्। न ह्येकानुकार्यविभावालम्बनौ विषयानुरागापरागावुपलब्धौ। अतो दयावीरोत्साहस्यैव तत्र स्थायित्वं शृङ्गारस्याङ्गत्वेन चक्रवर्तित्वावाप्तेश्च नान्तरीयकफलत्वेनाविरोधादभीप्सितम्। एवं च सर्वत्र द्रष्टव्यमिति। परोपकारप्रवृत्तस्य विजिगीषोर्नान्तरीयकत्वेन फलं संपद्यत इत्यावेदितमेव प्राक्। अतोऽष्टावेव स्थायिनः। § 2367

नन्वभिनेयस्यापि जीमूतवाहनस्य शान्तो रसो दृष्टः। तत्राह यत्त्वितिThe discussion in the Avaloka here seems to have a reference to Ānandavardhana's view (under Dhvanyāloka, III. २६, ekāśrayatve, etc.) regarding the

८ स्य] N.S.P. *niṣidhyate.*
१ *] A.T.A. *malayavatyanurāgeṇa prabaddhetivṛttena.*
२ प्राप्तेश्च] N.S.P. *vidyādharacakravartitvaprāptyā' viruddham.*
३ न] A.T.A. *na hy ekānukāryabhāvālambanau vairāgyaviṣayānurāgau upalabdham.*
५ म्] N.S.P. *avirodhād īpsitam eva ca sarvatra kartavyam iti,* etc. The text here as available in N.S.P. is defective, and it is quoted as such by scholars. See Prof. Raghavan's *The Number of Rasas* (१९४०), p. २८.

Nāgānanda having śānta and śṛṅgāra rasas. Dhanika does not accept the śāntarasa in a play, and therefore he says that dayāvīra and not śānta is the rasa in the Nāgānanda. Similarly he discussed earlier under kārikā II.५ about the type of nāyaka in the Nāgānanda. There too he expressed the same view about śāntatā and stated that Jīmūtavāhana was not a śāntanāyaka, but only an udāttanāyaka.। मलयवत्यनुरागेणेति। रागो हि शमविरुद्धः। तथा लाभकारणमभिलाषेऽपीति। न हीति। यो नटेनानुक्रियमाणो जीमूतवाहनादिर्नायकः न तस्मिन्नेव रागस्तदभावश्च। न ह्येकस्मिन्नेव रागस्तदभावश्च क्वचिदुपलब्धपूर्वाविति। अत इति। त्रिधा हि वीरः—दानवीरो युद्धवीरो दयावीरश्चेति। त्रयाणामपि तेषामुत्साह एव स्थायी। तत्र नागानन्दे द्वौ। अङ्गी वीरः। तदङ्गं शृङ्गार इति। एवं चेति*। एवं दृष्टानां सर्ववाक्येषु अन्याङ्गत्वोपवर्णनादेकत्रैव तात्पर्यं द्रष्टव्यमिति। परोपकार इति। प्राग् धीरप्रशान्तनायकप्रतिपादनसमये जीमूतवाहनस्य परोपकार एव तात्पर्येण प्रवृत्तिः, चक्रवर्तित्वादिफललाभस्तु अवघातस्वेदवदानुषङ्गिक इति प्रतिपादितमिति।
§ 2368

ननु च—

रसनाद् रसत्वमेषां मधुरादीनामिवोक्तमाचार्यैः।
निर्वेदादिष्वपि तत् प्रकाममस्तीति तेऽपि रसाः॥* § 2371 204

इत्यादिना रसान्तराणामप्यन्यैरभ्युपगतत्वात् स्थायिनोऽप्यन्ये कल्पिता इत्यवधारणानुपपत्तिः। अत्रोच्यते— § 2372

---

१० यो] Only M.G.T. reads *yoganaṭena*, etc.
१३ त्र] This is the reading in T.MS. In all others the reading is *tatra cāṅgī vīraḥ. tadaṅgaṃ śṛṅgāra iti*. For Ānandavardhana and Abhinava *dayāvīra* is a *nāmāntara* of *śānta*, whereas it is not so for Dhanaṃjaya and Dhanika. See *Locana* with *Bālapriyā* (K.S.S., १९४०), page ३९३.
१४ *] N.S.P. does not give *evaṃ ca*, which is the *pratīka* in all the MSS. of the commentary. The lines available in print in this context have a number of incorrect readings. A.T.A. (of *Avoloka*) gives better readings which seem to be genuine, and to agree with Bh.Nṛ.'s comments. So I have given these readings in the text on the basis of A.T.A. and Bh.Nṛ's interpretations. The text of *Avaloka* with proper punctuations should thus be noted.
३ *] रुद्रटस्य काव्यालंकारे १२। ४

...36 **निर्वेदादिरताद्रूप्यादस्थायी स्वदते कथम्।**
**वैरस्यायैव तत्पोषस्तेनाष्टौ स्थायिनो मताः॥ ३६॥**

§ 2374

विरुद्धाविरुद्धाविच्छेदित्वस्य निर्वेदादीनामभावादस्थायित्वम्। अत एव ते चिन्तादिव्यभिचार्यन्तरिता अपि परिपोषं नीयमाना वैरस्यमावहन्ति। न च निष्फलावसानत्वमेतेषामस्थायित्वनिबन्धनं हास्यादीनामप्यस्थायित्वप्रसङ्गात्। पारंपर्येण तु निर्वेदादीनामपि फलवत्त्वात्। अतोऽस्थायित्वादेवैतेषामरसता।
§ 2375

ननु स्वादात्मकत्वेन हि रसत्वम्। निर्वेदादिष्वपि किं न तत् स्वीक्रियते। रसत्वं च स्थाय्यविनाभूतम्। तेन निर्वेदादीनामपि रसीभावतां स्थाय्यन्तराणि [च] केचिद् वर्णयन्तीति स्थायिनोऽष्टावेवेत्यवधारणं न युज्यत इति चोदयति ननु चेति। अताद्रूप्यादित्यत्र किं तत् ताद्रूप्यं नाम यद्विरहात् निर्वेदादीनामस्थायित्वमिति व्यञ्जयति विरुद्धाविरुद्धाविच्छेदित्वस्येति। विरुद्धाविरुद्धाविच्छेदित्वं हि स्थायित्वे तन्त्रम्। तदभावादस्थायित्वमित्यर्थः। नन्वेतेषां रसत्वाभावः सामग्र्यभावेनाप्युपपद्यत इति शङ्कां शमयति चिन्तादीति। ननु फलपर्यवसायित्वाभावेनैव निर्वेदादीनामस्थायित्वम्। न तु विरुद्धाविरुद्धाविच्छेदित्वाभावेन। तत्राह न चेति। फलपर्यवसायित्वविरह एवास्थायित्वे निबन्धनं चेत् त्रिवर्गपर्यवसायित्वविरहिणां हास्यादीनामप्यस्थायित्वं प्रसज्येतेत्यर्थः। पारंपर्येण तु हास्यादीनां फलवत्त्वं विद्यत इति चेत् तन्निर्वेदादिष्वपि समानमित्याह पारंपर्येण त्विति। § 2376

कः पुनरेतेषां काव्येनापि संबन्धः ? न तावद् वाच्यवाचकभावः, स्वश-
205 ब्दैरनावेदित्वात्। न हि शृङ्गारादिरसेषु काव्येषु शृङ्गारादिशब्दा रत्यादिशब्दा वा श्रूयन्ते। येन तेषां तत्परिपोषस्य वाभिधेयत्वं स्यात्। यत्रापि च श्रूयन्ते तत्रापि विभावादिद्वारकमेव रसत्वमेतेषां न स्वशब्दाभिधेयत्वमात्रेण। नापि

६ त्वात्] N.S.P. reads after *phalavattvāt* the following: *ato niṣphalatvam asthāyitve prayojakaṃ na bhavati. kiṃtu viruddhair aviruddhair bhāvair atiraskṛtatvam. na ca nirvedādīnām iti na te sthāyinaḥ. tato rasatvam api na teṣām ucyate.*
१० न्तीति] *sthāyinām aṣṭāv eveti* seems to be the reading in some MSS. *sthāyino 'ṣṭāv eva* is perhaps better, and was intended. *varṇayanti* is the reading in T.MS., but in others *sthāyyantarāṇi santīti* is the reading.

लक्ष्यलक्षकभावः, तत्सामान्याभिधायिनस्तल्लक्षकस्य पदस्याप्रयोगात्। नापि लक्षितलक्षणया तत्प्रतिपत्तिः। * उक्तं च—

क्रियासमन्वयायोगाच्छब्दः स्वार्थे स्खलद्गतिः।
अर्थान्तरं क्रियायोग्यं लक्षयेदिति लक्षणा॥ § 2379

इति। यथा गङ्गायां घोषः इत्यादौ। तत्र हि स्वार्थे स्रोतोलक्षणे घोषस्यावस्थानासंभवात् स्वार्थे स्खलद्गतिर्गङ्गाशब्दः स्वार्थाविनाभूतार्थलक्षणं तटमुपलक्षयति। अत्र तु नायकादिशब्दाः स्वार्थेऽस्खलद्गतयः कथमिवार्थान्तरमुपलक्षयेतुः ? को वा निमित्तप्रयोजनाभ्यां विना मुख्ये सत्युपचरितं प्रयुञ्जीत ? सिंहो माणवकः इत्यादिवत्। अत एव गुणवृत्त्यापि नेयं प्रतीतिः। यदि च वाच्यत्वं रसप्रतिपत्तेः स्यात् तदा केवलवाच्यवाचकभावमात्रव्युत्पन्नचेतसामप्यरसिकानां रसास्वादो भवेत् ! न च काल्पनिकत्वम्, अविगानेन सर्वसहृदयानां रसास्वादोद्भूतेः। अतः केचिदभिधालक्षणागौणीभ्यो वाद्यन्तरपरिकल्पितशक्तिभ्यो व्यतिरिक्तं व्यञ्जकत्वलक्षणं शब्दव्यापारं रसालंकारवस्तुविषयमिच्छन्ति। तथा हि—विभावानुभावव्यभिचारिमुखेन रसादिप्रतिपत्तिरुपजायमाना कथमिव वाच्या स्यात् ? तथा हि—

विवृण्वती शैलसुतापि भावमङ्गैः स्फुटद्बालकदम्बकल्पैः।
साचीकृता चारुतरेण तस्थौ मुखेन पर्यस्तविलोचनेन॥* § 2382

इत्यादावनुरागजन्यावस्थाविशेषानुभाववद्गिरिजालक्षणविभावोपवर्णनादेवाशब्दापि शृङ्गारप्रतीतिरुदेति। रसान्तरेष्वप्ययमेव न्यायः। न केवलं रसेष्वेव यावद्वस्तुमात्रेऽपि। यथा— 206

भम धम्मिअ वीसद्धं सो सुणओ अज्ज मारिओ तेण।
गोलाणइकच्छकुडुंगवासिणा दरिअसीहेण॥* § 2385

इत्यादौ निषेधप्रतिपत्तिरशब्दापि व्यञ्जकशक्तिमूलैव। तथालंकारेष्वपि—

१ स्य] N.S.P. *sāmānyābhidhāyinas tu lakṣakasya.*
२ नापि] A.T.A. *nāpi lakṣyalakṣaṇayā.*
२ *] The expression *uktaṃ ca*, and the *kārikā kriyāsamanvayāyogāt*, etc. the existence of which is confirmed by Bh. Nṛ.'s interpretation are missing in the N.S.P., and perhaps in other editions too. See the *Laghuṭīkā* and Note २१० thereon.
६ ब्दः] N.S.P. reads *svārthaṃ vinā bhūtārthopalakṣitam,* etc.
१२ णागौणीभ्यो] N.S.P. *vācyāntaraparikalpita-*, etc.
१७ *] कुमार० ३। ६८
१९ ब्दापि] A.T.A. *aśābdy api* instead of *aśabdāpi.*
२२ *] गाथा० २। ७५

लावण्यकान्तिपरिपूरितदिङ्मुखेऽस्मिन् स्मेरेऽधुना तव मुखे
तरलायताक्षि।
क्षोभं यदेति न मनागपि तेन मन्ये सुव्यक्तमेव जलराशिरयं
पयोधिः॥ § 2388

इत्यादिषु चन्द्रतुल्यं तन्वीवदनारविन्दमित्युपमाद्यलंकारप्रतिपत्तिर्व्यञ्जकत्वनिबन्धनीति। न चासावर्थापत्तिजन्या, *अनुपपद्यमानार्थाभावात्। नापि वाक्यार्थत्वम्, व्यङ्ग्यस्य तृतीयकक्ष्याविषयत्वात्। तथा हि—भ्रम धार्मिक इत्यादौ पदार्थविषयाभिधालक्षणप्रथमकक्ष्यातिक्रान्तः क्रियाकारकसंसर्गात्मकविधिविषयवाक्यार्थद्वितीयकक्ष्यातिक्रान्तस्तृतीयकक्ष्याविपरिवर्ती निषेधात्मा व्यङ्ग्यलक्षणोऽर्थो व्यञ्जकशक्त्यधीनः स्फुटमेवावभासते। अतो नासौ वाक्यार्थः। ननु च तृतीयकक्ष्याविषयत्वमश्रूयमाणपदार्थतात्पर्येषु विषं भुङ्क्ष्व इत्यादिवाक्येषु निषेधार्थविषयेषु प्रतीयत एव वाक्यार्थस्य। न चात्र व्यञ्जकत्ववादिनापि वाक्यार्थत्वं नेष्यते, तात्पर्यादन्यत्वाद् ध्वनेः। *न—तत्र स्वार्थस्य द्वितीयकक्ष्यायामविश्रान्तस्य तृतीयकक्ष्याऽभावात्। सैव निषेधकक्ष्या। तत्र द्वितीयकक्ष्याविधौ क्रियाकारकसंसर्गानुपपत्तेः। प्रकरणात् पितरि वक्तरि पुत्रस्य विषभक्षणनियोगाभावात्। रसवद्वाक्येषु च विभावप्रतिपत्तिलक्षणद्वितीयकक्ष्यायां रसानवगमात्। तदुक्तम्—

अप्रतिष्ठमविश्रान्तं स्वार्थे यत्परतामिदम्।
वाक्यं विगाहते तत्र न्याय्या तत्परतास्य सा॥ § 2391

यत्र तु स्वार्थविश्रान्तं प्रतिष्ठां तावता गतम्।
तत् प्रसर्पति तत्र स्यात् सर्वत्र ध्वनिना स्थितिः॥ § 2393

207 इति। एवं सर्वत्र रसानां व्यङ्ग्यत्वमेव। वस्त्वलंकारयोस्तु क्वचिद् वाच्यत्वं क्वचिद् व्यङ्ग्यत्वम्। तत्रापि यत्र व्यङ्ग्यस्य प्राधान्येन प्रतिपत्तिस्तत्रैव ध्वनिः, अन्यत्र गुणीभूतव्यङ्ग्यत्वम्। तदुक्तम्—

यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।
व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः॥* § 2396

४ नीति] A.T.A. *vyañjananighnaiva* in place of *vyañjakatvanibandhanī*.
४ *] N.S.P. -*arthāpekṣābhāvāt*.
६ इत्यादौ] N.S.P. reads here a very long compound beginning with *padārthaviṣaya-* and ending *tṛtīyakakṣākrānto*.
११ *] Before *tatra* A.T.A. gives separately *na* and a dash.
१५ मात्] A.T.A. reads *rasānāṃ vyaṅgyatvam eva* after *rasānavagamāt*.
१८ तिष्ठां] N.S.P. *tāvadāgatam*.
२४ *] ध्वन्या० १। १३

प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गं तु रसादयः।
काव्ये तस्मिन्नलंकारो रसादिरिति मे मतिः॥* § 2399

§ 2400

यथा—उपोढरागेण इत्यादि। तस्य च ध्वनेर्विवक्षितवाच्याविवक्षितवाच्यत्वेन द्वैविध्यम्। अविवक्षितवाच्योऽप्यत्यन्ततिरस्कृतस्वार्थोऽर्थान्तरसंक्रमितवाच्यश्चेति द्विधा। विवक्षितवाच्यश्चासंलक्षितक्रमः क्रमद्योत्यश्चेति द्विविधः। तत्र रसादीनामसंलक्ष्यक्रमध्वनित्वं प्राधान्यप्रतीतौ सत्याम्। अङ्गत्वेन प्रतीतौ रसवदलंकार इति। § 2401

स्वशब्दैरिति। रत्यादिशब्दैरित्यर्थः। तेषां तत्परिपोषस्य वेति। रत्यादिस्थायिभावानां तत्परिपोषस्य शृङ्गारादेर्वेत्यर्थः। नन्वश्रवणमनियतम्। तत्राह यत्रापि चेति। ननु विभावादिप्रतिपादकशब्दाः श्रुता रत्यादीन् तत्परिपोषं वा लक्षयिष्यन्ति। तत्राह नापीति। हेतुमाह तत्सामान्याभिधायिन इति। गोत्ववत् सामान्याभिधायी शब्दः तस्य सामान्यस्य अर्थक्रियाऽयोगादर्थक्रियाक्षमां व्यक्तिं लक्षयतीति युक्तम्। इह तु स्थायिनां रसानां वा लक्षणामूलस्य सामान्यस्याभिधायको न कश्चिच्छब्दोऽस्ति यतो लक्षणा स्यादिति। तत्र हीति। सामान्याभिधायिनोऽपि शब्दस्यार्थक्रियार्थिभिः प्रयुक्तस्य तस्मिन् सामान्ये अर्थक्रियाऽयोगात् सर्वत्र तत्क्षमा व्यक्तिरेव स्वार्थो भवति। तेन 'गङ्गायां घोषः' इत्यत्र गङ्गाशब्दार्थे स्रोतसि घोषप्रतिवासासंभवेन गङ्गाशब्दः तत्प्रतिवासयोग्यं तटं लक्षयति। इह तु तथाविधा ल- 208
क्षितलक्षणा न संभवतीति। स्वार्थे स्खलद्गतिरिति। स्वार्थतामापन्ने स्रोतसि

३ *] ध्वन्या० २। ५
७ मः] A.T.A. *saṃlakṣitakramaś ceti* instead of *kramadyotyaś ca.*
१५ वा] See Note २८२ to *Daśarūpāvaloka*. I have note been able to find out the source of *kārikā-kriyāsamanvayāyogāt,* etc. quoted by Dhanika in this context. This *kārikā* is not found in N.S.P. and other editions too (?), but it is clearly given in A.T.A. and its existence is confirmed by Bh.Nṛ.'s interpretation.
२१ न] After explaining the view that *lakṣaṇā* could not serve the purpose here, Dhanika introduces the discussion about the next part of the argument (of others) as *nāpi lakṣitalakṣaṇayā tatpratipattiḥ*. Bh.Nṛ. also uses the expression *iha tu tathāvidhā lakṣitalakṣaṇā na saṃbhavatīti*. This expression *lakṣitalakṣaṇā* is used in the sense of what also seems to be known as *lakṣaṇalakṣaṇā* mentioned by Mammaṭa (i.e. *jahallakṣaṇā*) connected with the example *gaṅgāyāṃ ghoṣaḥ.* This has nothing to do with the *paraṃparā*

घोषप्रतिवासासंभवेन तमुल्लङ्घ्य गच्छन्नित्यर्थः। स्वार्थाविनाभूतेति।* स्वार्थेन स्रोतसा यस्य न विनाभावस्तादृशं तटम्। न हि गङ्गा तटविधुरा संभवतीत्यर्थः। इह तु नायकादिशब्दानां लक्षणामूलभूतं स्वार्थे स्खलनं न संभवति। स्वार्थस्यैवार्थक्रियाक्षमत्वेन तदुल्लङ्घनाभावादिति। किं च सर्वत्र लक्षणायां मुख्यार्थबाधस्तद्योगश्च निमित्तम्। निरूढलक्षणायां तु न प्रयोजनेन भवितव्यम्। अन्यत्र तु तदवश्यंभावः। इह तु न तन्निमित्तमस्ति। न च प्रयोजनम्। तेन कथं मुख्ये विद्यमानेऽप्युपचरितमर्थमुपाददीरन्नित्याह को वेति। सिंहो माणवक इत्यादिवदिति। ‘सिंहो माणवकः’ इति हि समभिव्याहारे माणवकादावसंभवात् स्वार्थस्य, सिंहशब्दः स्वार्थाविनाभूतं तद्गतं शौर्यं लक्षयित्वापि तत्राप्यनुपपन्नस्तथाविधगुणयुक्तं देवदत्तं प्रत्याययति। तत्र देवदत्तादिपदैः समभिव्याहारानुपपत्तिः शौर्यादिगुणसंबन्धश्च निमित्तम्। विशिष्टशौर्यप्रतिपत्तिः प्रयोजनम्। न हि ‘सिंहवद् देवदत्तः शूरः’ इत्युक्ते शूरतमेन सिंहेन तादात्म्यप्रतिपत्ताविव देवदत्तस्य शौर्यं प्रतीयते। ततः सर्वत्रोपचारवृत्तौ शब्दस्य निमित्तेन प्रयोजनेन च भवितव्यमित्यर्थः। यत एव निमित्तप्रयोजनादिर्नास्ति, अत एव नायकादिशब्दानां गौणी वृत्तिरपि न संभवतीत्याह अत एवेति। यद्यप्येतत् पदगामि वृत्तित्रयमपि न

---

*lakṣaṇā* which is also termed as *lakṣitalakṣaṇā* by later Naiyāyika-s, which is connected with the example *dvirepha*. Abhinavagupta's remarks in the *Locana*: *tenāyaṃ lakṣaṇalakṣaṇāyā na viṣayaḥ* (on I.२०, N.S.P. १८९१, page ४४), and again *tena yat kenacit lakṣitalakṣaṇeti nāma kṛtam tad vyasanamātram* (ibid. on I.४, page १८), using both the expressions *lakṣitalakṣaṇā* and *lakṣaṇalakṣaṇā* seem to take them as synonymous, being connected (in both the places) with the examples like *gaṅgāyāṃ ghoṣaḥ*. The *kārikā* running as *kriyāsamanvayāyogāt,* etc. which is cited by Dhanika and commented on by Bh.Nṛ. is in connection with the discussion about this *lakṣitalakṣaṇā*.

१ *] From the *pratīka* and comments by Bh.Nṛ. it would appear that the reading in the *Avaloka* here should be *svārthāvinābhūtaṃ taṭaṃ* (*lakṣayati* or *upalakṣayati*). A.T.A. (of *Avaloka*) reads *svārthā- vinābhūtalakṣaṇaṃ taṭam upalakṣayati*.

३ तु] T.MS. reads *iha tu aśrutānāṃ nāyakādiśabdānām*, whereas M.G.T. and Tri.MS. read *iha tu śrutānām*. Gr.MS. reads simply *iha tu nāyakādiśabdānām*.

५ णायां] Tri.MS. reads *nirūḍhalakṣaṇāyāṃ tu*. T.MS. and Gr.MS. read as *tadyogaś ca nimittam iti rūḍhalakṣaṇāyāṃ tu*, etc. M.G.T. gives it as *rūḍhilakṣaṇāyāṃ tu*.

१६ पि] About the *vṛttitraya,* Bh.Nṛ. explains *abhidhā,*

संभवति, तथापि वाक्यमेव वाक्यार्थीभूतं रसं प्रत्याययिष्यति। तत्राह यदि चेति। वाक्याद् वाक्यार्थप्रतिपत्तौ न वृत्त्यन्तरमस्ति। किं तु वाक्यगतेषु पदेषु पदार्थप्रतिपादनेन पर्यवसितेषु प्रतिपन्नाः पदार्थाः परस्परमाकाङ्क्षादित्रयमूलमन्वयमवाप्य वाक्यार्थत्वेन प्रतिपद्यन्ते। पदार्थप्रतिपादनस्य शब्दमूलकत्वाच्च वाक्यार्थः शाब्दो भवति। तेन रसस्य वाक्यार्थत्वे पदपदार्थव्युत्पत्तिमात्रयुक्तचेतसां पुंसां वाक्याद् रसप्रतीतिर्भवेत्। न चैवमित्यर्थः। यद्यपि रसस्य वाक्यार्थत्वं स्थापयिष्यते, तथापि वाक्यस्योद्देश्यतया रसो वाक्यार्थः। वस्तुतस्तु विभाववाक्यानां त एव वाक्यार्थाः तत्प्रतिपत्त्यवान्तरव्यापारतया रसप्रतिपत्तेः तं प्रति पदार्थस्थानीया उच्यन्त इति। तर्हि रसप्रतिपत्तिः सर्वथैवासंभवमूला काल्पनिकी भवतु। तत्राह न चेति। यतो वाक्यान्तरपरिक- 209
ल्पितपदशक्तिभ्यो मुख्यादिभ्यः सर्वथैव न रसप्रतिपत्तिर्भवति, अतस्ताभ्यः शक्तिभ्यो व्यतिरिक्तां वाक्यशक्तिं काव्येषु व्यञ्जकत्वाभिधानां ध्वन्यपरपर्यायां रसालंकारवस्तुविषयां केचिदिच्छन्तीत्याह अत इति। तामुपपादयति तथा हीति। रसादिप्रतिपत्तेरभिधादिमूलत्वं व्यवच्छिनत्ति विभावेति। न हि पदार्थं बुध्यमानानां सर्वेषां विभावादिप्रतिपत्त्यवश्यंभाव इत्यर्थः।* अनुरागजन्यावस्थाविशेषानुभाववद्गिरिजालक्षणविभावोपवर्णनादेवेति। अविद्यमानेष्वपि रत्यादिपदेष्वनुरागजन्यो योऽवस्थाविशेषः तद्वान् गिरिजालक्षणो यो विभावः तन्मात्रेण रसप्रतिपत्तिरुपजायमाना न हि वाचकमूलेति युक्तमित्यर्थः। एवं रसे ध्वनिमुपपाद्य वस्त्वन्यप्युपपादयति न केवलमिति। भम धम्मिअ।

भ्रम धार्मिक विस्रब्धं स शुनकोऽद्य मारितस्तेन।
गोदावरीकच्छकुडुङ्गवासिना दृप्तसिंहेन॥ § 2404

§ 2405

निषेधप्रतिपत्तिरिति। यद्यपि भ्रम धार्मिकेति वाक्यं स्वरूपतो विधावेव पर्यवस्यति। तथापि तस्य तात्पर्यार्थः 'तत्र मा गाः' इत्येव। न च तत्प्र-

*lakṣaṇā*, and *gauṇī* as the three *vṛtti*s, as is also noted by Dhanika himself *ataḥ kecid abhidhālakṣaṇāgauṇībhyaḥ*, etc.
३ दार्थाः] For information on the *abhihitānvayavāda* of the Bhāṭṭa-s, see K. K. Raja's *Indian Theories of Meaning* (Adyar Library Series ९९, १९६३).
९ स्थानीया] See the *Avaloka* on I.९ and Bh.Nṛ.'s comments thereon.
१० मूला] T.MS. reads *asaṃbhavamūlā*, and M.G.T. as *anusaṃbhavamūlā*.
१० तो] *vākyāntara-* seems to stand for *kāvyavākyād itarad vākyam*. A.T.A. (of *Avaloka*) reads *vādyantara-*, etc. Bh.Nṛ's comment however shows *vākyāntara-*, etc. See also Note २८४ to *Daśarūpāvaloka*.
१५ *] A.T.A. gives *tathā hi* instead of *yathā Kumārasaṃbhave* before the verse *vivṛṇvatī*, etc.

तिपादकः शब्दोऽत्र विद्यते। ततः कथमियं प्रतिपत्तिर्वाचकत्वमूला स्यादित्यर्थः। एवं वस्तुप्रतिपत्तेर्व्यञ्जकशक्तिमूलत्वमुक्त्वा संप्रत्यलंकारप्रतिपत्तेरप्याह तथालंकारेष्वपीति। अत्रोपमा व्यज्यमानोऽलंकार इत्याह इत्यादिष्विति। ननु चेयमर्थापत्तिमूला प्रतीतिः, न शक्त्यन्तरमूला यतो वाक्यस्य व्यञ्जकत्वनामा शक्तिः कल्पयितव्या भवेत्। तत्राह न चेति। हेतुमाह अनुपपद्यमानेति। यत्र हि दृष्टेनानुपपद्यमानेन केनचिदर्थेन स्वोपपादकतया किंचिदर्थान्तरमाक्षिप्यते सा खल्वर्थापत्तिः। अत्र तु वाक्यमेव किमप्यर्थान्तरं ध्वनति। न तत्प्रतीतोऽर्थः कश्चित्। न त्वनुपपद्यमानेनार्थेनाक्षिप्तोऽर्थः कश्चित्। अतः कथमियं प्रतीतिरर्थापत्तिर्भवेदिति। तर्हि स वाक्यस्यैव उद्देश्यतयार्थो भविष्यति। तत्राह नापीति। हेतुमाह व्यङ्ग्यस्येति। व्यञ्जनीयस्यार्थस्य पदार्थकक्ष्यां 210 तत्संसर्गकक्ष्यां च विहाय कक्ष्यान्तरविषयत्वादित्यर्थः। तस्य तृतीयकक्ष्याविषयत्वमेवोपपादयति तथा हीत्यादिना। § 2406

ननु तृतीयकक्ष्याविषयो ध्वन्योऽर्थो न संभवति। कुतः। अश्रूयमाणे ‘मास्य गृहे भुक्थाः’ इत्यर्थे तात्पर्यं येषां तेषां ‘विषं भुङ्क्ष्व’ इत्यादिवाक्यानां या तव तृतीयकक्ष्यात्वेनाभिमता सैव तात्पर्यार्थः प्रतीयते। न चात्र विषभोजनादिवाक्ये निषेधार्थस्य तात्पर्यविषयत्वं व्यञ्जकत्ववादिनापि नेष्यते। अत उभयवादिसिद्धत्वाद् विषभोजनादिवाक्ये तावन्निषेधस्यैव वाक्यार्थत्वं, न विधेः। तद्वद् वाक्यान्तरेष्वपि व्यङ्ग्यत्वेनाभिमतस्यैवार्थस्य वाक्यार्थत्वमित्यभिप्रायेणाह ननु चेति।* सिद्धायां हि द्वितीयकक्ष्यायां तत्र वाक्यस्य विश्रान्तौ पर्यवसिता द्वितीयकक्ष्येति व्यङ्ग्यार्थस्य तृतीयकक्ष्याविषयत्वं भवति। अविश्रान्तौ तु वाक्यस्य सैव निषेधकक्ष्येत्याह स्वार्थेति।* द्वितीयकक्ष्यायां विश्रान्तौ सत्यां

---

२ मुक्त्वा] Only M.G.T. reads *udghāṭya* instead of *uktvā*.
३ मानोऽलंकार] Others seem to take this verse as an instance of *rūpakadhvani*. Ānandavardhana, the author of the verse himself, says *rūpakadhvanir iti vyapadeśo*, etc. in connection with this verse. Hemacandra in his commentary on the *Kavyānuśāsana* says similarly.
७ मेव] The text is not very clear here. M.G.T. is corrupt. Gr.MS. reads *vākyam evamimapy arthāntaradhvanīti tatpratīto 'rthaḥ kaścit*. Tri.MS. reads *atra tu vākyam eva kim apy arthāntaraṃ dhvanati na tena tatpratīto 'rthaḥ kaścit*. T.MS. seems to read *atra tu vākyam eva kim apy arthāntara iti neti na tatpratīto 'rthaḥ kaścit. atha*, etc.
९ स] *sa* is found only in M.G.T. *eva* is missing in T.MS. and Gr.MS.
१९ *] All MSS. seem to read *na ceti*. But A.T.A. and the printed editions give *nanu ca*. So I preferred *nanu ceti*.
२१ *] All MSS. are corrupt here. Some read mere *svārthe*. And Bh.Nṛ.'s interpretation shows that the reading *tāvad āgatam* given in the previous editions is not correct. *tāvatā gatam* is the correct reading.

हि तीयकक्ष्या भवति। अविश्रान्तौ तु सा द्वितीयकक्ष्यैव या तृतीयकक्ष्या तवाभिमता भवतीत्यर्थः। द्वितीयकक्ष्यायां विधौ कथं क्रियाकारकसंसर्गानुपपत्तिः। तत्राह प्रकरणादिति। तर्हि रसवद्वाक्येष्वपि द्वितीयकक्ष्यायामेव रसावगमोऽस्तु। तत्राह रसवद्वाक्येष्विति। अप्रतिष्ठमिति। दं वाक्यं स्वार्थे संसर्गकक्ष्यायामविश्रान्तम्, अत एवाप्रतिष्ठं यत्परतां विगाहते तत्रैव तत्परता न्याय्येति। यत्र त्विति। यत्र तु स्वार्थे क्रियाकारकसंसर्गकक्ष्यायां विश्रान्तं तावता प्रतिष्ठां गतं तद् वाक्यमुपर्यपि प्रसर्पति तत्र सर्वत्र ध्वनिरेवेति स्थितिरिति। तत्र च व्यङ्ग्ये रसानां सर्वदा व्यङ्ग्यत्वम्। वस्त्वलंकारयोस्तु तत् क्वाचित्कमित्याह तत्र चेति। तयोः क्व ध्वनित्वं भवति। क्व वा न भवति। तत्राह तत्रापीति। व्यङ्ग्यत्वस्य क्वाचित्कत्वेऽपीत्यर्थः। यत्रार्थ इति। यत्रार्थः शब्दो वा तादृशमर्थं स्वं चार्थं चोपसर्जनीकृत्य व्यङ्क्तः तत् काव्यं ध्वनिरिति सूरिभिः कथितमिति। यत्र तु अन्यवाक्यार्थे प्रधाने गुणीभवन्ति रसादयः तत्र ते रसादयोऽलंकारा एव भवन्ति। न तु व्यङ्ग्या इति। एवंविधस्य ध्वनेः वाच्यार्थस्य विवक्षितत्वाविवक्षितत्वाभ्यां द्वैविध्यं भवति। तयोरविवक्षितवाच्योऽपि ध्वनिः अत्यन्ततिरस्कृतवाच्यार्थत्वेन, तदभावेऽप्यर्थान्तरसंक्रमित- 211
वाच्यार्थत्वेन च द्विविधो भवति। अन्योऽपि विवक्षितवाच्यश्च द्विविधो भवति लक्ष्यक्रमोऽलक्ष्यक्रमश्चेति। तत्र विभागे रसादीनां प्राधान्येन प्रतिपत्तौ सत्यामसंलक्षितक्रमत्वम्। अङ्गत्वेन प्रतिपत्तौ सत्यां रसवन्नामालंकार इत्याह तस्य चेत्यादिना। § 2407

अत्रोच्यते— § 2408

...37 वाच्या प्रकरणादिभ्यो बुद्धिस्था वा यथा क्रिया।
वाक्यार्थः कारकैर्युक्ता स्थायी भावस्तथेतरैः॥ ३७॥
§ 2410

यथा लौकिकवाक्येषु श्रूयमाणक्रियेषु गामभ्याज इत्यादिष्वश्रूयमाणक्रियेषु च द्वारं द्वारम् इत्यादिषु स्वशब्दोपादानात् प्रकरणादिवशाद्वा बुद्धि- संनिवेशिनी क्रियैव कारकोपचिता वाक्यार्थस्तथा काव्येष्वपि स्वश-

---

७ ता] All MSS. are corrupt here. Some read mere *svārthe*. And Bh.Nṛ.'s interpretation shows that the reading *tāvad āgatam* given in the previous editions is not correct. *tāvatā gatam* is the correct reading.

९ मित्याह] Thus according to Bh.Nṛ. *tara ca* should be the reading in place of *evaṃ sarvatra* found in print as well as in MSS.

९ नित्वं] One MS. gives as *kva vyaṅgyatvaṃ bhavati,* another as *kvāpy aṅgatvam,* and the third is corrupt.

ब्दोपादानात् क्वचित् प्रीत्यै नवोढा प्रिया इत्येवमादौ क्वचिच्च प्रकरणादिवशात् संनिहिताभिहितविभावाद्यविनाभावाद्वा साक्षाद् भावकचेतसि विपरिवर्तमानो रत्यादिः स्थायी स्वस्वविभावानुभावव्यभिचारिभिस्तत्तच्छब्दोपनीतैः संस्कारपरंपरया परां प्रौढिमानीयमानो वाक्यार्थः। न चापदार्थस्य वाक्यार्थत्वं नास्तीति वाच्यम्। कार्यपर्यवसायित्वात् तात्पर्यशक्तेः। तथा हि—पौरुषेयमपौरुषेयं वा सर्वं वाक्यं कार्यपरम्। अतत्परत्वेऽनुपादेयत्वादुन्मत्तादिवाक्यवत्। काव्यशब्दानां चान्वयव्यतिरेकाभ्यां निरतिशयसुखास्वादव्यतिरेकेण [एव, न तु सर्वथा] प्रतिपाद्यप्रतिपादकयोः प्रवृत्तिविषयप्रयोजनान्तरानुपलब्धेः। काव्यशब्दानां च स्वानन्दोद्भूतिरेव कार्यत्वेनावधार्यते। तदुद्भूतिनिमित्तत्वं च विभावादिसंसृष्टस्य स्थायिन एवावगम्यते। अतो वाक्यस्याभिधाशक्तिस्तेन तेन रसेनाकृष्यमाणा तत्तत्स्वार्थापेक्षितावान्तरविभावादिप्रतिपादनद्वारा स्वपर्यवसायितामानीयते। तत्र विभावादयः पदार्थस्थानीयास्तत्संसृष्टो रत्यादिर्वाक्यार्थः। तदेतत् काव्यंवाक्यपदीयम्। ताविमौ पदार्थवाक्यार्थौ। न
212 चैवं सति गीतादिवत् सुखजनकत्वेऽपि वाच्यवाचकभावानुपयोगः। विशिष्टविभावादिसामग्रीविदुषामेव तथाविधरत्यादिभावनावतामेव स्वादोद्भूतेः। तदनेनातिप्रसङ्गोऽपि निरस्तः। ईदृशे च वाक्यार्थनिरूपणे परिकल्पिताभिधादिशक्तिवशेनैव समस्तवाक्यार्थावगतेः शक्त्यन्तरपरिकल्पनं प्रयासः। यथावोचाम काव्यनिर्णये—

*तात्पर्यान्तरिते वाक्ये व्यञ्जकत्वं न च ध्वनिः।
किमुक्तं स्यादश्रुतार्थतात्पर्येऽन्योक्तिरूपिणि॥ § 2413

विषं भक्षय पूर्वोऽयं समौ तत्परतादिषु।
प्रसज्यते प्रधानत्वाद् ध्वनित्वं केन वार्यते॥ § 2415

ध्वनिश्चेत् स्वार्थविश्रान्तं वाक्यमर्थान्तराश्रयम्।
तत्परत्वं त्वविश्रान्तौ तत्र विश्रान्त्यसंभवात्॥ § 2417

एतावतैव विश्रान्तिस्तात्पर्यस्येति किं कृतम्।

---

१ मादौ] नागा० ३।४
२ शात्] N.S.P. *niyatāvihita-*, etc.
४ मानो] N.S.P. *ratyādivākyārthaḥ*.
१३ काव्यं] N.S.P. *kāvyavākyaṃ yadīyaṃ tāv imau*. See Note २३१a to *Laghuṭīkā*. According to Bh. Nr.'s comments, the reading available in previous editions is not correct. See Prof. Raghavan's work on *Ś.P.* (१९६३), p. १६८.
१७ थावोचाम] A.T.A. seems to read here *vakṣyāmaḥ* instead of *avocāma*.
१९ *] See *Laghuṭīkā* and the notes in the context, and the Introduction.

यावत्कार्यप्रसारित्वात् तात्पर्यं न तुलाधृतम्॥ § 2419

भ्रमधार्मिकविश्रब्धमिति भ्रमिकृतास्पदम्।
निर्व्यापृति कथं वाक्यं निषेधमुपसर्पति॥ § 2421

प्रतिपाद्यस्य विश्रान्तिरपेक्षापूरणाद् यदि।
वक्तुर्विवक्षिताप्राप्तेरविश्रान्तिर्न वा कथम्॥ § 2423

पौरुषेयस्य वाक्यस्य विवक्षापरतन्त्रता।
वक्त्रभिप्रेततात्पर्यमतः काव्यस्य युज्यते॥ § 2425

इति। § 2426

अतो न रसादीनां काव्येन सह व्यङ्ग्यव्यञ्जकभावः। किं तर्हि ? भाव्यभावकसंबन्धः। काव्यं हि भावकम्। भाव्यास्तु रसादयः। ते हि स्वतोऽभवन्त एव भावकेषु विशिष्टविभावादिमता काव्येन भाव्यन्ते। न चान्यत्र 213 शब्दान्तरेषु भाव्यभावकलक्षणसंबन्धाभावात् काव्यशब्देष्वपि तथा भाव्यमिति वाच्यम्। भावनाक्रियावादिभिस्तथाङ्गीकृतत्वात्। किं च मा वान्यत्र तथास्तु। अन्वयव्यतिरेकाभ्यामिह तथावगमात्। तदुक्तम्—

भावाभिनयसंपन्नान् भावयन्ति रसानिमान्।
यस्मात् तस्मादमी भावा विज्ञेया नाट्ययोक्तृभिः॥* § 2429

इति। § 2430

कथं पुनरगृहीतसंबन्धेभ्यः शब्देभ्यः स्थाय्यादिप्रतिपत्तिरिति चेत्, लोके तथाविधचेष्टायुक्तस्त्रीपुंसादिषु रत्याद्यविनाभावदर्शनादिहापि तथोपनिबन्धे सति रत्याद्यविनाभूतचेष्टादिप्रतिपादकशब्दश्रवणादभिधेयाविनाभावेन लाक्षणिकी रत्यादिप्रतिपत्तिः। यथा च काव्यार्थस्य रसभावकत्वं तथाग्रे वक्ष्यामः। § 2431

तमिमं पक्षं निराकारोति अत्रोच्यत इति। वाच्येति। द्विधा हि संनिधिः। निरन्तरपाठेन बुद्धिस्थितिर्वा प्रकरणादिभ्यो वा। अन्यतरन्यायेन बुद्धिस्थिता क्रिया यथा कारकैर्युक्ता वाक्यार्थस्तथेतरैर्विभावादिभिर्युक्तः स्थायी भावो रत्यादिर्वाक्यार्थो भवतीत्यर्थः। तथैव व्याचष्टे यथेत्यादिना। द्वारं द्वारमित्यादिष्विति। तत्र ह्यश्रुतापि क्रिया प्रकरणादिवशाद् विव्रियतां संव्रियतामित्यध्याहृता बुद्धिसंनिवेशिनी वाक्यार्थो भवति। तथा काव्येष्वपि 'प्री-

१५ न्नान्] N.S.P. *saṃbandhān*.
१६ *] ना० शा० [GOS] ६।३४
२१ त्तिः] N.S.P. *pratītiḥ*.

त्यै नवोढा प्रिया’ * इत्यादौ स्वशब्दोपादानात्=स्वेन वाचकशब्देनोपादानं
यस्य तत् स्वशब्दोपादानं तस्मात्, क्वचित् तद्विरहेऽपि प्रकरणादिवशात्
संनिहितविभावाद्युपादानाद्वा भावकचेतसि विपरिवर्तमानः स्थायी भावः स्व-
स्वविभावादिसंयोगात् परां प्रौढिमानीयमानो वाक्यार्थो भवति। प्रौढिगम-
नप्रकारकथनं संस्कारपरंपरयेति। विभावैः कश्चित् संस्कार उपनीयते।
कश्चिदनुभावैः कश्चित् सात्त्विकैः। कश्चिद् व्यभिचारिभिरिति परंपरा। त-
214 दिदमाह तथेत्यादिना। ननु चेतरैः पदार्थैर्विशिष्टः कश्चित् पदार्थ एव हि
वाक्यार्थो भवति। रसस्तु कस्य पदस्यार्थः, येन वाक्यार्थो भवेत्। तत्राह न
चेति। हेतुमाह कार्येति। पौरुषेयमिति। आपाततस्तथा प्रतिभासाभावेऽपि
सर्वं पौरुषेयमपौरुषेयं वा वाक्यं कार्यपरमेव। अतत्परत्वे सति उन्म-
त्तवाक्यवदनुपादेयत्वप्रसङ्गादित्यर्थः। काव्यशब्देष्वन्वयव्यतिरेकाभ्यां किंचित्
कार्यं नावगम्यत इति चेत् तत्राह काव्यशब्दानां चेति। प्रतिपाद्यप्रतिपादक-
योरिति। यः प्रतिपाद्यः पुरुषो यश्च तत्प्रतिपादकः, उभयोरपि प्रवृत्तिविषयग-
तस्य प्रयोजनान्तरस्य नावगतेरिति। यदि प्रयोजनान्तरं नावगम्यते तर्हि किं
क्रियतामित्यत्राह काव्यशब्दानां चेति। यदि सर्वथान्विष्यमाणं प्रयोजनं न
लभ्येत तर्हि नास्तीति निश्चीयते। लभ्यते तु काव्यशब्दानां परमानन्दास्वादः
प्रयोजनम्। अतः काव्यानि प्रयोजनरहिततया न निश्चीयन्त इत्यर्थः। ननु
विभावादिप्रतिपादकानां वाक्यानां विभावादिरेव वाक्यार्थः। अतः कथं रस-
स्य वाक्यार्थत्वम्। तत्राह तदुद्भूतिनिमित्तत्वं चेति। विभावादिप्रतिपादकानाम-
पि वाक्यानां रसोद्देशेन प्रयुक्तानां पदार्थस्थानीयविभावादिप्रतिपादनमवान्त-
रव्यापारीकृत्य रसपरत्वमेव भवतीत्यर्थः। तदेतत् काव्यं वाक्यपदीयमिति*।

---

१ पि] The following is the complete verse: dṛṣṭā dṛṣṭim adho dadhāti, kurute nālāpam ābhāṣitā śayyāyāṃ parivṛtya tiṣṭhati balād āliṅgitā vepate | niryāntīṣu sakhīṣu vāsabhavanān nirgantum evehate jātā vāmatayaiva me ’dya sutarāṃ prītyai navoḍhā priyā || (*Nāgānanda*, III.४)

१ *] (नागा° ३।४)

१३ पि] M.G.T. alone reads *pravṛttiviśeṣagatasya*.

१५ त्राह] In N.S.P. and A.T.A *kāvyaśabdānāṃ ca* is found (in the *Avaloka*) only once in connection with the previous *pratīka*. All MSS. of the *Laghuṭīkā* give this twice. Perhaps according to Bh.Nṛ. this was a separate sentence running as *kāvyśabdānāṃ ca svānandodbhūtir eva kāryatvenāvadhāryate*.

२१ *] Here Dhanika seems to apply ingeniously the expression of the well-known work of Bhartṛhari to the *kāvya*. The significance is explained well by Bh.Nṛ. the commentator. Previous editions do not show this word in the *Avaloka*. But A.T.A. gives it very clearly. Perhaps Dhanika had admiration for the *Vākyapadīya* from which he cited, as an authority, a *kārikā* under IV.२.

रसप्रतिपादकं काव्यमुद्देश्यतया वाक्यार्थीभूतरसप्रतिपादकतया वाक्यं भवति। रसं प्रति पदार्थीभूतविभावादिप्रतिपादकतया पदमपि भवति। तेन काव्यं वाक्यस्थानीयं पदस्थानीयं चेत्यर्थः। ननु काव्यं चेद् रसोत्पादकं तर्हि काव्यश्राविणां गीतादिश्राविणामिव तिरश्चामपि रसोत्पत्तिप्रसङ्गः। तत्राह न चैवं सतीति। विशिष्टविभावादीति। अत्र यथा सहृदयानामेव रसप्रतिपत्तिर्भवति तादृशं विशेषमभिप्रैति। ननु रसप्रतीतिं प्रति कारणं पदार्थीभूतविभावादिप्रतिपत्तिरति चेत् तर्हि विभावादिसंसृष्टस्थायिभावभावनातः पूर्वमपि [] रसोत्पत्तिप्रसङ्गः। [तत्राह तथाविधरत्यादिभावनावतामेवेति। एवं] तदनन्तरमेव रसोत्पत्तिरिति चेत् तर्हि श्रोत्रियाणामपि रसोत्पत्तिप्रसङ्गः। [तत्राह तदनेनातिप्रसङ्गोऽपि निरस्त इति। तेषां तथाविधरत्यादिभावनारहितत्वादिति भावः।] ईदृशे चेति। उद्देश्यतया रस एव वाक्यार्थ इति यादृशमेतन्निरूपणम्, ईदृशे च निरूपणे सति लौकिकवाक्यपरिकल्पितशक्तिभ्यः काव्यवाक्येषु 215 व्यञ्जकत्वापरपर्यायस्य शक्त्यन्तरस्य परिकल्पनं प्रयासमात्रमित्याह ईदृशे चेत्यादिना। § 2432

तात्पर्यान्तरितेतिOf these seven kārikās cited by Dhanika from his Kāvyanirṇaya, which is not available, some of the lines presented previously a number of problems and difficulties in offering correct and exact interpretations, as correct readings could not be seen in print. Many subsequent writers who had occasions to refer to these verses, quoted one or two of these verses which did not present any problems, and never touched difficult and problematic lines according to their habit of skipping over, as one may guess in the case of many other difficult portions of the Avaloka. Here again it is Bhaṭṭanṛsiṃha whose brilliant commentary throws some welcome light.

५ त्राह] The MSS. in this place are corrupt. Only M.G.T. reads *viśṣṭavibhāvād ity atra yathā sahṛdayānām eva rasapratipattir bhavati tādṛśam viśeṣam abhipraiti,* and before that *evaṃ ca sati* (instead of *na caivaṃ sati*) which is not found either in printed texts or in A.T.A. Subsequently some fragmentary expressions are found in T.MS. and Gr.MS. together with a blank space here and there on the line. The line given here is my own surmise.

७ ति] T.MS. gives only from here. The preceding portion within square brackets is reconstructed by me on the basis of the fragmentary expressions available.

According to this pratīka, the first verse should have this expression in the beginning, and not tātparyānatirekā ca, as given in N.S.P. and other previous editions. Many scholars have reproduced incorrect readings from N.S.P. in this context. See, for instance, Prof. Raghavan's work on S.P. (१९६३), page १८३, and compare the portion with the one now given. A.T.A. also confirms this pratīka and gives the verse as shown by me in the text now. The following is to be, it appears, the proper construing: tātparyāntarite vākye vyañjakatvaṃ na ca dhvaniḥ=tātparyāntargate vākye=bhrama dhārmiketyādau, yat vyañjakatvam abhimataṃ (tava) sa ca dhvanir iti na pṛthak kaścid asti; kiṃ tu tat tātparyāntargatam eva.। काव्यवाक्येषु द्वितीयां तात्पर्यकक्ष्यामुल्लङ्घ्य तृतीयकक्ष्यायां व्यञ्जकत्वापरपर्यायं ध्वनिर्नाम शक्त्यन्तरमस्तीति चोदितं निराकरोति न चेति। हेतुमाह किमुक्तं स्यादिति। [अश्रुतार्थतात्पर्येऽन्योक्तिरूपिणि=] अश्रुते 'मास्य गृहे भुक्थाः' इत्यर्थे तात्पर्यं यस्य विषभोजनादिवाक्यस्य, अन्योक्तिरूपिणि तस्मिंस्तात्पर्यपर्यवसायिन्यपि ध्वनित्वप्रसङ्गे [किमुक्तं स्यात्=] कः परिहार इत्यर्थः। तस्मादविभागेन [त्वदभिमत]ध्वनिरहिते तद्वति वा वाक्ये व्यञ्जकत्वाविशेषे ध्वनिप्रसङ्ग इत्याह विषं भक्षयेतिThe third line of these verses given in the previous editions is: viṣaṃ bhakṣaya pūrvo yaś caivaṃ parasutādiṣu the meaning of which was not clear, and consequently I suggested some emen- dations to this and other lines in my paper on the Daśarūpaka, published

१७ चोदितं] All MSS. read here *ced iti*. Perhaps it should be *coditam*.

१७ रोति] The *pratīka* again cited here as *na ceti* is confirmed by A.T.A. So, it should not read as *vyañjakatvasya na dhvaniḥ* given in previous editions and quoted by all modern writers as such.

१९ अन्योक्तिरूपिणि] This expression *anyokti* was used by Dhanika before also under I.१४. See Bh.Nṛ's commentary thereon and Note ४७. Here it does not seem to be the same *anyokti*, but it seems to be in the sense of *anyasya=tātparyaviṣayāt niṣedhād itarasya vidheḥ, uktiḥ=kathanaṃ, yatra sā anyoktiḥ*.

in the Journal of the University of Gouhati, १९६०, pp. १२५-४५. Unfortunately Bh.Nṛ. does not use the full line in the course of his comments. A.T.A., on the other hand, which agrees in many other places with the pratīkas cited by Bh.Nṛ., gives here the following reading: viṣaṃ bhakṣaya pūrvo'yaṃ samānaḥ paśutādiṣu which again is not clear. On the basis of the comments of Bh.Nṛ. and the context of discussion, and on the basis of the resembling syllables in the A.T.A. reading I thought that the line might be uiṣam bhakṣaya pūrvo 'yaṃ samau tatparatādiṣu in the sense to be conveyed by having the sentences thus: (१) viṣaṃ bhakṣaya is to be connected with the previous line aśrutārthatātparye ' nyoktirūpiṇi viṣaṃ bhakṣayeti vākye kim uktaṃ syāt? (२) The next sentence will be: pūrvaḥ=tvadabhimatadhvaniḥ, ayam=viṣaṃ bhakṣaya iti prayogaś ceti dvāv api, tatparatādiṣu=tatparatādiviṣaye=aśrutārthaparatādiviṣaye, samau=tulyayogakṣemau.। प्रधानत्वादिति। प्राधान्ये हि ध्वनित्वमप्राधान्ये तदभाव इत्युक्तम्। इह तु प्राधान्यमेवास्ति। अतो ध्वनित्वं प्रसज्यत इत्यर्थः। शङ्कते ध्वनिश्चेदिति। वाक्यं स्वीये संसर्गार्थे विश्रान्तमुपर्यपि प्रसर्पति चेद् ध्वनिर्भवति। अविश्रान्तौ तु तात्पर्यमेव भवति। [तत्र विश्रान्त्यसंभवादिति] तत्र=स्वार्थे विषभोजनादिवाक्यानां विश्रान्त्यसंभवादिति विभाग इति। परिहरति एतावतैवेति। एतावन्मात्रेणैव तात्पर्यं पर्यवस्यतीति कस्य न्यायस्य विषयोऽयमित्यर्थः। यदुद्देशेन वाक्यं प्रयुक्तं तदवधि प्रसरति

२२ नित्वं] This use of *prasajyate* is also confirmed by A.T.A. So it should be the reading, and not *prasahyate* or anything else.
२४ त्र] From these and previous comments of Bh.Nṛ. it appears that the line should read: dhvaniś cet svārthaviśrāntaṃ vākyam arthāntarāśrayam | tatparatvaṃ tv aviśrāntau tara viśrānty asaṃbhavāt || A.T.A. however gives here an incorrect reading of the second half as *tatparatvaṃ ca viśrāntau tanna viśrānty asaṃbhavāt* whereas N.S.P. reads *tatparatvaṃ tv aviśrāntau, tanna*, etc. (This perhaps may be justified.)
२५ ति] *etāvataiva* is the *pratīka* and it is clear in all the MSS. and in A.T.A. B.M. also gives this verse with this reading alone. So *etāvaty eva* does not seem to be original.
२६ दुद्देशेन] The T.MS. very unfortunately stops here.

तद् वाक्यम्। उद्देश्यार्थ एव तात्पर्यार्थः। कथं स मध्ये पर्यवस्यतीत्यर्थः। स्वार्थविश्रान्तौ ध्वनिरिति यदुक्तं स्वार्थे विश्रान्तस्य वाक्यस्य तृतीयकक्ष्यावर्तित्वे ध्वनिरिति तदपि दूषयति भ्रमधार्मिकेति। भ्रमधार्मिकेति वाक्यं संसर्गार्थे विधीयमाने भ्रमे सति विश्रान्तमुपरि यदि न व्याप्रियते [तर्हि] स व्यङ्ग्यो निषेधः कथं शाब्दः स्यादित्यर्थः। पुनरपि शङ्कते प्रतिपाद्यस्येति। प्रतिपाद्यपुरुषाकाङ्क्षया हि प्रतिपादको वाक्यं प्रयुङ्क्ते। सा तु तस्याकाङ्क्षा ध्वनिवाक्येषु मध्ये विश्रान्तैव भवति। अतस्तात्पर्यपर्वणि पर्यवसितान्येव तानि वाक्यानीत्यर्थः। दूषयति वक्तुरिति। वक्तापि खलु कमप्यर्थमुद्दिश्य वाक्यं प्रयुङ्क्ते। तदुद्देश्यार्थाप्राप्तौ कथमिव तद् वाक्यं विश्रान्तं भवेदित्यर्थः। ननु सर्वत्र वाक्ये वक्ता नास्ति। अपौरुषेयस्यापि वाक्यस्य संभवात्। तत्राह पौरुषेयस्येति। काव्यवाक्यं खलु पौरुषेयम्। तेन तत्र सर्वत्र वक्तास्ति। ततस्तदुद्देश्यार्थपर्यवसायित्वं तेषां युज्यत एवेत्यर्थः। § 2433

भाव्यभावकसंबन्ध इति। ननु तात्पर्यादधिकं व्यञ्जकत्वं निषेधयतः संबन्धान्तराङ्गीकरणं व्याहतमिव। उच्यते। कमप्यर्थमुद्दिश्य खलु सर्वोऽपि वक्ता वाक्यं प्रयुङ्क्ते। अतः काव्यवाक्येषु कथं सामाजिकानां रसास्वादो भवेदिति तानि प्रयुञ्जानस्य कवेस्तात्पर्यं, रसप्रतीतिश्च सामाजिकानां शब्दाद् भवति। तेन [अस्यां] भावनायां सामाजिकः कर्ता। करणं शब्दाः। भाव्यो रसादिः। अतो वक्तुस्तात्पर्यमेव [तदीयकाव्यद्वारा] सामाजिकानां [रसस्य] भावकत्वेन निरूप्यते। न तु संबन्धान्तरमङ्गीक्रियत इति। ननु लोके शब्दान्तरेषु भाव्यभावकलक्षणः संबन्धो न दृष्ट इति चेत्। तत्राह न चेति। हेतुमाह भावनाक्रियावादिभिरिति। स्वर्गकामो यजेतेत्यत्र भाव्यं स्वर्गादिफलप्। भावको यजमानः। करणं यागादय इति फलयागयोः भाव्यभावकसंबन्धो भावनैवात्र । क्रियेति वदद्भिरङ्गीकृत एवेत्यर्थः। यद्वा, अन्यत्र सत्ताकारणमन्वयव्यतिरेकौ। ताविहापि भवतश्चेत् ताभ्यामेवालम्। किमन्यत्र तत्सत्तागवेषणयेत्याह मा वान्यत्रेति। मूलभरतस्यापीदमनुमतमित्याह भावाभिनयसंपन्नानिति।* रङ्गेष्वनुकार्यगतसुखदुःखादिभावाभिनयेन नटगतेन

---

४ न] This explanation shows that the reading *nirvyāpṛti* found in A.T.A. was what Bh.Nṛ. too had. N.S.P. reads *nirvyāuṛtti* which is thus definitely wrong. See Prof. Raghavan's *Bhoja's Śṛṅgāra Prakāśa* (१९६३), p. १८३.
१७ तेन] M.G.T. shows *tenābhāvanāyām*; perhaps it was intended as *tena asyāṃ bhāvanāyām*.
२२ योः] Only M.G.T. reads *bhāṭṭaiḥ bhāvyabhāvakalakṣaṇasaṃbandhaḥ*, and here again *bhāṭṭaiḥ* in the transcript is underlined with red ink. Perhaps it was done later while comparing.
२६ *] Only Gr.MS. reads *bhāvābhinayasaṃbandhān*. In the G.O.S. ed. of the *NS.* (vol. I, २nd ed., page २९३) the reading is *nānābhinayasaṃbaddhān*

जन्यान् रसान् सामाजिका यद् भावयन्ति तेन तज्जनका भावाः। तस्माद् रसस्य रसजनकानां च संबन्धो भाव्यभावकलक्षण एवेत्यर्थः। § 2434

ननु नायकादिशब्दानां स्वाभिधेयैर्नायकादिभिरेव संबन्धः। रत्यादिभिः सह न संबन्धोऽस्ति। अगृहीतसंबन्धानि च पदानि रत्यादीन् प्रतिपादयिष्यन्ती- त्येतदतिप्रसङ्गकमिति पृच्छति कथं पुनरिति। उत्तरं लोक इति। लोके रत्यादियुक्तानां यथाविधाश्चेष्टा भवन्ति कविरपि तथाविधाश्चेष्टा दृष्ट्वा काव्येष्वपि रत्याद्युद्दिशन् ताश्चेष्टा निबध्नाति। तस्माच्चेष्टादिप्रतिपादकानां शब्दानां तदविनाभूतरत्यादिप्रतियपादने तात्पर्यम्। अतः काव्यपदानां रत्यादौ वृत्तिर्लक्षणा स्वाभिधेयचेष्टाद्यविनाभूतरत्यादिप्रतीतेरिति। भवतु काव्यस्य रसस्य च भाव्यभावकलक्षणः संबन्धः। तेषां तद्भावकत्वप्रकारो वक्तव्य इति चेत् तत्राह यथा चेति। § 2435

...38 रसः स एव स्वाद्यत्वाद् रसिकस्यैव वर्तनात्। 217
नानुकार्यस्य वृत्तत्वात् काव्यस्यातत्परत्वतः॥ ३८॥
§ 2437

...39 द्रष्टुः प्रतीतिव्रीडेर्ष्यारागद्वेषप्रङ्गतः।
लौकिकस्य स्वरमणीसंयुक्तस्येव दर्शनात्॥ ३९॥
§ 2439

काव्यार्थोपप्लावितो रसिकवर्ती रत्यादिः स्थायी भावः स इति निर्दिश्यते। स च स्वाद्यतां निर्भरानन्दसंविदात्मतामापाद्यमानो रसः। रसिकवर्ती वर्तमानत्वात्; नानुकार्यरामादिवर्ती वृत्तत्वात्तस्य। अथ शब्दोपहितरूपत्वेनावर्तमानस्यापि वर्तमानवदवभासनमुच्यते। तथापि तदवभासस्यास्मदादिभिरनुभूयमानत्वादसत्समतैव स्वादं प्रति। विभावत्वेन तु रामादेर्वर्तमानवदवभासनमिष्यत एव। किं च न काव्यं रामादीनां रसोपजननाय कविभिः प्रवर्त्यते। अपि तु सहृदयानानन्दयितुम्। स च समस्तभावकस्वसंवेद्य एव। यदि चानुकार्यस्य रामादेः शृङ्गारः स्यात् ततो नाटकादौ तद्दर्शने लौकिक इव नायके शृङ्गारिणि स्वकान्तासंयुक्ते दृस्यमाने शृङ्गारवानयमिति प्रेक्ष-

---

and it is so according to Abhinava's interpretation *nānābhinayaiḥ samyag baddhān hṛdayaṃ gatān bhāvayantī saṃpādayanti rasāṃs tasmād bhāvāḥ.*

९ त्यादौ] All MSS. read *vṛttilakṣaṇā.*
९ णा] MSS. seem to read *svābhidheyaceṣṭādyavinābhūte ratyādau pratīter iti.*

काणां प्रतीतिमात्रं भवेत्, न रसिकानां स्वादः। सत्पुरुषाणां च लज्जेतरेषां त्वसूयानुरागापहारेच्छादयः प्रसज्येरन्। एवं च सति रसादीनां व्यङ्ग्यत्वमपास्तम्। अन्यतो लब्धसत्ताकं वस्त्वन्येनाभिव्यज्यते। प्रदीपेनेव घटादि। न तु तदानीमेवाभिव्यञ्जकत्वाभि- मतैरापाद्यस्वभावम्। भाव्यन्ते च विभावादिभिः प्रेक्षकादिषु रसा इत्यावेदितमेव। § 2440

रसः स एवेति स स्थायी भाव एव रसः। तस्यैव स्वाद्यत्वात्। स च सामाजिकेष्वेव वर्तते। तेषामेव वर्तमानत्वात्। नानुकार्ये रामादौ। तस्यातीतत्वात्। काव्यस्य तत्र तात्पर्याभावाच्च। न हि रामादयः कथं रसिकाः स्युरिति कवयः काव्यं निर्मिमते। किं तर्हि ? सामाजिकाः कथं रसभाजो भवेयुरिति। किं च स्वस्त्रीसंयुक्तपुरुषचेष्टादर्शनात् लौकिकस्येव पुरुषस्य क-
218 विना रामसीतादिवृत्तान्तकथनेन श्रोतुः प्रतीतिव्रीडेर्ष्यारागद्वेषादयः प्रसजेयुः। तस्मादपि नानुकार्ये स वर्तत इत्यर्थः। तथा व्याचष्टे काव्यार्थेति। *तद्वृत्तनिर्देशयोग्यं प्रकृतं किंचिदपश्यन्तं प्रत्याह काव्यार्थोपप्लाविति इति। काव्यशब्दानां साक्षात्तत्संबद्धमर्थमपश्यन्तं प्रत्युक्तम् उपप्लावित इति। प्रकृतत्वप्रकारकथनं रसिकवर्तीति। ननु शब्दोपहितानामेवालम्बनादिभाव इत्युक्तम्। तच्च रूपं वर्तमानमेवेति चोदयति अथेति। परिहरति तथापीति। यद्यपि नायकादीनां शब्दोपहितरूपाणामेवालम्बनादिभाव इत्युक्तम्। तच्च रूपं वर्तमानमेव। तथापि तस्य रूपस्य रसानुभवं प्रत्यसत्समतैव। रसानुभवितृत्वमेव ह्यनुकार्यस्य निषिध्यते। सामाजिकानां च विधीयते। तदनुभवितरि शाब्दे रूपे विद्यमानेऽपि तस्य रसास्वादं प्रति नोपयोगः। नायकादिभावं प्रत्युपयोगोऽस्त्येव। न हि तत्र [=नायकादिभावे] चेतनत्वेन भवितव्यमिति। तदिदमुक्तं स्वादं प्रत्यसत्समतैवेति। लौकिकस्य तात्पर्यस्यैव काव्येषु भाव्यभावकलक्षणसंबन्धद्वारेण निर्वाहे व्यञ्जकत्वं नाम शक्त्यन्तरं काव्यशब्दानां नाङ्गीकर्तव्यमित्याह एवं चेति। किं च यद् व्यज्यते लोके तदन्यतो लब्धसत्ताकं भवति। मृदादिभिरिव घटादि। इह तु शब्द एव रसमुत्पादयति

---

१ न] N.S.P. *na rasānāṃ svādaḥ* in place of *na rasikānām svādaḥ*(of A.T.A.).
७ सामाजिकेष्वेव] Bh.Nṛ., the commentator on the *Sarasvatīkaṇṭhābharaṇa* seems to hold a different view. He says *pātragata eva mukhyo rasaḥ. sāmājike rasikaśabdas tu gauṇaḥ*. See the extract quoted by Prof. Raghavan on page ४२२, in his work *Bhoja's Śṛṅgāra Prakāśa* (ibid.). See also Note २५२ to *L.Ṭ.*
१२ *] *tadvṛttaṃ* means *tacchabdaḥ*, the demonstrative pronoun. See Note २७a to *L.Ṭ.*.
१९ मेव] Before *anukāryasya, rūpaṃ* is found in M.G.T. and Tri.MS. In Gr. MS. many lines are missing here.

व्यञ्जयति चेति दुर्वहमित्याह अन्यत इति। इयमनुपपत्तिर्भाव्यभावकलक्षणसंबन्धे नास्तीत्याह भाव्यन्ते चेति। § 2441

ननु च सामाजिकाश्रयेषु रसेषु को विभावः ? कथं सीतादीनां देवीनां विभावत्वे न विरोधः ? उच्यते— § 2442

...40 धीरोदात्ताद्यवस्थानां रामादिः प्रतिपादकः।
विभावयति रत्यादीन् स्वदन्ते रसिकस्य ते॥ ४०॥
§ 2444

...41ab ता एव च परित्यक्तविशेषा रसहेतवः। § 2445

न हि कवयो योगिन इव ध्यानचक्षुषा ज्ञात्वा प्रातिस्विकीं रामादीनामवस्थां इतिहासवदुपनिबध्नन्ति। किं तर्हि ? सर्वलोकसाधारण्यात् स्वोत्प्रेक्षाकृतसंनिधयो धीरोदात्ताद्यवस्थाः [तन्निबद्धाः] क्वचिदाश्रयमात्रदायिन्यो(?) *भवन्ति। तत्र सीतादिशब्दाः परित्यक्तजनकतनयादिविशेषाः 219
स्त्रीमात्रवाचिनः किमिवानिष्टं कुर्युः। § 2446

चोदयति ननु चेति। यद्यपि रसः सामाजिकाश्रयः, नानुकार्याश्रयः, तथापि विभावादीनां रूपं शब्दोपहितमेव न तु सीतादीनां प्रातिस्विकं रूपमिति किमर्थं निर्बध्यत इत्यर्थः। उत्तरं धीरोदात्ताद्यवस्थानामिति। अस्यार्थः— नायकेषु धीरोदात्ताद्यवस्था एव तद्वाचिनां शब्दानां प्रवृत्तिनिमित्तम्। तन्मात्रमेव रसाश्रयः। रसभाजः सामाजिकास्तु तां तां शब्दोपनीतामवस्थामासाद्य रसान् भावयेयुः। रसाश्रयत्वे तु प्रातिस्विकस्य विशिष्टस्य रूपस्य नोपयोग इति। तथा व्याचष्टे न हीति। योगिन इवेति। योगिनो ह्यतीतमनागतं च रूपं वर्तमानवत् पश्यन्ति। न च तद्वदालम्बनादीनां विशिष्टरूपमपि दृष्ट्वा इतिहासादिवत् तदाश्रयं रसं वर्णयितुं काव्यानि कवयो निबध्नन्तीत्यर्थः। § 2447

किमर्थं तर्ह्युपादीयन्त इति चेदुच्यते— § 2448

---

१ चेति] Tri.MS. reads *durbhaṇam ity āha.*
२ न्धे] MSS. are corrupt here. M.G.T. reads: *bhāvyabhāvakalakṣaṇasaṃbandho 'stīty āha.* Tri.MS. reads *bhāvyabhāvakalalakṣasaṃbandhadvāreṇa nāstīty āha.*
९ *] N.S.P. *dadhati* in place of *bhavanti.*

...41cd क्रीडतां मृण्मयैर्यद्वद् बालानां द्विरदादिभिः॥ ४१॥
§ 2449

...42ab स्वोत्साहः स्वदते तद्वच्छ्रोतॄणामर्जुनादिभिः। § 2450

एतदुक्तं भवति। नात्र लौकिकशृङ्गारादिवत् स्त्र्यादिविभावादीनामुपयोगः। किं तर्हि ? प्रतिपादितप्रकारेण [उपयोगः]। लौकिकरसविलक्षणत्वात् नाट्यरसानाम्। यदाह—अष्टौ नाट्यरसाः स्मृताः इति।* § 2451

शङ्कते किमर्थमिति। यदि सीतादीनां विशिष्टे रूपे नापेक्षा किमर्थं तर्हि तेन रूपेण युक्ताः सीतादय उपादीयन्त इति। उत्तरम् उच्यत इति। यदि सीतादीनां स्वरूपेण नोपयोगः कथं तदाश्रयो रसो भवेत्। न ह्यसत्यपि सीतादौ तदाश्रयः शृङ्गारादिर्दृष्ट इति मन्वानं प्रत्याह एतदुक्तं भवतीति। अष्टाविति। यदि लौकिकप्रकारमेवात्रापि रसं मन्यते तर्हि अष्टाविति न वदेत्। षट्संख्याकत्वाल्लौकिकरसानामित्यर्थः। § 2452

220 ...42cd काव्यार्थभावनास्वादो नर्तकस्य न वार्यते॥ ४२॥
§ 2453

नर्तकोऽपि न लौकिकरसेन रसवान् भवेत्। तदानीं भोग्यत्वेन स्वमहिलादेरग्रहणात्। काव्यार्थभावनायां त्वस्मदादिवत् काव्यरसास्वादोऽस्यापि न वार्यते। § 2454

४ त्वात्] N.S.P. -*vilakṣaṇatvaṃ nāṭyarasānām.*
५ *] ना॰ शा॰ [GOS] ६।१५
८ पि] Gr.MS. reads *na hi saty api.* Tri.MS. reads *nahy asya saty api* and M.G.T. *nahy asaty api.*
२ सेन] Kumārasvāmin in his *Ratnā :aṇa* says thus : *ayaṃ ca raso laukikālaukikabhedena dvividhaḥ. tatrādyaḥ kadalīrasālādiphalāsvādaja-nyānandasadṛśaḥ kāryaś ca. itaro brahmānandasabrahmacārī nityaś ca.* (Balamanorama Press ed., १९५०, p. २०४). --- Vidyānātha also says at the end of the chapter thus : *nirvedādyupabhogabhāvitani-jāsvādātireko raso loke syād anukārya eva kathito nāṭye tu sāmājike* (ibid., p. २११). *loke syād* is explained as *laukikaś cet,* and it means *raso laukikaś cet anukārye eva kathitaḥ.* It is not clear as to whether in the opinion of Dhanika the word *rasa* could be used with reference to the one known as *anukāryagata* (i.e. *laukika*) as Bh.Nr. explains the expression *laukikarasa* differently (*ṣaṭsaṃkhyākatvāt laukikarasānām*). The (*alaukika-*) *rasa* of the *kāvya,* i.e. the one known as *sāmājikagata* is of course noted by all as *rasa.*

ननु रामाद्यनुकार्यमनुकुर्वन् नर्तकोऽपि रसवान् भवति। तद् रामादिगतलौकिकरसेन रसवत्त्वे हि युज्यते। तत्राह काव्यार्थेति। सोऽपि न लौकिकरसेन रसवान्। किं तर्हि ? अस्मदादिवत् काव्यरसेनेत्यर्थः। § 2455

कथं च काव्याद् रसास्वादोद्भूतिः, किमात्मा चासाविति व्युत्पाद्यते— § 2456

...43 स्वादः काव्यार्थसंभेदादात्मानन्दसमुद्भवः।
विकासविस्तरक्षोभविक्षेपैः स चतुर्विधः॥ ४३॥
§ 2458

...44 शृङ्गारवीरबीभत्सरौद्रेषु मनसः क्रमात्।
हास्याद्भुतभयोत्कर्षकरुणानां त एव हि॥ ४४॥
§ 2460

...45ab अतस्तज्जन्यता तेषामत एवावधारणम्। § 2461

काव्यार्थेन विभावादिसंसृष्टस्थाय्यात्मकेन भावकचेतसः संभेदेऽन्योन्यसंवलने प्रत्यस्तमितस्वपरविभागे सति प्रबलतरस्वानन्दोद्भूतिः=स्वादः। तस्य च सामान्यात्मनैकत्वेऽपि प्रतिनियतविभावादिकारणजन्येन संभेदभेदेन चतुर्धा चित्तभूमयो भवन्ति। तद्यथा—शृङ्गारे विकासः, वीरे विस्तरः, बीभत्से क्षोभः रौद्रे विक्षेप इति। तत्रान्येषां चतुर्णां हास्याद्भुतभयानककरुणानां स्व- 221
सामग्रीलब्धपरिपोषान्तराणां त एव चत्वारो विकासाद्याश्चेतसः संभेदाः। अत एव च—

Abhinavagupta's remarks *evaṃ hi laukiko 'pi kiṃ na rasaḥ?*, and (again later on) *tenālaukikacamatkārātmā rasāsvādaḥ ... laukikasaṃvedanavilakṣaṇa eva* (both on page २८४, vol. I, G.O.S., १९५६) seem to indicate that in his opinion the word *rasa* could not be used with reference to the *laukika* one. Dhanika's remarks *nartako'pi na laukikarasena rasavān bhavet. tadānīṃ bhogyatvena svamahilāder agrahaṇād.* *Kāvyārthabhāvanāyāṃ tu asmadādivat kāvyarasāsvādaḥ asyāpi na vāryate*, however, seem to indicate that the word *rasa* could be used with reference to what is known as *anukāryagata* and the one known as *sāmājikagata*.

१ काव्याद्] N.S.P. *kāvyāt svādodbhūtiḥ*.

१३ राणां] N.S.P. *pariposạṇām* in place of *pariposạ̄ntarāṇām* (of A.T.A.).

शृङ्गाराद्धि भवेद्धास्यो रौद्राच्च करुणो रसः।
वीराच्चैवाद्भुतोत्पत्तिर्बीभत्साच्च भयानकः॥* § 2464

इति हेतुहेतुमद्भाव एव संभेदापेक्षया दर्शितः। न [तत्] कार्यकारणभावाभिप्रायेण। तेषां कारणान्तरजन्यत्वात्। शृङ्गारानुकृतिर्या तु स हास्य इति कीर्तितः।* इत्यादिना विकासादिसंभेदैकत्वस्यैव स्फुटीकरणात्। अवधारणमप्यत एवाष्टाविति। संभेदानां तावत्त्वात्। § 2465

ननु च युक्तं शृङ्गारवीरहास्यादिषु प्रमोदात्मकेषु काव्यार्थसंभेदादानन्दोद्भव इति। करुणादौ तु दुःखात्मकत्वे कथमिवासौ प्रादुःष्यात्। तथा हि—तत्र करुणात्मककाव्यश्रवणाद् दुःखाविर्भावोऽश्रुपातादयश्च रसिकानामपि प्रादुर्भवन्ति। न चैतदानन्दात्मकत्वे सति युज्यते। सत्यमेतत्। किंतु तादृश एवासावानन्दः सुखदुःखात्मको यथा प्रहरणताडनादिषु संभोगावस्थायां कुट्टमिते स्त्रीणाम्। अन्यश्च लौकिकात् करुणात् काव्यकरुणः। तथा हि—अत्रोत्तरोत्तरं रसिकानां प्रवृत्तयः। यदि च लौकिककरुणवद् दुःखात्मकत्वमेवेह स्यात् तदा न कश्चित् तत्र प्रवर्तेत। ततः करुणैकरसानां रामायणादिमाहाप्रबन्धानामुच्छेद एव भवेत्। अश्रुपातादयश्चेतिवृत्तवर्णनाकर्णनेन विनिपतितेष्टलौकिकवैक्लव्यादिबत् प्रेक्षकेषु प्रादुर्भवन्तो न विरुध्यन्ते। तस्माद् रसान्तरवत् करुणस्याप्यानन्दात्मकत्वमेव। § 2466

काव्याद् रसोत्पत्तिप्रकारः कीदृशः। किमात्मको वा रस इत्यपेक्षायां
222 प्रतिपाद्यत इत्याह कथं चेति। स्वाद इति। काव्यार्थस्य विभावादेश्चेतसा संभेदात् स्वानन्दाभिव्यक्तिः स्वादः। स्वसंविदात्मैवानन्द इति कृत्वा स्वादस्वाद्ययोरविभागेन व्यपदेशः। स च जन्यमानैर्विकासविस्तरक्षोभविक्षेपात्मकैश्चित्तभूमिविशेषैर्विशिष्टश्चतुर्विधो भवति। शृङ्गारवीरबीभत्सरौद्रेषु सत्सु मनसो विकासाद्याश्चतुर्विधाश्चित्तभूमयो भवन्ति। हास्यादीनामपि स्वसामग्रीलब्धपरिपोषाणां सद्भावे त एव विकासाद्याश्चत्वारो भवन्ति। अत एव शृङ्गारादिज-

२ *] ना॰ शा॰ [GOS] ६।३९
५ *] ना॰ शा॰ [GOS] ६।४०
६ संभेदानां] N.S.P. *bhāvāt* instead of *tāvattvāt*. After *tāvattvāt* some lines up to *kiṃtu tādṛśa evāsāv ānandaḥ* are missing in A.T.A. N.S.P. has here a number of wrong punctuation marks and expressions, which are cited by many scholars. See *Bhoja's Śṛṅgāra Prakāśa* (१९६३), p. ४३६.
१६ त्] N.S.P. *vaiklavyadarśanādivat*.
२२ तुर्विधो] Tri.MS. and A.T.A. (of *Avaloka*) read *bhrami* instead of *bhūmi*. Bh.Nṛ. the commentator on the *S.K.Ā.* seems to hold a different view regarding *cittabhūmi*s, from that of our Bh.Nṛ. See Prof. Raghavan's work on *Ś.P.* footnote on page ४३७, and the extract from Bh.Nṛ. (on page ४२३) referred to therein. Also see Note २४७a to *L.Ṭ.*

न्यविकासाद्या एव हास्यादिषु सत्सु भवन्तीत्येतावता शृङ्गारादिभिर्हास्यादयो जायन्त इति भ्रमः। ते तु वस्तुगत्या स्वसामग्रीभ्य एव जायन्ते। चतुर्विध-विकासादिजनकतया शृङ्गारादीनां हास्यादीनां चाष्टत्वव्यपदेशः। शृङ्गाराद-

२ मः] Here *bhramaḥ* is found in Gr.MS. and in Tri.MS. In M.G.T. however it is not found.
३ या] Bahurūpamiśra's interpretation of the following *kārikā*: śṛṅgāravīrabībhatsaraudreṣu manasaḥ kramāt | hāsyādbh-utabhayotkarṣakaruṇānāṃ ta eva hi || seems to be different from the one given by Bh.Nṛ. B.M. supplies *janayitavyeṣu* to be construed with *śṛṅgāravīrabībhatsaraudreṣu*, whereas Bh.Nṛ. supplies *satsu*, and to the expression in genitive in the second line *hāsya ... karuṇānām, api saṃbandhino bhavanti* (*ta eva*) is supplied by B.M., whereas Bh.Nṛ adds *sadbhāve*. B.M.'s explanation in this context is *vikāsātmanaś cittabhūmeḥ ... śṛṅgārahāsyau jāyete, vistarāc ca vīrādbhutau, kṣobhāt bībhatsabhayānakau, vikṣepāc ca raudrakaruṇau. ubhayoś ca parasparasādṛśyād ekasaṃbhedaprasūtatvam iti*. According to his interpretation *śṛṅgārādi*s are *janya*s, and *vikāsādicittabhūmi*s are *janaka*s thereof. According to Bh.Nṛ.'s explanation the position becomes reverse, as he takes *śṛṅgārādi*s as *janaka*s, and the *cittabhūmi*s as *janya*s thereof. The following is the essence of his interpretation. When *śṛṅgāra* or *hāsya* is the *rasa* (produced), in the *svāda* thereof the mental condition *vikāsa* (opening) occurs, and in the case of *vīra* and *adbhuta*, the mental condition *vistara* (expansion) occurs, etc., and this seems to be the idea conveyed by Bh.Nṛ. Thus as *vikāsa*, etc. is regarded as consequent on the *śṛṅgāra* and so on by Bh.Nṛ., he takes *śṛṅgārādi*s as *janaka*s, and not as *janya*s like B.M. Bh.Nṛ. the commentator on the *Sarasvatīkaṇṭhābharaṇa* seems to explain this point in the same way as our Bh.Nṛ. The former too while referring to this point in the course of *pūrvapakṣa* says *vikāsavistarakṣobhavikṣepaiḥ śṛṅgārādiphalabhūtaiḥ śrotṝṇāṃ caturavasthaṃ mano jāyate. tābhir avasthābhiḥ śṛṅgārādayaś catvāro rasā niṣpannā jñāyante*, etc. (See the extract given by Prof. Raghavan in his work on *Ś.P.* ed., १९६३, p. ४२२.) (Should we take that this was a reference to our Bh.Nṛ. ?). According to Dhanika as interpreted by Bh.Nṛ. *vikāsa* follows and is associated with *śṛṅgāra*, and this is the mental condition that follows and is associated with *hāsya* also,

योऽपि हि चतुरो विकासादीन् जनयन्ति। हास्यादयोऽपि चतुरो विकासादीन्। अतस्तेषाम् =शृङ्गारादिजन्यविकासादीनां चतुर्णां, हास्यादिजन्यविकासादीनां चतुर्णां च संकलनया अष्टत्वादष्टौ नाट्ये रसा इत्यवधारणमुपपद्यत इति। तथा व्याचष्टे काव्यार्थेनेत्यादिना। संभेदस्वरूपं कथयति अन्योन्यसंवलने सतीति। संवलनं नाम पृथग्बोधायोग्यत्वोपगमः। तदाह प्रत्यस्तमितेति। तस्य च सामान्यात्मनैकत्वेऽपीति। तस्य=रसात्मनो भेदाभावे

---

and so *vikāsa* is the *sūcaka* of the *hāsya*, as it is of the *śṛṅgāra*; therefore Bharata's verse *śṛṅgārād hi bhaved hāsyaḥ*, etc. is to be understood to mean *śṛṅgārasūcakāt cittabhūmiviśeṣāt* (i.e. *vikāsāt hāsyaḥ sūcito bhavet*, etc. This is what is mentioned as *hetuhetumadbhāva eva saṃbhedāpekṣayā darśitaḥ* in the *Avaloka*. B.M.—following him Prof. Raghavan too—understands the line in the *kārikā*: *atas tajjanyatā teṣām* as referring to the primary *rasa*s producing the secondary *rasa*s, as he takes *teṣām* in the line to mean *hāsyādīnām*, and *tajjanyatā* in the sense of *śṛṅgārādijanyatā*. But according to Bh. Nṛ. *teṣām* means *vikāsādīnāṃ caturṇāṃ yugalānām* (i.e. *aṣṭānām* as the total number), and *tajjanyatā* is in the sense of *śṛṅgārādicatuṣṭayahāsyādicatuṣṭayajanyatā*. Dhanika's statement *na (tat) kāryakāraṇabhāvābhiprāyeṇa* conveys that *hāsyādi*s are not regarded by him as *janya*s of *śṛṅgārādi*s. Dhanika and Bh. Nṛ. do not seem to entertain the idea of four primary *rasa*s producing the four secondary *rasa*s. (In the light of Bh. Nṛ's interpretation, Prof. Raghavan's understanding of this portion of *Avaloka* [see his footnote on page ४३६] deserves his own reconsideration.) Abhinava's interpretations of the verses in *NS*. in this context are not the same as those of Dhanika and Bh. Nṛ., but are concerned with the view of *rasād rasāntarotpatti* and the primary and secondary *rasa*s. This view of Bharata was criticized by Bhoja. (See Prof. Raghavan's work on *Ś.P.*, ibid. pp. ४३६–८.). Vidyādhara in his *Ekāvalī* refers to the *vikāsādicittabhūmi*s as *upādhi*s (B.S.S., p. १६). According to Kumārasvāmin it is the *vibhāvādi*s which serve as *upādhi*s. See Note २५४ to *L.T.*. The word *saṃbheda* in the *Avaloka* seems to be in the sense of *saṃvalanaṃ* (the verbal meaning) and also of *tadanantarabhāvimano 'vasthāviśeṣa*, i.e. *vikāsa*, etc.

६ भेदाभावे] Kumārasvāmin says: *nanu rasāsvāde viśeṣābhāvāt kathaṃ*

सत्यपीत्यर्थः। विकासादीनामेव भेदकारणमुक्तं प्रतिनियतविभावादिकारणजन्येन संभेदभेदेनेति।Previous printed editions read differently. But the pratīka cited by Bh.Nṛ. is also confirmed by A.T.A. हेतुहेतुमद्भाव एवेति। संभेदापेक्षयैव हेतुहेतुमद्भावः, न पुनः शृङ्गारादयो हास्यादीनां कारणमिति शृङ्गारादीनां हास्यादीनां च कार्यकारणभावो दर्शित इत्यर्थः। एवमनभिप्रायत्वे हेतुमाह तेषामिति। कारणान्तरेण स्वस्वविभावादिसहितस्थाय्यात्मना जन्यत्वादित्यर्थः। अन्यत्रानुकृतिशब्ददर्शनात् शृङ्गाराद्यजन्यत्वं हास्यादीनां स्पष्टमित्याह शृङ्गारानुकृतिर्या त्विति। विकासादिसंभेदैकत्वस्य स्फुटीकरणादिति। शृङ्गारादिभिरपि ते विकासादयो जायन्ते हास्यादिभिरपि तादृशा इत्युभयत्रापि संभेदैकत्वस्य स्फुटीकरणादिति। संभेदानांPrevious editions give different readings here too. But the pratīka cited by Bh. Nṛ. is correct and is confirmed by A.T.A. also. तावत्त्वादिति। अष्टानामष्टविधत्वादित्यर्थः। अष्टत्वं विरुद्धं न्यूनत्वादिति चोदयतिकथमिवासौ प्रादुःष्यादिति। कथम् असौ आनन्दः प्रादुर्भवेदित्यर्थः। परिहरति सत्यमेतदिति। लोके दुःखात्मकत्वमेव करुणस्य दृश्यत इति चेत् तत्राह अन्यश्चेति। अन्वयेन करुणस्योपादेयत्वमुक्त्वा व्यतिरेकेणाप्याह यदि 223
चेति। * करुणैकरसानामिति वीररसाङ्गित्वेऽपि करुणप्राचुर्येणोक्तम्। अङ्गी तु वीर एवेति। § 2467

ननु च शान्तरसस्यानभिनेयत्वाद् यद्यपि नाट्येऽनुप्रवेशो नास्ति तथापि सूक्ष्मातीतादिवस्तूनां सर्वेषामपि शब्दप्रतिपाद्यताया विद्यमानत्वात् काव्यविषयत्वं न निवार्यते। अतस्तदुच्यते—*[पुष्टिर्नाट्येषु नैतस्येति। अभिनेयापेक्षया चावधारणनष्टाविति।] § 2468

---

*navadhā vibhāga iti cet ? satyam*. (As Vidyānātha and Kumārasvāmin accept the *śānta*, the word *navadhā* is used in the question.) *yathaikasya brahmānandasya candrakāntasopānapaṅktipratibimbitacandrabimbavad upādhibedād anekadhā kalpanam, tadvad atrāpi ... vibhāvādibhedād vastuta ekasyāpi nānātvam iti veditavyam*. (Balamanorama Press. ed, १९५०, p. २०९.)

१८ *] This is the reading in A.T.A. also.

१९ अङ्गी] Thus Bh. Nṛ. says clearly that *vīra* is the *aṅgirasa* in the *Rāmāyaṇa*. Bahurūpamiśra also says under *vīrarasa* thus *ayaṃ vīraḥ śrīmadrāmāyaṇe tadanubandheṣu prabandheṣu uttararāmacarivarjeṣu vīracaritādiṣūdāhartavyaḥ*. But Ānandavardhana in his *Dhvanyāloka* (under IV. ५) and Viśvanātha in his *Sāhityadarpaṇa* (III.५) say that *karuṇa* is the *pradhānarasa* in the *Rāmāyaṇa*.

३ *] The portion within square brackets is my surmise on the basis of Bh.Nṛ's comments.

...45cd **शमप्रकर्षोऽनिर्वाच्यो मुदितादेस्तदात्मता॥ ४५॥**
§ 2469

शान्तो हि यदि तावत् अभिनेये न रसः किं नस्ततो गतम् ?* स च यदि—

न तत्र दुःखं न सुखं न चिन्ता न द्वेषरागौ न च
काचिदिच्छा।
रसस्तु शान्तः कथितो मुनीन्द्रैः सर्वेषु भावेषु समप्रमाणः॥
§ 2472

इत्येवंलक्षणः, तदा तस्य मोक्षावस्थायामेवात्मस्वरूपापत्तिलक्षणायां प्रादुर्भावः। तस्य च स्वरूपेणानिर्वचनीयता। तथा हि—श्रुतिरपि तं स एष नेति नेति इत्यन्यापोहरूपेणाह। न च तथाभूतस्य शान्तरसस्य अभिनेये तद्धृदयाः स्वादयितारः सन्ति। अथापि तदुपायभूतः शमो यदि *मुदितामैत्रीकरुणादिलक्षणः [विवक्षितस्तर्हि तस्य रूपकेषु न पोषः। काव्ये संभावितस्य] तस्य च [स्वादे मनसो] विकासविस्तारक्षोभविक्षेपरूपतैवेति तदुक्त्यैव [काव्यसंबन्धि]शान्तस्वादो निरूपितः। § 2473

---

२ *] See *Laghuṭīkā* here, and Note २५८ thereon.
५ माणः] N.S.P. *śamapradhānaḥ*.
८ तं] बृहदारण्यकोपनिषदि, ३।९।२६
९ याः] N.S.P. *sahṛdayāḥ* in place of *taddhṛdayāḥ*.
९ *] See Patañjali's *Yogasūtra, maitrīkaruṇāmuditopekṣāṇāṃ sukhaduḥkhapuṇyāpuṇyaviṣayāṇāṃ bhāvanātaś cittaprasādanam* (I. ३३). *atha* is the reading in the MSS. of *Avaloka*, but Bh.Nṛ's *pratīka* shows *athāpi*. The significance of this sentence of the portion of the *Avaloka* and the *L.T.* is not very clear to me. On the basis of the clear statements of Bh.Nṛ., I have surmised some linking words and expressions (which I have given in square brackets) in the *Avaloka* and *L.T.* to have some consistency in the context. There seems to have been some difficulty in understanding the portion even in the past, and consequently two schools of interpretation seem to have existed. One understood Dhanika as rejecting the *śāntarasa* even in *śravyakāvya*, though not expressly but in an implied manner. The second understood Dhanika as rejecting the *śānta* only in the *abhineya*, and giving approval to its possibility in a *śravyakāvya* (*sarvathā nāṭakādau abhinayātmani śamasya sthāyitvaṃ neṣyate*). Bh.Nṛ. seems to belong to the second school of thought.

अधिकस्य शान्तस्य सद्भावादवधारणमनुपपन्नमिति पुनरपि चोदयति ननु चेति। यद्यपि शान्तो नाम कश्चिद् रसो विद्यते। तथापि श्राव्यबन्धगोचर एव सः। न तु दृश्यबन्धगोचरः। तस्यानभिनेयत्वात्। तदपेक्षया चाष्टावित्यवधारणमित्यभिप्रायेणाह अतस्तदुच्यत इत्यादि। काव्ये संभावितः 224 स निरुच्यतामिति चेदाह अनिर्वाच्य इति* अनिर्वाच्यतामेवदर्शयति शान्तो हि यदि तावदित्यादिना। स्वरूपेणेति। यदि परं, कारणादिना निर्वचनीयता विवक्षिता सा भवेदित्यर्थः। स्वरूपेणानिर्वचनीयतामेवोपपादयति तथा हीति। किं च रसो रसिकापेक्षया। ते च रूपकेषु संसारिणः संसारिणामतद्धदयत्वात् तस्य स्वादयितारोऽपि न सन्ति। विरागिणस्तु रूपकं न पश्येयुः। अतोऽपि तस्याभिनेये नाटकादौ नानुप्रवेश इत्याह न चेति। अथापीति।

---

५ *] N.S.P. does not contain the portion *na rasaḥ kiṃ nas tato gatam* shown within brackets in the *Avaloka*. A.T.A. reads with some mistakes *śānto hi yato vana-rasaḥ kiṃ nas tato gatam ?* This seems to be a mistake of the scribe, and the reading should be as given in the text within square brackets, and this line is also given by Bahurūpamiśra. From the comments of Bh. Nṛ. it seems that *abhineye* is to be understood here before *na rasaḥ*, etc.,if this portion (*na rasaḥ kiṃ nas tato gatam*) was the reading known to Bh. Nṛ. also, which is however not clear. The last word of the verse is *samapramāṇaḥ* instead of *śamapradhānaḥ* (which is the reading in N.S.P.).

९ त्वात्] In place of *śahṛdayāḥ* (N.S.P.) A.T.A. reads *taddhṛdayāḥ* in the *Avaloka*, and this is confirmed by Bh. Nṛ's comments.

१० स्याभिनेये] From these and previous comments *yady api śānto nāma kaścid raso vidyate. tathāpi śrāvyabandhagocara eva saḥ. na dṛśyabandhagocaraḥ, tasyānabhineyatvāt, tadapekṣayā (=dṛśyabandāpekṣayā) ca aṣṭāv ity avadhāraṇam*, Bhaṭṭanṛsiṃha seems to interpret clearly that Dhanika (and Dhanaṃjaya) did not object to *śāntarasa* completely, but only in drama it was not accepted by him (and by Dhanaṃjaya—*puṣṭir nāṭyeṣu naitasya* and *nāṭakādau … neṣyate*, Dhanika). In a *śrāvyabandha* its possibility was not denied (by them). See Note ३०९a to *Daśarūpāvaloka*. But Prof. V. Raghavan interprets in a different way. See his *The Number of Rasas*, १९४०, pp. ४६–७. The available text of B.M.'s com- mentary on the *DR* is defective in this place. B.M.'s interpretation in this context seems to be different from that of Bh. Nṛ., and it also seems to be inconsistent with his own previous explanation running as *śamasya tu …… nātye abhinayena darśayitum aśakyatvāt na (sa) rasātmanā poṣayituṃ śakyate iti.*

तत्स रूपकेषु स्वरूपेण प्रवेशाभावेऽपि कारणात्मनानुप्रवेशोऽस्तीत्यर्थः। [तस्य च रूपकेषु पोषो न संभवति] तर्हि [काव्ये संभावितस्य] तस्य [स्वादे मनसो] रूपस्य [चित्तभूमिविशेषस्य] वक्तव्यत्वाद् [तस्य चातिरिक्तत्वे] अष्टावित्यवधारणानुपपत्तिरिति चेत् तत्राह तस्य चेति। [अष्टौ स्थायिनो मता इति त्वभिनेयापेक्षया।] § 2474

इदानीं विभावादिविषयावान्तरकाव्यव्यापारप्रदर्शनपूर्वकः प्रकरणोपसंहारः प्रतिपाद्यते— § 2475

...46 पदार्थैरिन्दुनिर्वेदरोमाञ्चादिस्वरूपकैः।
काव्याद् विभावसंचार्यनुभावप्रख्यतां गतैः॥ ४६॥
§ 2477

...47ab भावितः स्वदते स्थायी रसः स परिकीर्तितः। § 2478

अतिशयोक्तिरूपकाव्यव्यापाराहितविशेषैश्चन्द्राद्यैरुद्दीपनविभावैः प्रमदाप्रभृतिभिरालम्बनविभावैर्निर्वेदादिभिर्व्यभिचारिभावै रोमाञ्चाश्रुभ्रूक्षेपकटाक्षाद्यैरनुभावैरवान्तरव्यापारतया पदार्थीभूतैर्वाक्यार्थः स्थायी भावो भावितो भावरूपतामानीतः स्वदते स रस इति प्राक्प्रकरणतात्पर्यम्। § 2479

प्रकरणोपसंहार इति। यत् प्रकरणं प्रतिपाद्यतयोपक्रान्तं विभावैरनुभावैश्चेत्यादिना तस्य रसे विभावादीनामवान्तरव्यापारभेदप्रतिपादनेनोपसंहारः क्रियत इति। अवान्तरव्यापारतया पदार्थीभूतैरिति। यद्यपि वि-
225 भावादीनां स्वस्ववाक्यापेक्षया वाक्यार्थत्वमेव तथापि रसं प्रत्यवान्तरव्यापारत्वात् पदार्थीभाव एवेति। अतो वाक्यार्थस्थानीयो रसः पदार्थस्थानीया विभावादय इति। भावित इति भावरूपतामानीत इत्यर्थ इत्याह भावित इति। § 2480

विशेषलक्षणान्युच्यन्ते—तत्राचार्येण स्थायिनां रत्यादीनां शृङ्गारादीनां च पृथग् लक्षणानि विभावादिप्रतिपादनेनोदितानि। अत्र तु— § 2481

...47cd लक्षणैक्यं विभावैक्यादभेदाद् रसभावयोः॥ ४७॥
§ 2482

क्रियत इति शेषः।* § 2483

४ *] N.S.P. and A.T.A. *vākyaśeṣaḥ*. But Bh. Nṛ's *pratīka* shows the reading given here.

तत्र तावच्छृङ्गारः— § 2484

...48 रम्यदेशकलाकालवेषभोगादिसेवनैः।
प्रमोदात्मा रतिः सैव यूनोरन्योन्यरक्तयोः।
प्रहृष्यमाणा शृङ्गारो मधुराङ्गविचेष्टितैः॥ ४८॥ § 2487

इत्थमुपनिबध्यमानं काव्यं शृङ्गारास्वादाय भवतीति। *रत्युपदेशपरमेतत्। § 2488

नन्वाचार्येण रसभावयोः पृथग् लक्षणमुक्तं चेत् त्वयापि तद्वत् पृथगेव तयोर्लक्षणमुच्यताम्। तत्राह अत्रेति। स्थायिनः परिणतिविशेष एव हि रसः। अतस्तयोर्भेदाभावात्। अभिन्ना एव वस्तुतो विभावादयः। तेन तेषां लक्षणमपि तन्त्रेणोच्यत् इत्यर्थः। लक्षणैक्यमित्येतावति पर्यवस्यति सूत्रम् [इति भाति]। तेनाह क्रियत इति शेष इति। अत्र लक्षणैक्यं क्रियत इत्यर्थः रत्युपदेशपरमेतदिति। एवमुपनिबध्यमाना रतिः शृङ्गारो भवतीत्युक्तम्। एतद् रत्युपदेशपरमेव। अपरि शृङ्गारप्रपञ्चस्य प्रतिपादयिष्यमाणत्वात्। § 2489

तत्र *देशविभावो* यथोत्तररामचरिते—

स्मरसि सुतनु तस्मिन् पर्वते लक्ष्मणेन
प्रतिविहितसपर्यासुस्थयोस्तान्यहानि।
स्मरसि सरसतीरां तत्र गोदावरीं वा स्मरसि च 226
तदुपान्तेष्वावयोर्वर्तनानि॥* § 2492

§ 2493

*कलाविभावो* यथा—

अङ्गैरन्तर्निहितवचनैः सूचितः सम्यगर्थः पादन्यासो
लयमनुगतस्तन्मयत्वं रसेषु।
शाखायोनिर्मृदुरभिनयस्तद्विकल्पानुवृत्तौ भावो भावं नुदति
विषयाद् रागबन्धः स एव॥* § 2496

§ 2497

यथा च—

५ *] N.S.P. *kavyupadeśaparam etat.*
११ र्थः] Previous editions read *kavyupadeśaparam etat. ratyupadeśaparam etat* is found in all the MSS. and also in A.T.A.

१ रिते] In A.T.A. the order of illustrations is slightly different.
३ *] १।२६
७ *] मालविका° २।८

व्यक्तिर्व्यञ्जनधातुना दशविधेनाप्यत्र लब्धामुना विस्पष्टो
द्रुतमध्यलम्बितपरिच्छिन्नस्त्रिधायं लयः।
गोपुच्छप्रमुखाः क्रमेण यतयस्तिस्रोऽपि संपादिता-
स्तत्त्वौघानुगताश्च वाद्यविधयः सम्यक् त्रयो दर्शिताः॥*
§ 2500

§ 2501

*कालविभावो* यथा कुमारसंभवे—

असूत सद्यः कुसुमान्यशोकः स्कन्धात् प्रभृत्येव सपल्लवानि।
पादेन नापैक्षत सुन्दरीणां संपर्कमासिञ्जितनूपुरेण॥* § 2504

इत्युपक्रमे—

मधु द्विरेफः कुसुमैकपात्रे पपौ प्रियां स्वामनुवर्तमानः।
शृङ्गेण संस्पर्शनिमीलिताक्षीं मृगीमकण्डूयत कृष्णसारः॥*
§ 2507

§ 2508

*वेषविभावो* यथा तत्रैव—

अशोकनिर्भर्त्सितपद्मरागमाकृष्टहेमद्युतिकर्णिकारम्।
227 मुक्ताकलापीकृतसिन्दुवारं वसन्तपुष्पाभरणं वहन्ती॥* § 2511

§ 2512

*उपभोगविभावो* यथा—

चक्षुर्लुप्तमषीकणं कबलितस्ताम्बूलरागोऽधरे विश्रान्ता
कबरी कपोलफलके लुप्तेव गात्रद्युतिः।
जाने संप्रति मानिनि प्रणयिना कैरप्युपायक्रमै- र्भग्नो
मानमहातरुस्तरुणि ते चेतःस्थलीवर्धितः॥ § 2515

§ 2516

*प्रमोदात्मा रतिर्*यथा मालतीमाधवे—

जगति जयिनस्ते ते भावा नवेन्दुकलादयः प्रकृतिमधुराः
सन्त्येवान्ये मनो मदयन्ति ये।

२ *] नागा° १।१५
६ *] ३।२६
९ *] कुमार° ३।३६
१३ *] कुमार° ३।५३

मम तु यदियं याता लोके विलोचनचन्द्रिका नयनविषयं
जन्मन्येकः स एव महोत्सवः॥* § 2519

§ 2520

*युवतिविभावो* यथा मालविकाग्निमित्रे—

दीर्घाक्षं शरदिन्दुकान्ति वदनं बाहू नतावंसयोः संक्षिप्तं
निबिडोन्नतस्तनमुरः पार्श्वे प्रमृष्टे इव।
मध्यः पाणिमितो नितम्बि जघनं पादावरालाङ्गुली छन्दो
नर्तयितुर्यथैव मनसि श्लिष्टं तथास्या वपुः॥* § 2523

§ 2524

*यूनोर्विभावो* यथा मालतीमाधवे—

भूयो भूयः सविधनगरीरथ्यया पर्यटन्तं दृष्ट्वा दृष्ट्वा
भवनवलभीतुङ्गवातायनस्था।
साक्षात् कामं नवमिव रतिर्मालती माधवं यद्
गाढोत्कण्ठा लुलितललितैरङ्गकैस्ताम्यतीति॥* § 2527

§ 2528

*अन्योन्यानुरागो* यथा तत्रैव— 228

यान्त्या मुहुर्वलितकंधरमाननं त- दावृत्तवृन्तशतपत्रनिमं
वहन्त्या।
दिग्धोऽमृतेन च विषेण च पक्ष्मलाक्ष्या गाढं निखात इव
मे हृदये कटाक्षः॥* § 2531

§ 2532

*मधुराङ्गविचेष्टितं* यथा तत्रैव—

स्तिमितविकसितानामुल्लसद्भ्रूलतानां मसृणमुकुलितानां
प्रान्तविस्तारभाजाम्।
प्रतिनयननिपाते किंचिदाकुञ्चितानां विविधमहमभूवं
पात्रमालोकितानाम्॥* § 2535

§ 2536

---

१ *] १।३९
५ *] २।३
९ *] १।१८
१३ *] मालती° १।३२
१७ *] मालती° १।३०

...49 ये सत्त्वजाः स्थायिन एव चाष्टौ त्रिंशत्त्रयो ये व्यभिचारिणश्च।
एकोनपञ्चाशदमु च भावा युक्त्या निबद्धाः परिपोषयन्ति।
आलस्यमौग्र्यं मरणं जुगुप्सा
तस्याश्रयाद्वैतविरुद्धमिष्टम्॥ ४९॥ § 2539

त्रयस्त्रिंशद् व्यभिचारिणश्चाष्टौ स्थायिनोऽष्टौ सात्त्विकाश्चेत्येकोनपञ्चाशद् भावा युक्त्या अङ्गत्वेनोपनिबध्यमानाः शृङ्गारं संपादयन्ति। आलस्यौग्र्यजुगुप्सामरणादीन्येकालम्बनविभावाश्रयत्वेन साक्षादुपनिबध्यमानानि विरुध्यन्ते। प्रकारान्तरेण चाविरोधः प्राक् प्रतिपादित एव। § 2540

एकालम्बनविभावाश्रयत्वेनेति। एतानि [आलस्यादीनि] तावदेकालम्बनविभावाश्रयत्वेनोपनिबध्यमानानि विरुध्यन्ते। तथात्वेऽपि साक्षादुपनिबध्यमानानि विरुध्यन्ते। तेन भिन्नालम्बनाश्रयत्वेनोपनिबन्धनीयानि। एकालम्बनाश्रयत्वेऽपि व्यवधानेनोपनिबन्धनीयानीत्यर्थः। § 2541

229 तद्विभागस्तु— § 2542

...50ab अयोगो विप्रयोगश्च संभोगश्चेति स त्रिधा। § 2543

अयोगविप्रयोगविशेषत्वाद् विप्रलम्भस्य तत्सामान्याभिधायित्वे विप्रलम्भशब्द उपचरितवृत्तिर्मा भूदिति न प्रयुक्तः। तथा हि—*उक्त्वा तद्व्यतिक्रमे नायिकान्तरानुसरणे च विप्रलम्भशब्दस्य मुख्यः प्रयोगः। वञ्चनार्थत्वात् तस्य। § 2544

अयोगो विप्रयोगः संभोग इति त्रेधा शृङ्गारविभागकथनम्। अत्र हेतुमाह अयोगविप्रयोगविशेषत्वाद् विप्रलम्भस्येति। अयोगविप्रयोगयोर्विशेषो हि विप्रलम्भ इत्यर्थः। तर्ह्यत्र विप्रलम्भशब्द एव प्रयुज्यतामित्याशङ्क्याह तदिति। वञ्चनार्थो विप्रलम्भशब्दः। एवं चायोगे पारतन्त्र्यादिना वक्ष्यमाणे वञ्चनाभावात्, तथैवाबुद्धिपूर्वकप्रवासविप्रयोगे च वञ्चनाभावात् सर्वत्रायोगे विप्रयोगे च प्रयुज्यमानो विप्रलम्भशब्दो न संगतः स्यात्। इत्थम् उभयगतस्य विशेषस्याभिधायको विप्रलम्भशब्दः। अतस्तत्सामान्याभिधायी विप्रलम्भशब्द इत्युच्यमाने स शब्दे मुख्यतामपहायोपचरितवृत्तिः स्यात्। तेना-

२ मु] N.S.P. *amī hi bhāvāḥ*.
४ *] N.S.P. *dattvā saṃketam aprāpte 'vadhyatikrame sādhyena*. A.T.A. *śāṭhyena* in place of *sādhyena*. of the above line. Bh.Nṛ. has a different reading. See the Introduction.

योगो विप्रलम्भ इति न युक्त इत्यर्थः। तस्य तद्विशेषाभिधायित्वमेव दर्शयति उक्त्वेति। तद्व्यतिक्रम इति। तस्य वचनस्य व्यतिक्रमे ततो नायिकान्तरानुसरणे चेति। हेतुमाह वञ्चनार्थत्वादिति। वञ्चनं हि विप्रलम्भः। तस्य वञ्चनस्य सर्वेष्वयोगादिष्वननुवृत्तत्वादित्यर्थः। § 2545

...50cd तत्रायोगोऽनुरागेऽपि नवयोरेकचित्तयोः॥ ५०॥
§ 2546

...51ab पारतन्त्र्येण दैवाद् वा विप्रकर्षादसंगमः। § 2547

योगः=अन्योन्यस्वीकारः, तदभावः=अयोगः। पारतन्त्र्येण विप्रकर्षाद् देवीपित्राद्यायत्तत्वात् सागरिकामालत्योर्वत्सराजमाधवाभ्यामिव, दैवाद् गौरीशिवयोरिवासमागमः=अयोगः। § 2548

अयोगो योगस्य प्रागभावः, विप्रयोगस्तस्य प्रध्वंसाभाव इत्यभिप्रायेण 230
व्युत्पादयति योगः=अन्योन्यस्वीकार इति। असौ पारतन्त्र्येणासंयोगः =अयोगः देवीपित्राद्यायत्तत्वाद् दैवाद् वा विप्रकर्षः। अत्र देव्यायत्तत्वाद् विप्रकर्षो वत्सराजसागरिकयोः, पित्रायत्तत्वाद् विप्रकर्षो माधवमालत्योः, दैवायत्तत्वाद् विप्रकर्षो गौरीशिवयोरित्यर्थः। § 2549

...51cd दशावस्थः स तत्रादावभिलाषोऽथ चिन्तनम्॥
५१॥§ 2550

---

२ मे] A.T.A. gives the following reading head: --- *dattvā saṃketam aprāpte priye tadvyatikrameṇa śāṭhyena nāyikāntarānusaraṇena ca vipralaṃbhaśabdasya mukhyaḥ prayogaḥ. vañcanārthatvāt tasya*. Bh. Nṛ's *pratīka* is *uktvā* instead of *dattvā*, and *vyatikrame* and *anusaraṇe* are in locative instead of instrumental. *śāṭhyena* or its synonym is not found in Bh. Nṛ's commentary. After *vyatikrame śaṅkayā* is found in M.G.T. and Tri.MS. It may perhaps be *aśaṅkayā* ? See the Introduction.

८ त्वाद्] Gr.MS. gives this reading clearly. M.G.T. and Tri.MS. read as *-pitrādyāyattā-* ... N.S.P. reads here *daivapitrādyāyattatvāt*, etc. It is surely *devī-*, etc. which is also given in A.T.A.

८ अत्र] Here Tri.MS. reads as *daivāyattatvāt*, etc.

...52 स्मृतिर्गुणकथोद्वेगप्रलापोन्मादसंज्वराः।
जडता मरणं चेति दुरवस्थं यथोत्तरम्॥ ५२॥
§ 2552

...53 अभिलाषः स्पृहा तत्र कान्ते सर्वाङ्गसुन्दरे।
दृष्टे श्रुते वा तत्रापि विस्मयानन्दसाध्वसाः॥ ५३॥
§ 2554

...54 साक्षात् प्रतिकृतिस्वप्नच्छायामायासु दर्शनम्।
श्रुतिर्व्याजात् सखीगीतमागधादिगुणस्तुतेः॥ ५४॥
§ 2556

*अभिलाषो* यथा शाकुन्तले—

असंशयं क्षत्रपरिग्रहक्षमा यदार्यमस्यामभिलाषि मे मनः।
सतां हि संदेहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः॥* § 2559

§ 2560

*विस्मयो* यथा—

स्तनावालोक्य तन्वङ्ग्याः शिरः कम्पयते युवा।

४ साः] All MSS. read *vismayānandasādhvasāḥ*. B.M. also gives it in the masculine. But the word *sādhvasa* is noted in the lexicons only in the neuter gender. It is not clear whether any lexicon notes an alternative masculine form of the word *sādhvasa*. A.T.A. uses the masculine form while introducing the illustration as *sādhvaso yathā*, etc. According to Dhanaṃjaya masculine form was also perhaps correct. In the opinion of Bh.Nr. too masculine form was probably correct. In his comments on the Prakrit verses cited under IV.५ (*vevai*, etc.), the Adyar MS. (Telugu) of the *Ṭikā* reads *atra vepata iti sādhvasa ucyate*, giving the word *sādhvasa* clearly in the masculine. I gave the neuter form there, because of the consideration that the lexicons note it only in the neuter gender. But in the line IV-५३ (b) of the *DR* neuter form is not possible.

१ *] १।१९

तयोरन्तरनिर्मग्नां दृष्टिमुत्पाटयन्निव॥ § 2563

§ 2564

*आनन्दो* यथा विद्धसालभञ्जिकायाम्— *

सुधाबद्धग्रासैरुपवनचकोरैः कवलितां किरन् ज्योत्स्नामच्छां
लवलिफलपाकप्रणयिनीम्।
उपप्राकाराग्रं प्रहिणु नयने तर्कय मना- गनाकाशे 231
कोऽयं गलितहरिणः शीतकिरणः॥* § 2567

§ 2568

*साध्वसं* यथा कुमारसंभवे— *

तं वीक्ष्य वेपथुमती सरसाङ्गयष्टिर्निक्षेपणाय पदमुद्धतमुद्वहन्ती।
मार्गाचलव्यतिकराकुलितेव सिन्धुः शैलाधिराजतनया न ययौ
न तस्थौ॥* § 2571

§ 2572

यथा वा—

व्याहृता प्रतिवचो न संदधे गन्तुमैच्छदवलम्बितांशुका।
सेवते स्म शयनं पराङ्मुखी सा तथापि रतये पिनाकिनः॥*
§ 2575

§ 2576

दशावस्थ इति। ता एवावस्थाः कथयति अभिलाष इत्यादिना। तत्राभिलाषं विवृणोति अभिलाष इति। तत्रापीति। दर्शनश्रवणाभ्यामुत्पन्नेऽप्यभिलाष इत्यर्थः। दर्शनं विवृणोति साक्षादिति। साक्षाद् दर्शनं, प्रतिकृतौ दर्शनं, स्वप्ने दर्शनं, मायादर्शनमिति दर्शनभेदा इत्यर्थः। श्रुतिभेदं व्युत्पादयति श्रुतिरिति। कमपि व्याजमवलम्ब्य कृते सखीगीते मागधादिभिः कृतायां गुणस्तुतौ च श्रुतिर्द्रष्टव्येत्यर्थः। तत्राभिलाषोत्पत्तिमुदाहरति असंशयमिति। विस्मयमुदाहरति स्तनावालोक्येति। आनन्दमुदाहरति उपप्राकाराग्रमिति साध्वसमुदाहरति तं वीक्ष्येति। § 2577

३ *] According to Bh.Nṛ's *pratīka* the second half beginning with *upaprākārāgram* seems to come first and then the first half. But MSS. read also the other way.

५ *] १।३१
७ *] The verse *taṃ vīkṣya,* etc. which is also cited by Bh.Nṛ., is missing in A.T.A.
९ *] ५। ८५
१३ *] कुमार० ८। २

...55ab सानुभावविभावास्तु चिन्ताद्याः पूर्वदर्शिताः। § 2578

गुणकीर्तनं तु स्पष्टत्वान्न व्याख्यातम्।* § 2579

चिन्तादयस्तु व्यभिचारिभावनिरूपणप्रस्तावे निरूपितत्वान्नेहोच्यन्त इत्याह सानुभावेति। गुणकीर्तनं स्पष्टत्वान्नोच्यत इत्याह गुणकीर्तनं त्विति। § 2580

232 ...55cd दशावस्थत्वमाचार्यैः प्रायोवृत्त्या निदर्शितम्॥ ५५॥ § 2581

...56ab महाकविप्रबन्धेषु दृश्यते तदनन्तता। § 2582

दिङ्मात्रं तु— § 2583

...56cd दृष्टे श्रुतेऽभिलाषाच्च किं नौत्सुक्यं प्रजायते॥ ५६॥ § 2584

...57ab अप्राप्तौ किं न निर्वेदो ग्लानिः किं नातिचिन्तनात्। § 2585

शेषं प्रच्छन्नकामितादि कामसूत्रादवगन्तव्यम्। § 2586

आचार्यैरयमयोगो दशावस्थ इति यदुक्तं तत् प्रायोवृत्त्या। वस्तुतस्तु अवस्थानामानन्त्यमेवेत्याह दशावस्थत्वमिति। तस्यानन्त्यस्य दिङ्मात्रं प्रदर्श्यते। काम्यस्य दर्शनाद् भवत्यौत्सुक्यमपि। तथा तस्मिन्नप्राप्तेऽपि भवति निर्वेदः। अतिचिन्तनादपि भवति ग्लानिः। यत्तु स्फुटाभिसरणोपायाभावे प्रच्छन्नकामित्वादि एतत् कामसूत्रादवगन्तव्यमित्यर्थः। § 2587

अथ *विप्रयोगः*— § 2588

२ *] A.T.A. reads *guṇakīrtanaṃ tu spaṣṭatvāt na vyākhyātam ihaiva tu,* which was perhaps intended as a half of a *kārikā*, but the first foot of this line shows nine syllables. B.M. also seems to give it as a half of a *kārikā*, but the transcript reads as *guṇākhyānaṃ prasiddhatvāt na vyākhyātam ato mayā.* N.S.P. gives it as a line of the *Avaloka*. The sentence as a metrical line is however jarring.

...57cd विप्रयोगस्तु विश्लेषो रूढविस्रम्भयोर्द्विधा॥ ५७॥
§ 2589

...58ab मानप्रवासभेदेन मानोऽपि प्रणयेर्ष्ययोः। § 2590

प्राप्तयोरप्राप्तिः = विप्रयोगः। तस्य द्वौ भेदौ—मानः, प्रवासश्च। मान-विप्रयोगोऽपि द्विविधः—प्रणयमानः, ईर्ष्यामानश्चेति। § 2591

प्राप्तयोरिति। विप्रयोगस्यायोगाद् वैषम्यमिदमित्यर्थः। § 2592

...58cd तत्र प्रणयमानः स्यात् कोपोपहितयोर्द्वयोः॥ ५८॥
§ 2593

प्रेमपूर्वको वशीकारः=प्रणयः, तद्भङ्गे मानः = प्रणयमानः। स च द्वयोर्नायकयोर्भवति। तत्र नायकस्य यथोत्तररामचरिते— 233

अस्मिन्नेव लतागृहे त्वमभवस्तन्मार्गदत्तेक्षणः सा हंसैः
कृतकौतुका चिरमभूद् गोदावरीसैकते।
आयान्त्या परिदुर्मनायितमिव त्वां वीक्ष्य बद्धस्तया
कातर्यादरविन्दकुड्मलनिभो मुग्धः प्रणामाञ्जलिः॥* § 2596

§ 2597

प्रणयमानशब्दार्थं निरूपयन्नाह प्रेमपूर्वक इति। § 2598

*नायिकाया* यथा श्रीवाक्पतिराजदेवस्य—

प्रणयकुपितां दृष्ट्वा देवीं ससंभ्रमविस्मित-
स्त्रिभुवनगुरुर्भीत्या सद्यः प्रणामपरोऽभवत्।
नमितशिरसो गङ्गालोके तया चरणाहता- ववतु
भवतस्त्र्यक्षस्यैतद् विलक्षमवस्थितम्॥ § 2601

§ 2602

*उभयोः प्रणयमानो* यथा— *

१ स्यात्] N.S.P. *kapāvasitayoḥ.*
५ *] ३। ३७
५ *] A.T.A. reads the last two words of the verse as *komalo maṇṇu (komalo manyuḥ).* Bh.Nṛ. gives the *chāyā* (of *mallo*) as*samarthaḥ*, whereas the N.S.P. gives it as *mallaḥ*.

पणअकुविआण दोण्ह वि अलिअपसुत्ताण माणहंताणं।
णिच्चलणिरुद्धणीसासदिण्णअण्णाण को मल्लो॥* § 2605

§ 2606

पणअकुविआण।

प्रणयकुपितयोर्द्वयोरप्यलीकसुप्तयोर्मानवतोः।
निश्चलनिरुद्धनिःश्वासदत्तकर्णयोः कः समर्थः॥ § 2609

§ 2610

...59 स्त्रीणामीर्ष्याकृतो मानः कोपोऽन्यासङ्गिनि प्रिये।
श्रुते वानुमिते दृष्टे श्रुतिस्तत्र सखीमुखात्॥ ५९॥
§ 2612

...60 उत्स्वप्नायितभोगाङ्कगोत्रस्खलनकल्पितः।
त्रिधानुमानिको दृष्टः साक्षादिन्द्रियगोचरः॥ ६०॥
§ 2614

234 ईर्ष्यामानः पुनः स्त्रीणामेव नायिकान्तरसङ्गिनि स्वकान्ते उपलब्धे सति। अन्यासङ्गस्तु श्रुतो वानुमितो वा दृष्टो वा स्यात्। तत्र श्रवणं सखीवचनात्, तस्या विश्वास्यत्वात्। यथा ममैव—*

सुभ्रूस्त्वं नवनीतकल्पहृदया केनापि दुर्मन्त्रिणा मिथ्यैव
प्रियकारिणा मधुमुखेनास्मासु चण्डीकृता।
किं त्वेतद् विमृश क्षणं प्रणयिनामेणाक्षि कस्ते हेतः किं
धात्रीतनया वयं किमु सखी किं वा किमस्मत्सुहृत्॥
§ 2617

§ 2618

प्रणयिनः प्रणयिनीप्रसादनपरं वाक्यं सुभ्रूस्त्वमित्यादि। § 2619

२ *] गाथा° १। २७
७ *] A.T.A. seems to read *subhrūs tvam*. N.S.P. *subhru tvam*.
११ वाक्यं] M.G.T. and Tri.MS. read with long *ū (subhrūs tvam)*. It seems also the reading in A.T.A. N.S.P. gives *subhru tvam*.

*उत्स्वप्नायितो यथा रुद्रस्य— § 2620

निर्मग्नेन मयाम्भसि स्मरभरादाली समालिङ्गिता
केनालीकमिदं तवाद्य कथितं राधे मुधा ताम्यसि।
इत्युत्स्वप्नपरंपरासु शयने श्रुत्वा वचः शार्ङ्गिणः सव्याजं
शिथिलीकृतः कमलया कण्ठग्रहः पातु वः॥ § 2622

*भोगाङ्कानुमितो* यथा—

नवनखपदमङ्गं गोपयस्यंशुकेन स्थगयसि पुनरोष्ठं पाणिना
दन्तदष्टम्।
प्रतिदिशमपरस्त्रीसङ्गशंसी विसर्प- न्नवपरिमलगन्धः केन
शक्यो वरीतुम्॥* § 2625

§ 2626

*गोत्रस्खलनकल्पितो* यथा—

केलीगोत्तक्खलणे वि कुप्पए केअवं अआणंती।
*दुद्दमस्स मुसा परिहासं जाआ सच्चं चिअ परुण्णा॥ § 2629

§ 2630

केलीगोत्तक्खळणे। 235

केलीगोत्रस्खलनेऽपि कुप्यति कैतवमजानन्ती।
*दुर्दमस्य कस्यचित् (?) मृषापरिहासं, वधूः सत्यमेव
प्ररुदिता॥ § 2633

§ 2634

*दृष्टो* यथा श्रीमुञ्जस्य—

प्रणयकुपितां दृष्ट्वा देवीं ससंभ्रमविस्मित-
स्त्रिभुवनगुरुर्भीत्या सद्यः प्रणामपरोऽभवत्।

---

१ *] N.S.P. *vṛttyaṅgaiḥ*.
६ *] शिशु॰ ११। ३४
१० *] A.T.A. seems to read *duddamamusaparihāsa*. But according to Bh.Nṛ's *chāyā* I chose the reading given here. N.S.P. gives *duṭṭha uasu*, with *chāyā* as *duṣṭa paśya*. The first foot of this verse occurs in a verse quoted in *Sarasvatīkaṇṭhābharaṇa*.
१४ *] Gr.MS. gives *durmadasya*, and M.G.T. and T.MS. read *durdamasya*.

नमितशिरसो गङ्गालोके तया चरणाहता- ववतु
भवतस्त्र्यक्षस्यैतद् विलक्षमवस्थितम्॥ § 2637

§ 2638

एषाम्— § 2639

...61 यथोत्तरं गुरुः षड्भिरुपायैस्तमुपाचरेत्।
सान्ना भेदेन दानेन नत्युपेक्षारसान्तरैः॥ ६१॥
§ 2641

...62 तत्र प्रियवचः साम भेदस्तत्सख्युपार्जनम्।
दानं व्याजेन भूषादेः पादयोः पतनं नतिः॥ ६२॥
§ 2643

...63 सामादौ तु परिक्षीणे स्यादुपेक्षावधीरणम्।
रभसत्रासहर्षादेः कोपभ्रंशो रसान्तरम्॥ ६३॥
§ 2645

...64ab कोपचेष्टाश्च नारीणां प्रागेव प्रतिपादिताः। § 2646
तत्र *प्रियवचः साम* यथा ममैव—

स्मितज्योत्स्नाभिस्ते धवलयति विश्वं मुखशशी दृशस्ते
पीयूषद्रवमिव विमुञ्चन्ति परितः।
वपुस्ते लावण्यं किरति मधुरं दिक्षु तदिदं कुतस्ते पारुष्यं
सुतनु हृदयेनाद्य गुणितम्॥ § 2649

§ 2650

236 *यथा वा—

इन्दीवरेण नयनं मुखमम्बुजेन कुन्देन दन्तमधरं नवपल्लवेन।
अङ्गानि चम्पकदलैः स विधाय वेधाः कान्ते कथं
रचितवानुपलेन चेतः॥ § 2653

१३ *] *yathā vā* and the example *indīvareṇa*, etc. is missing in A.T.A.

§ 2654

*नायिकासखीसमावर्जनभेदो* यथा ममैव—

कृतेऽप्याज्ञाभङ्गे कथमिव मयातिप्रणयतो धृतासि त्वं हस्ते
विसृजसि रुषं सुभ्रु बुहशः।
प्रकोपः कोऽप्यन्यः पुनरयमसीमाद्य गुणितो वृथा यत्र
स्निग्धाः प्रियसहचरीणामपि गिरः॥ § 2657

§ 2658

*दानं व्याजेन भूषादेर्*यथा माघे—

मुहुरुपहसितामिवालिनादैर्वितरसि नः कलिकां किमर्थमेनाम्।
अधिरजनि गतेन धाम्नि तस्याः शठ कलिरेव महांस्त्वयाद्य
दत्तः॥* § 2661

§ 2662

मुहुरिति। कलिकेत्यत्राल्पार्थे कः। कलिर्विवादः। तथा चाद्य पूर्णः कलिरेव दत्तस्त्वया। किमर्थम् इदानीम् *अपूर्णां कलिकां ददासीत्यर्थः।
§ 2663

*पादयोः पतनं नतिर्*यथा—

णेउरकोडिविलग्गं चिहुरं दइअस्य पाअपडिअस्स।
हिअअं पउत्थमाणं उम्मोअं त्ति चिअ कहेइ॥* § 2666

§ 2667

णेउर।

नूपुरकोटिविलग्नं चिकुरं दयितस्य पादपतितस्य।

---

३ तो] A.T.A. gives the above reading. N.S.P. reads *mayā te praṇatayo dhṛtāḥ smitvā haste*, etc.
८ *] ७। ५५
११ *] N.S.P. edition of *Śiśupālavadha* reads *vasatim upagatena* (VII. ५५) instead of *adhirajani gatena*. Like Bh.Nṛ., Mallinātha does not seem to explain as *apūrṇāṃ kalikām*, etc. as he says *mahati kalau sthite kiṃ kalyantareṇety arthaḥ*. Vallabhadeva seems to explain like Bhaṭṭanṛsiṃha. Perhaps Bh.Nṛ. was earlier than Mallinātha. See the Introduction.
३ हिअअं] A.T.A. gives this. N.S.P. reads *māṇapauttham* and the *chāyā* as *mānapadottham unmuktam ity eva kathayati*.
३ *] गाथा° २। ८८

हृदयं प्रोषितमानमुन्मोचयन्त्येव कथयति॥ § 2670

§ 2671

*उपेक्षा तदवधीरणं* यथा—

*‘उच्यतां स वचनीयमशेषं नेश्वरे परुषता सखि साध्वी।
237 आनयैनमनुनीय कथं वा विप्रियाणि जनयन्ननुनेयः॥ § 2674

किं गतेन न हि युक्तमुपैतुं कः प्रिये सुभगमानिनि मानः।*
§ 2675

§ 2676

*रभसत्रासहर्षादे रसान्तरात् कोपभ्रंशो* यथा ममैव—

अभिव्यक्तालीकः सकलविफलोपायविभव- श्चिरं ध्यात्वा
सद्यः कृतकृतकसंरम्भनिपुणम्।
इतः पृष्ठे पृष्ठे किमिदमिति संत्रास्य सहसा कृताश्लेषां धूर्तः
स्मितमधुरमालिङ्गति वधूम्॥ § 2679

§ 2680

अथ *प्रवासविप्रयोगः*— § 2681

...64cd कार्यतः संभ्रमाच्छापात् प्रवासो भिन्नदेशता॥
६४॥§ 2682

...65 द्वयोस्तत्राश्रुनिःश्वासकार्श्यलम्बालकादिता।
*तत्र भावी भवन् भूतस्त्रिधाद्यो बुद्धिपूर्वकः॥ ६५॥
§ 2684

---

१ न्त्येव] M.G.T. and Tri.MS. read *unmocayanty eva*. Gr.MS. looks like *unmocayety eva*.
२ *] A.T.A. gives these lines from the *Kirātārjunīya* correctly, unlike the N.S.P.
४ *] किरात० १। ३९-४०
६ मैव] *mamaiva* is missing in A.T.A. here, but on the previous occasion under II.५०, it was given so for the same verse.
४ *] *tatra* is in both A.T.A. and B.M.'s N.S.P. reads *sa ca*.

आद्यः कार्यजः समुद्रगमनसेवादिकार्यवशप्रवृत्तो बुद्धिपूर्वकत्वाद् भूतभविष्यद्वर्तमानतया त्रिविधः। § 2685

तत्र *यास्यत्प्रवासो* यथा—*

होंतपहिअस्स जाआ आउच्छणजीअधारणरहस्सं।
पुच्छंती भमइ घरं घरेण पिअविरहसहिरीआ॥* § 2688

§ 2689

होंतपहिअस्स।

भविष्यत्पथिकस्य जाया आप्रच्छनजीवधारणरहस्यम्।
पृच्छन्ती भ्रमति गृहं गृहेण प्रियविरहसहनशीलाः॥ § 2692

§ 2693

*गच्छत्प्रवासो* यथामरुशतके— 238

प्रहरविरतौ मध्ये वाह्नस्तोऽपि परेऽथवा दिनकृति गते
वास्तं नाथ त्वमद्य समेष्यसि।
इति दिनशतप्राप्यं देशं प्रियस्य यियासतो हरति गमनं
बालालापैः सबाष्पगलज्जलैः॥* § 2696

---

३ *] N.S.P. reads the last part as ... *gharaṃ gharesu piavirahasahirīa-* (and *chāyā* as *gṛhād gṛheṣu priyavirahasahrīkā*). --- In the N.S.P. ed. of the *DR* the reading is *āyuḥkṣaṇajīvadhāraṇarahasyam*. In the *Gāthāsaptaśatī* (N.S.P.) the *chāyā* (of the २nd foot) reads *āpṛcchanajīvadhāraṇarahasyam,* and Gaṅgādharabhaṭṭa, the commentator explains the verse thus: --- *āpṛcchanam=gamanapraśnaḥ priye yāmy aham ityevaṃrūpaḥ. tatra yajjīvadhāranaṃ tadarthaṃ rahasyam upāyaṃ pṛcchantī. anena astu tāvad virahaḥ. tava gamanasamaye eva mugdhāyā jīvitāśā saṃdigdheti dhvanitam*. But the word *āpṛcchanam* does not seem to be correct. Perhaps we should read *āpracchanjīvadhāraṇarahasyam*. Amara says *āmantraṇasabhājane āpracchanam*. Pūrṇasarasvatī on *Meghasaṃdeśa*(v. १२) says *gamanānujñārtham āmantraṇam āpraśnaḥ*.

५ *] गाथा॰ १। ४७

८ म्] This is the reading from previous editions. Gr.MS. seems to read here *āyuḥpraśnajīvarakṣaṇarahasyam*. Others are not clear.

९ शीलाः] This is the reading in M.G.T. Tri.MS. reads *priyavirahasahinī*. Gr.MS. looks like *priyavirahajabhītim*. See also Note ३२९ to *Daśarūpāvaloka*.

३ *] श्लो॰ १२

§ 2697

यथा वा तत्रैव—

देशैरन्तरिता शतैश्च सरितामुर्वीभृतां काननै- र्यत्नेनापि न
यति लोचनपथं कान्तेति जानन्नपि।
उद्ग्रीवश्चरणार्धरुद्धवसुधः कृत्वाश्रुपूर्णे दृशौ तामाशां
पथिकस्तथापि किमपि ध्यात्वा चिरं तिष्ठति॥* § 2700

§ 2701

*गतप्रवासो* यथा मेघदूते—

उत्सङ्गे वा मलिनवसने सौम्य निक्षिप्य वीणां मद्गोत्राङ्कं
विरचितपदं गेयमुद्गातुकामा।
तन्त्रीमार्द्रां नयनसलिलैः सारयित्वा कथंचिद् भूयो भूयः
स्वयमपि कृतां मूर्च्छनां विस्मरन्ती॥* § 2704

आगच्छदागतयोस्तु प्रवासाभावादेष्यत्प्रवासस्य च गतप्रवासाविशेषात् त्रैविध्यमेव युक्तम्। § 2705

ननु प्रवासस्य न केवलं त्रैविध्यमेवेत्याशङ्क्याह आगच्छदागतयोरिति। एष्यत्प्रवासस्य गतप्रवासाविशेषादिति। एष्यतः प्रवासो हि गतप्रवासान्न विशिष्यते। उभयत्राप्यदर्शनस्य तुल्यत्वादिति। § 2706

...66ab द्वितीयः सहसोत्पन्नो दिव्यमानुषविप्लवात्। § 2707

239 उत्पातनिर्घातवातादिजन्यविप्लवात् परचक्रादिजन्यविप्लवाद्वाबुद्धिपूर्वकत्वादेकरूप एव संभ्रमजः प्रवासः। यथोर्वशीपुरूरवसोर्विक्रमोर्वश्याम्। यथा च कपालकुण्डलापहृतायां मालत्यां मालतीमाधवयोः। § 2708

...66cd स्वरूपान्यत्वकरणाच्छापजः संनिधावपि॥ ६६॥ § 2709

यथा कादम्बर्यां वैशम्पायनस्येति। § 2710

४ *] श्ले° ९९
८ *] उत्तर° श्लो° २३

*उपलक्षणं चैतत्। शापजः स्वरूपान्यत्वाकरणेऽपि भवति। यथा शाकुन्तले—

मूढः स्यामहमेषा वा वदेन्मिथ्येति संशये।
दारत्यागी भवाम्याहो परस्त्रीस्पर्शपांसुलः॥* § 2713

§ 2714

प्रवासचर्या यथा—

हे विप्रयोग दहन ज्वलितो निकामं मां निर्दह प्रियमिदं न हि जीवितं मे।
एकं मनः परिहराञ्जलिरेष मूर्ध्ना न्यस्तो मया वसति यत्र सरोरुहाक्षी॥ § 2717

§ 2718

रक्तस्त्वं नवपल्लवैः इत्यादि। नायिकाया यथा—

उन्मीलन्ति नखैर्लुनीहि वहति क्षौमाञ्चलेनावृणु क्रीडाकाननमाश्रयन्ति वलयक्वाणैः समुत्सारय।
इत्थं वञ्जुलदक्षिणानिलकुहूकण्ठेषु सांकेतिका व्याहाराः सुभग त्वदीयविरहे तस्याः सखीनां मिथः॥ § 2721

नीरागा शशलाञ्छने मुखमपि स्वं नेक्षते दर्पणे त्रस्ता कोकिलकूजितादपि गिरं नोन्मुद्रयत्यात्मनः।
चित्रं दुःसहदुःखदायिनि कृतद्वेषापि पुष्पायुधे मुग्धा सा 240
सुभग त्वयि प्रतिकलं प्रेमाणमापुष्यति॥ § 2723

---

७ निर्दह ] Correction : ; निर्दय (sic !)निर्दह

---

१ *] The portion within brackets which is not found in N.S.P., is found in A.T.A. Bahurūpamiśra also does not give any inkling of this. Of the four verses found here, the second verse *unmīlanti nakhair*, etc. is also cited in the *Sāhityadarpaṇa*, as an example for a different purpose. The *raktas tvaṃ navapallavaiḥ*, etc. is said to be from the *Rāmābhyudaya* of Yaśovarman and is quoted in the *Dhvanyāloka* (ad II. १९). I do not know whether the preceding verse *he viprayoga-*, etc. is also from the *Rāmābhyudaya*, as it seems possible. The verse *nīrāgā*, etc. is found in Jalhaṇa's *Sūktimuktāvalī* (G.O.S., ८२, p. १५८). A.T.A. has *nīrākā*.

४ *] ५। २९

§ 2724

...67 मृते त्वन्यत्र पत्रान्यः प्रलपेच्छोक एव सः।
निराश्रयो न शृङ्गारः प्रत्यापन्ने तु नेतरः॥ ६७॥

§ 2726

यथेन्दुमतीमरणादजस्य करुण एव रघुवंशे। कादम्बर्यां तु प्रथमं करुण आकाशसरस्वतीवचनादूर्ध्वं प्रवासशृङ्गार एवेति। *उक्तं च—सप्रत्याशो विप्रलम्भः, निष्प्रत्याशः करुणः इति। § 2727

नायकनायिकयोरन्यतरवियोगेऽपि केचित् करुणशृङ्गारमिच्छन्ति। तन्निराकरणार्थमाह मृते त्वन्यत्रेति। तस्य शृङ्गारत्वाभावे कारणमाह निराश्रयN.S.P. and A.T.A. give a reading nirāśrayān na śṛṅgāraḥ. But Bh. Nṛ.'s pratīka shows it to be nirāśrayo na śṛṅgāraḥ, which is also given so by B.M. इति। नायकनायिकाश्रयः खलु शृङ्गारः। संयोगवद् एकस्मिन्नाश्रये गतेऽपि कथं शृङ्गारो भवेत्। अत उभयाश्रयत्वनिरपेक्षः स शोक एवेत्यर्थः। प्रत्यापन्नजीविते चान्यस्मिन् शोकविरहेण शृङ्गारो भवतीत्याह प्रत्यापन्ने त्विति। तथैवोदाहरति यथेति। § 2728

तत्र नायिकां प्रति नियमः— § 2729

---

४ *] *uktaṃ ca sapratyāśo,* etc. is found only in A.T.A. *Nāṭyaśāstra* has the following: *karuṇas tu.... nirapekṣabhāvaḥ. ... sāpekṣabhāvo vipralambhakṛtaḥ. evam anyaḥ karuṇo'nyaś ca vipralambha iti* (G.O.S. vol. I, २nd edition, pp. ३०९–१०). See also Abhinavagupta in this context. The *Śṛṅgāratilaka* of Rudrabhaṭṭa has the following: keṣāṃcit karuṇabhrāntiḥ kāruṇyād iha jāyate | etasya mithunāvasthāṃ vismṛtya ratimūlajāṃ || strīpuṃsoś ca bhaved eṣa sāpekṣaḥ saṃgamaḥ punaḥ | śṛṅgāravacanaprāyaḥ karuṇaḥ syāt sa cānyathā || --- (ed. by R. Pischel, १८८६, II. ९९, १००)

७ माह] N.S.P. and A.T.A. give the reading as *mṛte tv ekatra,* etc. Bh.Nṛ.'s *pratīka* shows it to be *mṛte tv anyatra,* which is also the reading given by B.M. See Notes ३३० and ३३१ to *Daśarūpāvaloka*.

...68 *स्वाधीनपतिकोत्काब्वासकसज्ञाभिसारणैः।
रम्यं सानुभवेत् तत्र हृष्टावस्थाचतुष्टयम्॥ ६८॥
§ 2731

...69 प्रणयायोगयोरुक्ता प्रवासे प्रोषितप्रिया।
कलहान्तरितेर्ष्यायां विप्रलब्धा च खण्डिता॥ ६९॥
§ 2733

एवं व्यवस्थितेषु विप्रलम्भशृङ्गारभेदेषु नायिका नियम्यन्त इत्याह तत्र नायिकां प्रतिति। प्रणयायोगयोरिति। प्रणयमानेऽयोगशृङ्गारे च स्वाधीनपतिका वासकसज्ञा विरहोत्कण्ठिताभिसारिका च यथायोगं नायिका भवेयुः। 241
ईर्ष्यामाने कलहान्तरिता खण्डिता विप्रलब्धा च भवेयुः। प्रवासे तु प्रोषितप्रियेति। § 2734

अथ *संभोगः*— § 2735

...70 अनुकूलौ निषेवेते यत्रान्योन्यं विलासिनौ।
दर्शनस्पर्शनादीनि स संभोगो मुदान्वितः॥ ७०॥
§ 2737

यथोत्तररामचरिते—

किमपि किमपि मन्दं मन्दमासत्तियोगादविरलितकपोलं
जल्पतोरक्रमेण।
सपुलकपरिरम्भव्यापृतैकैकदोर्ष्णोरविदितगतयामा रात्रिरेव
व्यरंसीत्॥* § 2740

§ 2741

अथवा—
प्रिये, किमेतत्—

विनिश्चेतुं शक्यो न सुखमिति वा दुःखमिति वा प्रमोहो निद्रा वा
किमु विषविसर्पः किमु मदः। तव स्पर्शे स्पर्शे मम हि
परिमूढेन्द्रियगणो विकारः कोऽप्यन्तर्जडयति च तापं च

---

१ *] See the Introduction and the *Laghuṭīkā*.
६ च] See the Introduction for a discussion related to this portion. (The missing *kārikā*.)
६ *] १। २७

कुरुते॥* § 2743 &

§ 2744

यथा च ममैव—

लावण्यामृतवर्षिणि प्रतिदिशं कृष्णागरुश्यामले वर्षाणामिव
ते पयोधरभरे तन्वङ्गि दूरोन्नते।
*नासावंशमनोज्ञकेतकतरुर्भ्रूपत्रगर्भोल्लस- त्पुष्पश्रीस्तिलकः
सहेलमलकैर्भृङ्गैरिवापीयते॥ § 2747

§ 2748

...71 चेष्टास्तत्र प्रवर्तन्ते लीलाद्या दश योषिताम्।
दाक्षिण्यमार्दवप्रेम्णामनुरूपाः प्रियं प्रति॥ ७१॥
§ 2750

242 ताश्च सोदाहृतयो नायकप्रकाशे दर्शिताः। § 2751

तत्र संभोगशृङ्गारे स्त्रीणां दाक्षिण्यमार्दवप्रेम्णामनुरूपा दशसंख्याश्चेष्टाः प्रवर्तन्त इत्याह तत्रेति। तर्हि ता अपीह वक्तव्याः। नेत्याह ताश्चेति। § 2752

...72 रमयेच्चाटुकृत् कान्तः कलाक्रीडादिभिश्च ताम्।
न ग्राम्यमाचरेत् किंचिन्नर्म तत्सूचकं न च॥ ७२॥
§ 2754

ग्राम्यः संभोगो रङ्गे निषिद्धोऽपि काव्येऽपि न कर्तव्य इति पुनर्निषिध्यते। यथा रत्नावल्याम्—

स्पृष्टस्त्वयैष दयिते स्मरपूजाव्यापृतेन हस्तेन।
उद्भिन्नापरमृदुतरकिसलय इव लक्ष्यतेऽशोकः॥* § 2757

इत्यादि। नायिकानायककैशिकीवृत्तिनाटकनाटिकालक्षणाद्युक्तं कविपरंपरावगतं स्वयमौचित्यसंभावनानुगुण्येनोत्प्रेक्षितं चानुसंदधानः सुकविः शृङ्गारमुपनिबध्नीयात्। § 2758

---

० *] उत्तर० १। ३५
१ *] N.S.P. -*ketakatanur*-, etc.
२ र्म] N.S.P. *narmabhraṃśakaraṃ na ca.* See the Introduction.
६ *] १। २१

ननु पूर्वमेव निषिद्धं ग्राम्यं पुनः किं निषिध्यते। तत्राह ग्राम्यः संभोग इति। किमस्ति तत् काव्ये। ओमित्युदाहरणेन दर्शयति यथेति। नायिकाप्रभृतीनामुक्तेऽपि लक्षणे न तन्मात्रेण कविर्निबध्नीयात्। किं तु कविपरंपराममवगम्य स्वयमुचितमेतत् संभावितमेतदिति चावगम्य तदानुगुण्येन शृङ्गारादिरसं निबध्नीयादित्याह नायिकेत्यादि। § 2759

अथ *वीरः*— § 2760

...73 वीरः प्रतापविनयाध्यवसायसत्त्वा-
मोहाविषादनयविस्मयविक्रमाद्यैः।
उत्साहभूः स च दयारणदानयोगात् त्रेधा 243
किलात्र मतिगर्वधृतिप्रहर्षाः॥ ७३॥ § 2762

*प्रतापविनयादिभिर्विभावितो दयादिभिरनुभावितः करुणायुद्धदानभिन्नो गर्वधृतिहर्षामर्षस्मृतिमतिवितर्कप्रभृतिभिर्भावित उत्साहः स्थायी स्वदते भावकमनोविस्तारादानन्दाय प्रभवतीत्येष वीरः। तत्र दयावीरो यथा नागानन्दे जीमूतवाहनस्य। युद्धवीरो वीरचरिते रामस्य। दानवीरः परशुरामबलिप्रभृतीनाम्। त्यागः सप्तसमुद्रमुद्रितमहीनिर्व्याजदानावधिः इति। *

गर्भग्रन्थिविमुक्तसंधिविगलद्वक्षःस्फुरत्कौस्तुभं
निर्यन्नाभिसरोजकुड्मलकुटीगम्भीरसामध्वनि।
पात्रावाप्तिसमुत्सुकेन बलिना सानन्दमालोकितं पायाद् वः
क्रमवर्धमानमहिमाश्चर्यं मुरारेर्वपुः॥ § 2765

§ 2766

यथा च ममैव—*

लक्ष्मीपयोवरोत्सङ्गकुङ्कुमारुणितो हरेः।
बलिरेष स येनास्य भिक्षापात्रीकृतः करः॥ § 2769

---

२ ति] See the Introduction (His comments on an example from the *Ratnāvalī*) for a discussion connected with this portion.
४ *] N.S.P. reads: *pratāpavinayādibhir bhāvitaḥ karuṇāyuddhadānādyair anubhāvito garvadhṛti-*, etc.
६ न्दाय] N.S.P. *manovistārānandāya*.
८ इति] वी° च° २। ३६
८ *] N.S.P. *kharvagranthi-*, etc.
१२ *] *yathā ca mamaiva—lakṣmīpayodharotsaṅga-*, etc. is missing in A.T.A.

विनयादिषु पूर्वमुदाहृतमनुसंधेयम्। प्रतापगुणावर्जनादिवीराणामपि भावात् त्रैवं प्रायोवादः। प्रस्वेदरक्तवदननयनादिक्रोधानुभावरहितो युद्धवीरः, अन्यथा रौद्रः। § 2770

प्रतापादिजन्यादुत्साहस्थायिभावादुत्पन्नो वीरो दयावीरो दानवीरो युद्धवीर इति दयादिभिरनुभावैरुपश्लेषात् त्रेधा विभक्तो, मतिप्रभृतिभिर्व्यभिचारिभिः परां प्रौढिमागतो, विकासादिषु चित्तभूमिषु चेतसो विस्तारमारभमाणो रसिकानां स्वादाय भवतीत्यर्थः। परशुरामबलिनोः क्रमेणोदाहरणे
244 त्यागः सप्तसमुद्रमुद्रितेति गर्भग्रन्थीति च। एवं प्रतापभूरुत्साह उदाहृतः। विनयादिभूस्तदुदाहरणेनैव दर्शितप्राय इत्याह विनयादिष्विति। तत्र युद्धवीरे एतावन्तो वीरानुभावा एतावन्तो रौद्रानुभावा इति विविनक्ति प्रस्वेदेति।
§ 2771

अथ *बीभत्सः*— § 2772

...74 बीभत्सः कृमिपूतिगन्धिवमथुप्रायैर्जुगुप्सैकभू-
रुद्वेगी रुधिरान्त्रकीकसवसामांसादिभिः क्षोभणः।
वैराग्याज्जघनस्तनादिषु घृणाशुद्धोऽनुभावैर्वृतो
नासावक्त्रविकूणनादिभिरिहावेगार्तिशङ्कादयः॥
७४॥ § 2774

अत्यन्ताहृद्यैः कृमिपूतिगन्धिप्रायविभावैरुद्भावितो जुगुप्सास्थायिभावपरिपोषणलक्षण उद्वेगी बीभत्सः। यथा मालतीमाधवे—

उत्कृत्योत्कृत्य कृत्तिं प्रथममथ पृथूच्छोफभूयांसि मांसा-
न्यंसस्फिक्पृष्ठपिण्डाद्यवयवसुलभान्युग्रपूतीनि जग्ध्वा।
आर्तः पर्यस्तनेत्रः प्रकटितदशनः प्रेतरङ्कः करङ्का-
दङ्कस्थादस्थिसंस्थं स्थपुटगतमपि क्रव्यमव्यग्रमत्ति॥*
§ 2777

§ 2778

७ णे] In A.T.A. Dhanika's own verse *lakṣmīpayodhara,* etc. is missing. Bh.Nṛ. here uses the dual number and refers to and cites the two verses *tyāgaḥ,* etc. and *garbhagranthi-,* etc. It is not clear what was his view regarding the third example. As this was found in other manuscripts collated for the previous editions, I thought of retaining it in the text.
३ नादिषु] 'घृणायुक्तः' इति पाठः.
७ *] ५। १६

रुधिरान्त्रवसाकीकसमांसादिविभावितः क्षोभणो बीभत्सः। यथा वीरचरिते—

अन्त्रप्रोतबृहत्कपालनलकक्रूरक्वणत्कङ्कण-
प्रायप्रेङ्खितभूरिभूषणरवैराघोषयन्त्यम्बरम्।
पीतच्छर्दितरक्तकर्दमघनप्राग्भारघोरोल्लसद्-
व्यालोलस्तनभारभैरववपुर्बन्धोद्धतं धावति॥* § 2781

रम्येष्वपि रमणीजघनस्तनादिषु वैराग्याद् घुणाशुद्धो बीभत्सः। यथा— 245

लालां वक्त्रासवं वेत्त मांसपिण्डौ पयोधरौ।
मांसास्थिकूटं जघनं जनः कामग्रहातुरः॥ § 2784

§ 2785

न चायं शान्त एव विरक्तोक्तेः। अयं तु बीभत्समानो विरज्यते। § 2786

बीभत्सः कृमिपूतिगन्धिवमथुप्रायैरिति। जुगुप्साप्रभवो बीभत्सस्त्रिविधो भवति—उद्वेगी क्षोभणः शुद्धश्चेति। तत्र कृमिप्रभृतिविभावाद्युत्पन्नायां जुगुप्सायामुद्वेगी। रुधिरादिजन्यायां तस्यां क्षोभणः। वैराग्योत्पन्नजघनस्तनादियाथात्म्यपरिभावनाजन्यायां तस्यां शुद्धः। नासिकाया वक्त्रस्य च विकूणनादिभिरनुभावितस्यास्य व्यभिचारिण आवेगप्रभृतय इत्यर्थः। नन्वयं रमणीयेष्वपि प्रमदास्तनजघनादिषु यथात्म्यपरिभावनासमुद्भूतवैराग्याज्जातः शुद्धो वीभत्सः शान्त एवेत्याशङ्क्याह न चेति। हेतुमाह विरक्तोक्तेरिति। सर्वकर्मविरहे शान्तिर्भवति। अयं तु वीभत्सादिजन्मना वैराग्येणोत्पन्नः कथं शान्तो रसो भवेदित्यर्थः। § 2787

---

४ *] १। ३५

९ चायं] See Note २७६ to *Laghuṭīkā*.

१६ हेतुमाह] This *pratīka* and the subsequent explanation show that the text here should be: *na cāyaṃ śānta eva viraktokteḥ. ayaṃ tu bībhatsamāno virajyate*. --- This *bībhatsa* means that the person in the context has a dislike for even the beautiful items (regarded as such by many) such as *jaghana, stana*, etc. and it does not mean that he has developed a complete detachment from all the mundane items, which latter is the case for the *śāntarasa*. This reference must imply that the author is talking about, just for the sake of argument, the fact that the so-called *śāntarasa* cannot include this third type of *bībhatsa*, and it does not mean that he is conceding a place to the *śāntarasa* in a play.

१७ हे] Tri.Ms. reads *sarvadharmavirahe*, and M.G.T. merely as *dharmavirahe*. Perhaps it is *sarvakarmavirahe*. See Dhanika's comments on IV.३५, in connection with *śāntarasa : samastavyāpārapravilayarūpasya abhinayāyogāt*.

अथ *रौद्रः*— § 2788

...75 क्रोधो मत्सरवैरिवैकृतमयैः पोषोऽस्य रौद्रोऽनुजः
क्षोभश्चाधरदंशकम्पभ्रुकुटिस्वेदास्यरागैः पुनः।
शस्त्रोल्लासविकत्थनांसधरणीघातप्रतिज्ञाग्रहै-
स्तत्रामर्षमदौ स्मृतिश्चपलतासूयौग्र्यवेगादयः॥
७५॥ § 2790

*मात्सर्यविभावो रौद्रो* यथा वीरचरिते—

त्वं ब्रह्मवर्चसधनो यदि वर्तमानो यद्वा स्वजातिसमयेन धनुर्धरः स्याः।
अग्रेण भोस्तव तपस्तपसा दहामि पक्षान्तरस्य सदृशं परशुः करोति॥* § 2793

§ 2794
246 *वैरिवैकृताद्* यथा वेणीसंहारे—

लाक्षागृहानलविषान्नसभाप्रवेशैः प्राणेषु वित्तनिचयेषु च नः प्रहृत्य।
आकृष्टपाण्डववधूपरिधानकेशाः स्वस्था भवन्तु मयि जीवति धार्तराष्ट्राः॥* § 2797

इत्येवमादिभिर्विभावैः प्रस्वेदरक्तवदननयनाद्यनुभावैरमर्षादिव्यभिचारिभिः क्रोधपरिपोषो रौद्रः परशुरामभीमसेनदुर्योधनादिव्यापारेषु वीरचरितवेणीसंहारादाववगन्तव्यः। § 2798

क्रोध इति। मात्सर्यवैरिवैकृतादिभिः समानेषूत्पन्नः क्रोधस्थायिभावजन्मा चित्तक्षोभाधरदंशनादिभिरनुभावितोऽमर्षप्रभृतिभिर्व्यभिचारिभावैः परं प्रकर्षमागतो रौद्ररसो भवतीत्यर्थः। § 2799

अथ *हास्यः*— § 2800

...76 विकृताकृतिवाग्वेषैरात्मनोऽथ परस्य वा।
हासः स्यात् परिपोषोऽस्य हास्यस्त्रिप्रकृतिः स्मृतः॥
७६॥ § 2802

६ *] ३। ४४
१० *] १। ८

आत्मस्थान् विकृतवेषभाषादीन् परस्थान् वा विभावानवलम्बमानो हासः, तत्परिपोषात्मा हास्यो रसो द्व्यधिष्ठानो भवति। प्रतिस्वं चोत्तम-मध्यमाधमप्रकृतिभेदात् षड्विधः। § 2803

विकृताकृतिवाग्वेषैरिति। आत्मनो वा परस्य वा विकृताभिर्वाग्भिः वि-कृतैर्वेषैश्च जायमानाद्धासादुद्भूतस्त्रिप्रकृतिर्हास्यो रसः स्मृत इत्यर्थः। आत्म-परभेदेन द्विविधकारणजन्मनो हासाज्जायमानतया द्विविधो हास्योऽपि प्र-त्येकमुत्तममध्यमाधमभेदेन त्रिविध इत्याह प्रतिस्वं चेति। § 2804

*आत्मस्थो* यथा रावणः—

जातं मे परुषेण भस्मरजसा तच्चन्दनोद्धूलनं हारो वक्षसि
यज्ञसूत्रमुचितं क्लिष्टा जटाः कुन्तलाः।
रुद्राक्षः स किलैष रत्नवलयश्चित्रांशुकं वल्कलं 247
सीतालोचनहारि कल्पितमहो रम्यं वपुः कामिनः॥ § 2807

§ 2808

*परस्थो* यथा—

भिक्षो मांसनिषेवणं प्रकुरुषे किं तेन मद्यं विना किं ते
मद्यमपि प्रियं प्रियमहो वाराङ्गनाभिः सह।
वेश्या द्रव्यरुचिः कुतस्तव धनं द्यूतेन चौर्येण वा
चौर्यद्यूतपरिग्रहोऽपि भवतो भ्रष्टस्य कान्या गतिः॥ § 2811

§ 2812

...77 स्मितमिह विकासिनयनं किंचिल्लक्ष्याद्विजं तु हसितं स्यात्।
मधुरस्वरं विहसितं सांसशिरःकम्पमिदमुपहसितम्॥ ७७॥ § 2814

...78 *अपहसितं सास्राक्षं विक्षिप्ताङ्गं भवत्यतिहसितम्।

---

२ तिस्वं] N.S.P. *sa cottama-*, etc.
७ स्य] N.S.P. *dāsasya.*
३ *] On page १५० (२nd ed. १९६२) G.C.O. Haas comments about the half of the *āryā* running: *apahasitaṃ sāsrākṣaṃ vikṣiptāṅgam bhavaty atihasitam* (*DR*, IV. ७८,

द्वे द्वे हसिते चैषां ज्येष्ठे मध्येऽधमे क्रमशः॥ ७८॥
§ 2816

उत्तमस्य स्वपरस्थविकारदर्शनात् स्मितहसिते। मध्यमस्य विहसितोपहसिते। अधमस्यापहसितातिहसिते। उदाहृतयः स्वयमुत्प्रेक्ष्याः। § 2817

व्यभिचारिणश्चास्य— § 2818

...79ab निद्रालस्यश्रममग्लानिमूर्च्छाश्च सहचारिणः। § 2819 ५

ईदृशस्य हास्यरसस्यानुभावान् विभज्य दर्शयति स्मितमिहेति। अस्य व्यभिचारिणो दर्शयति व्यभिचारिणश्चास्येति। § 2820

अथाद्भुतः— § 2821

...79cd अतिलोकैः पदार्थैः स्याद् विस्मयात्मा रसोऽद्भुतः॥
७९॥ § 2822

...80abcd कर्मास्य साधुवादाश्रुवेपथुस्वेदगद्गदाः।
248 हर्षावेगधृतिप्राया भवन्ति व्यभिचारिणः॥ ८०॥
§ 2824

लोकसीमातिवर्तिपदार्थवर्णनादिविभावितः साधुवादाद्यनुभावपरिपुष्टो विस्म ५
यस्थायिभावो हर्षावेगादिव्यभिचारिभावो रसोऽद्भुतः। यथा—

present edition) as follows: --- As it stands in the printed text, the first half of the second *āryā* stanza is defective, lacking one syllabic instant. ... At the suggestion of Dr. L. H. Gray I have adopted the correction *atīhasitam*,' etc. The first half may show २९ *mātrā-s* (whereas usually ३० are required), and so he feels it is defective. But Nārāyaṇabhaṭṭa in his commentary on the *Vṛttaratnākara* says: *upagītir eva ādyārdhe adhikaikaguruyuktā pramadā nāma. mamaiva yathā*--- yasya vilāsavatīnāṃ kelikalākauśale rativiratiḥ | maithunamātrarasajñaḥ śṛṅgavihinaḥ pumān sa paśuḥ || (Chowkhamba ed. १९६२, page ४०) --- Thus in this example there are २९ *mātrā-s* in the first half, and २७ in the second. Similar is the *āryā* of the *DR* under discussion. Therefore I do not think it to be defective *āryā*, even as it stands.

दोर्दण्डाञ्चितचन्द्रशेखरधनुर्दण्डावभङ्गोद्धत-
टङ्कारध्वनिरार्यबालचरितप्रस्तावनाडिण्डिमः।
द्राक्पर्याप्तकपालसंपुटमिलद्ब्रह्माण्डभाण्डोदर-
भ्राम्यत्पिण्डितचण्डिमा कथमसौ नाद्यापि विश्राम्यति॥*
§ 2827

इत्यादि। § 2828

अतिलोकैरिति। अतिलोकपदार्थदर्शनादिजन्मना विस्मयेनोद्भूतः साधुवादादिभिरनुभाविती हर्षावेगादिभिर्व्यभिचारिभिः प्रकृष्टः अद्भुतात्मा रसो भवतीत्यर्थः।
§ 2829

अथ *भयानकः*— § 2830

...80ef विकृतस्वरसत्त्वादेर्भयभावो भयानकः। § 2831

...81 सर्वाङ्गवेपथुस्वेदशोषवैवर्ण्यलक्षणः।
दैन्यसंभ्रमसंमोहत्रासादिस्तत्सहोदरः॥ ८१॥ § 2833

रौद्रशब्दश्रवणाद् रौद्रवस्तुदर्शनाच्च भयस्थायिभावप्रभवो भयानको रसः। तत्र सर्वाङ्गवेपथुप्रभृतयोऽनुभावाः। दैन्यादयस्तु व्यभिचारिणः। भयानको यथा प्रागुदाहृतः—

शस्त्रमेतत् समुत्सृज्य कुब्जीभूय शनैः शनैः।
पथा यथागतेनैव यदि शक्नोषि गम्यताम्॥ § 2836

§ 2837

यथा च रत्नावल्याम्—नष्टं वर्षवरैः* इत्यादि। यथा च— 249

स्वगेहात् पन्थानं तत उपचितं काननमथो गिरिं तस्मात्
सान्द्रद्रुमगहनमस्मादपि गुहाम्।
तदन्वङ्गान्यङ्गैरभिनिविशमानो न गणयत्यरातिः वाप्यस्थात्
तव विजययात्राचकितधीः॥ § 2840

§ 2841

---

२ *] वी॰ च॰ १। ५४
८ नैः] See Note २७८ to *Laghuṭīkā*.
११ *] २।३

१३ रातिः] N.S.P. *kvālīye*. A.T.A. reads *kvāpyastāt*. Perhaps *kvāpyasthāt* was intended.

विकृतेति। विकृतस्वरसत्त्वादिजन्मना भयेन भावितः साध्वसप्रभृतिभिरनुभावितो दैन्यादिभिर्व्यभिचारिभावैः संयुक्तः प्रकृष्टो भयानको रसो भवतीत्यर्थः। प्रागुदाहृत इति। आवेगसमये। § 2842

अथ *करुणः*— § 2843

...82 इष्टनाशादनिष्टाप्तौ शोकात्मा करुणोऽनु तम्।
निःश्वासोच्छ्वासरुदितस्तम्भप्रलपितादयः॥ ८२॥
§ 2845

...83 तस्यापस्मारदैन्याधिमरणालस्यसंभ्रमाः।
विषादजडतोन्मादचिन्ताद्या व्यभिचारिणः॥ ८३॥ ५
§ 2847

३ ये] M.G.T. and Tri.MS. read *āvegasamaye*. Gr.MS. is not clear. It looks like *ity āvagaṃnesamaye*. A.T.A. also has the expression *bhayānako yathā prāgudāhṛtaḥ*, introducing *śastram etat samutsṛjya*. This verse was not cited before in the course of the various illustrations for *āvega*, as the comments of Bh.Nṛ. would appear to convey. Instead, there is another verse seen in the previous editions running as *tanutrāṇaṃ tanutrāṇam*, etc., which is not found in A.T.A. Under the *kārikā*s dealing with *bhayānakarasa* in the previous editions another illustration is introduced running as *yathā ca ratnāvalyām—naṣṭaṃ varṣavaraiḥ ityādi* (This is also not found in A.T.A.). This verse *naṣṭam*, etc. was cited by Dhanika before, not for *āvega*, but under *avapāta*, one of the four *aṅga*s of the *ārabhaṭīvṛtti* (*DR* II. ५९). But this illustration *naṣṭaṃ varṣavaraiḥ*, etc. is not found in A.T.A. under the *kārikā*s of *bhayānakarasa*. So it is not clear what was the exact text in this place. Perhaps the verse *śastram etat*, etc. was also given as an illustration for *āvega* either together with *tanutrāṇaṃ tanutrāṇam*, etc. (which is found in other manuscripts, though not in A.T.A.) or separately, as both can be connected with *āvega* caused by *abhimara* noted in the context. The other example *naṣṭam varṣavaraiḥ*, etc. (though not found in A.T,A., but found in others) may also be connected with the *bhayānakarasa*. *abhimara* was explained by B.M. as *śatruśastraprahāraḥ*.

इष्टस्य बन्धुप्रभृतेर्विनाशादनिष्टस्य तु वधबन्धादेः प्राप्त्या शोकप्रकर्षः करुणः। तमन्विति तदनुभावनिःश्वासादिकथनम्। व्यभिचारिणश्चास्यापस्मारादयः। इष्टनाशात् करुणो यथा कुमारसंभवे—

अयि जीवितनाथ जीवसीत्यभिधायोत्थितया तया पुरः।
ददृशे पुरुषाकृतिः क्षितौ हरकोपानलभस्म केवलम्॥* § 2850

इत्यादिरतिप्रलापे। अनिष्टावाप्तेः सागरिकाया बन्धनाद् यथा रत्नावल्याम्। § 2851

इष्टनाशादिति। इष्टनाशानिष्टाप्त्यादिजन्मना शोकेन भावितो निःश्वासाद्यनुभावितोऽपस्मारादिभिर्व्यभिचारिभिरनुविद्धः करुणो रसो भवतीत्यर्थः। § 2852

...84 प्रीतिभक्त्यादयो भावा मृगयाक्षादयो रसाः।
हर्षोत्साहादिषु स्पष्टमन्तर्भावान्न कीर्तिताः॥ ८४॥
§ 2854

स्पष्टम्। § 2855

नन्वन्येऽपि प्रीत्यादयो भावाः सन्ति। मृगयादयो रसाश्च सन्ति। ते किं न लक्षिताः। तत्राह प्रीतीति। § 2856

...85 *षट्त्रिंशद् भूषणादीनि सामादीन्येकविंशतिः।
लक्ष्म संध्यन्तराख्यानि सालंकारेषु तेषु च॥ ८५॥
§ 2858

विभूषणं चाक्षरसंहतिश्च शोभाभिमानो गुणकीर्तनं च इत्येवमादीनि षट्त्रिंशत् काव्यलक्षणानि, साम भेदः प्रदानं च इत्येवमादीनि संध्यन्तराण्ये-

---

५ *] ४।३
५ त्राह] See Dhanika's remarks under *vīra* (IV.७३): *traidhaṃ prāyovādaḥ*. He thus includes *mṛgayā, akṣa*, etc. under *utsāha*. See also Dhanika's remarks under IV.१४: *priyāgamanaputrajanmotsavādivibhāvaiś cetaḥprasādo harṣaḥ*, under which he would like to include *prīti, bhakti*, etc., not according them a separate status.
१ *] Bahurūpamiśra does not seem to mention or comment upon (I do not find in the copies with me) the *kārikā ṣaṭtriṃśad bhūṣaṇādini*, etc. A.T.A. has the *kārikā*.

कविंशतिरुपमादिऽवलंकारेषु हर्षोत्साहादिष्वन्तर्भवन्ति। तेन न पृथगुक्तानि।
§ 2859

षट्त्रिंशदिति। 'भूषणाक्षरसंघातः शोभोदाहरणे तथा' ** इत्यादिभिः कीर्तितानि षट्त्रिंशद् भूषणादीनि, एकविंशतिः सामप्रभृतीनि संध्यन्तराणि, *उपमादयोऽलंकाराश्च तेषु तेषु हर्षोत्साहादिष्वन्तर्भूतत्वात् पृथङ् न कीर्तितानीत्यर्थः। § 2860

...86 रम्यं जुगुप्सितमुदारमथापि नीच- मुग्रं प्रसादि गहनं विकृतंच वस्तु।
251 यद्वाप्यवस्तु कविभावकभाव्यमानं तन्नास्ति यन्न रसभावमुपैति लोके॥ ८६॥ § 2862

---

१ लंकारेषु] See Note २८१ to *Laghuṭīkā*.

१ न्ति] N.S.P. *antarbhāvān na pṛthag uktāni*. See Note २८० and २८१ to *Laghuṭīkā*.

३ *] Of the १६th chapter of the *Nāṭyaśāstra* there seem to have been two different recensions. One was followed by Abhinava and commented on, and the other by some others. What Dhanika quotes as: *vibhūṣaṇaṃ cākṣarasaṃhatiś ca śobhābhimānau guṇakīrtanaṃ ca* is the one found in the beginning of the १६th chapter and commented on by Abhinava too. Bh.Nṛ. however cites the verse *bhūṣaṇākṣarasaṃghātaḥ*, etc. which is found in the beginning of the *ṣoḍaśādhyāyānubandha* (both are printed in G.O.S.). Perhaps Bh.Nṛ. followed the recension other that the one followed by Dhanika. Or perhaps the text of the *Avaloka* as available now is not authentic. Bh.Nṛ. does not have any discussion about it.

३ *] (ना० शा० १६ अनुबन्धः)

५ *] *upapāditeṣv alaṃkāreṣu ca harṣotsāhādiṣv antarbhavanti. tena na pṛthag uktāni* is the reading of the Avaloka here according to A.T.A. N.S.P. reads *upamādiṣv ivālaṃkāreṣu harṣotsāhādiṣv antarbhāvānna pṛthag uktāni*. Bh.Nṛ.'s comments here run as *upamādayo 'laṃkārāś ca teṣu teṣu harṣotsāhādiṣv antarbhūtatvāt pṛthaṅ na kīrtitānīty arthaḥ*. The exact significance here intended by Dhanaṃjaya, Dhanika and Bh.Nṛ, is not very clear to me.

१ विकृतं] A.T.A. also reads *vikṛtam. vivṛta* perhaps would be a better counterpart of *gahana*, as the verse seems to have in other cases *ramya* and *jugupsita, udāra* and *nīca,* and *ugra* and *prasādi.*

...87 विष्णोः सुतेनापि धनंजयेन विद्वन्मनोरागनिबन्धहेतुः।
आविष्कृतं मुञ्जमहीशगोष्ठीवैदग्ध्यभाजा
दशरूपमेतत्॥ ८७॥ § 2864

इति धनंजयविरचिते दशरूपके चतुर्थः प्रकाशः

इति श्रीविष्णुसूनोर्धनिकस्य कृतौ दशरूपावलोके रसविचारो नाम चतुर्थः प्रकाशः समाप्तः

रम्यजुगुप्सितादिरूपं वस्तु अवस्तु वा रसीभूय कविभावेन अनाक्रान्तं लोके नास्तीत्याह रम्यमिति। विष्णोः सुतेनापीति। न केवलं विष्णुना [किं तु] तत्सुतेनापि धनंजयनाम्ना दशरूपमाविष्कृतमित्यर्थः। § 2867

[इति धनिककृतस्यThis is as it is given at the end of all the three previous chapters. So I included it here also. As before Gr.MS. alone reads prakāśaḥ, where the others give paricchedaḥ. दशरूपावलोकस्य] भट्टनृसिंहकृतायां टीकायां चतुर्थः परिच्छेदः

७ र्थः] This is the significance of *api* in the verse. See verse I.२ of the *DR* and the comments thereon, to have a clear idea of the significance of *api* intended by the author. Viṣṇu was the name of the father of Dhanaṃjaya (and Dhanika too ?).

# The TEI Header